18-2-74
"POORNA"
2. TAWKERS CHOULTRY
TIRUCHIRAPALLI-8.

॥ श्रीचित्सभेशाय मङ्गलम् ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमद्वाराणसीमण्डलमण्डनायमान-
पदवाक्यप्रमाण पारावारपारीण दुर्वादिवादतूलजालकालानल-
श्रीनीलकण्ठयतीन्द्रैः प्रणीतः

# ॥ यतिधर्मप्रबोधः ॥

चिदम्बरश्रीनटराजालयनिर्वाहकैः सुहृत्सभास्थापकैः
शास्त्राचार्यैः पण्डितराजैः राजा-सोमशेखरदीक्षितैः
संपादितः, प्रकाशितश्च ।

SRI GNANANANDA NIKETAN
LIBRARY,
THAPOVANAM P. O.
Pin-605756.

श्रीरङ्गस्थ श्रीवाणीविलासमुद्रणालये मुद्रापितस्सन्
विजेजीयताम् ।

विरोधिकृन्नाम संवत्सरे मिथुनमासे श्रीनटराजराजस्य उत्तरफल्गुनीनक्षत्र-
श्रीमज्जनदर्शनमहोत्सवदिने प्रकाशितः ।
30—6—71

मूल्यम् Rs. 3/-

# ॥ भूमिका ॥

॥ श्रीचित्सभेशाय मङ्गलम् ॥

'नमः कपर्दिने च व्युप्तकेशाय च' इति शतरुद्रीयश्रुतिः ५·७-८। कस्य जलस्य पः प्रवाहः गङ्गाप्रवाहः तं दायति शोधयति परमपवित्रं गङ्गाजलमपि पवित्रीकरोतीति कपर्दी। तथा चोक्तं रामायणे 'पपात जाह्नवी पुण्या पुण्ये रुद्रस्य मूर्धनि। भवाङ्गपतितं तोयं पवित्रमिति पस्पृशु' ॥ इति। श्रीनटेशसहस्रनाम्नि (60) व्युप्ताः मुण्डिताः केशाः यस्य सः। परमहंस-परिव्राजकरूपः। 'अथ परिव्राडेकशाटी शिष्यपरिवृतो मुण्डः उदरपात्री' 'ज्ञानशिखिनः ज्ञानयज्ञोपवीतिनः' इत्यादिश्रुतेः। तेन दत्तात्रेयदुर्वासःप्रभृतयः जाबालोपनिषदादिप्रसिद्धाः, कलियुगे च 'चतुर्भिस्सहितश्शिष्यैश्शङ्करोऽवत-रिष्यति' इति शिवरहस्योक्तेः ॥ श्रीनटेशसहस्रनाम्नि (234 व्युप्तकेशः) अस्मदीयनटेशसहस्रनामभाष्ये स्पष्टम्। अत एव महाकविः श्रीकालिदासः 'एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यस्स्वयं कृत्तिवासाः, कान्तासंमिश्र-देहोऽप्यविषयमनसां यः परस्ताद्यतीनाम्। अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिः बिभ्रतो नाभिमानः, सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥' इति। किंच तैत्तिरीयारण्यकभाष्ये दशमप्रपाठके 62 तमे अनुवाके 'न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत् य एवं वेदेत्युपनिषत्' ॥ पूर्वकाण्डोक्तानामग्निहोत्रादिकर्मणा-मारुणिकजाबालाद्युक्तप्रकारेण परित्यागः न्यासः, स एवोत्तमो मोक्षहेतुरिति ब्रह्मा हिरण्यगर्भः मन्यते। स च ब्रह्मा परो हि। परमात्मैव ब्रह्मा हिरण्यगर्भः इति वक्तुं शक्यते। अत एव श्वेताश्वतरोपनिषदि 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै'। इति। यानि पूर्वोक्तसत्यादीनि मानसान्तानि एकादश मोक्षसाधनानि तपांसि भवन्त्येव। तथापि सन्न्यासा-पेक्षया अवराणि निकृष्टानि। सन्न्यास एक एव सर्वाण्यत्यरेचयत् अतिक्रान्तवान् अत्युत्कृष्टोऽभवदित्यर्थः ॥

पूर्वोक्तं मोक्षसाधनसमूहमुपपादयितुमाख्यायिकामाह 63 तमानु-वाकः । 'प्राजापत्यो -ह्यारुणिः सुपर्णेयः' ॥ आरुणिनामकः ब्रह्मपुत्रः पितरमुपसद्योत्तमसाधनजिज्ञासया पप्रच्छ । भगवन्तः पूज्या महर्षयः मोक्ष-साधनेषु किं साधनं परमं उत्कृष्टं वदन्तीति । एवं पृष्टः प्रजापतिः पुत्राय प्रोवाच ॥ 1 सत्यं 2 तपः 3 दमः 4 शमः 5 दानं 6 धर्मः 7 प्रजनः 8 अग्नयः 9 अग्निहोत्रं 10 यज्ञः 11 मानसम्, पूर्वस्मिन् पूर्वस्मिन् साधनकथने पुत्रस्यापरितोषं ज्ञात्वा द्वादशं सन्यासरूपं साधनोत्तममाह । 'न्यास इत्याहुर्मनीषिणः' इत्यादिग्रन्थः सन्यासस्य स्तोत्ररूपः । मनुः— 'मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुद्धति । रजसा स्त्री मनोदुष्टा सन्यासेन द्विजोत्तमः ॥ यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् । तस्य तेजोमया लोकाः भवन्ति ब्रह्मवादिनः ॥' इति ॥

अस्मिन्नाश्रमे ब्राह्मणस्यैवाधिकारः । 'आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहात् । एष वोऽभिहितो धर्मः ब्राह्मणस्य चतुर्विधः ॥ इति । उपक्रमोपसंहाराभ्यां मनुना ब्राह्मणस्यैवाधिकारप्रतिपादनात् । 'ब्राह्मणाः प्रव्रजन्ती'ति श्रुतेश्च अग्रजन्मन एवाधिकारः न द्विजातिमात्रस्य । संवर्तः 'चतुर्विधा भिक्षवस्तु कुटीचकबहूदकौ । हंसः परमहंसश्च यो यः पश्चात् स उत्तमः ॥ आतुराणां च सन्यासे न विधिर्नैव च क्रिया । प्रैषमात्रं समुच्चार्य सन्यासं तत्र पूरयेत् ॥ इत्यादिश्रुतिस्मृतिभ्यः स्वशक्त्यनुसारेण मनसा वाचा वा प्रैषमन्त्रोच्चारणादि कुर्वीत । यद्यपि कलियुगे निषिद्धः सन्यासः पराशरमाधवीये 'ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा । कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥' कमण्डलुः—सन्यासः । तथापि आतुर-सन्यासस्य निषेधः इति शास्त्रसिद्धान्तः । तस्मात् मुमुक्षुभिः ब्राह्मणैः सर्वैरपि आतुरसन्यासः कर्तव्यः । अत एव विवेकचूडामणौ भगवत्पादाः —

'जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता तस्माद्वैदिकधर्ममार्ग-

निरता विद्वत्त्वमस्मात्परम् । आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिः मुक्तिर्नो शतकोटिजन्मसु कृतैः पुण्यैर्विना लभ्यते ॥ २ ॥ लब्ध्वा कथञ्चिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् । यस्त्वात्ममुक्तौ न यतेत मूढधीः स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात् ॥' इति ॥

एतादृशात्युत्तमोत्तमसन्न्यासं सन्न्यासिधर्मांश्च प्रबोधयदिदं ग्रन्थरत्नं 'यतिधर्मप्रबोधाख्यं' तिरुनेल्वेलिपत्तने सुब्बुस्वाम्यार्यगृहे ग्रन्थलिप्यां मुद्रितं लब्ध्वा दृष्ट्वा च, इदं ग्रन्थरत्नं सुवर्णवत् रत्नवत् सिद्धौषधवत् संपादनीयं द्रष्टव्यं ब्रह्मलोकसुखं प्राप्तव्यं चेति मत्वा सर्वब्राह्मणपण्डितजनोपकाराय देवनागरीलिप्यां इदानीमेव श्रीरङ्गस्थे श्रीवाणीविलासमुद्रणालये मुद्रयित्वा प्रकाशितं श्रीमच्चिदम्बरनटराजराजकृपया विजयतेतमाम् । मुद्रणप्रकाशने सहयोगं सप्रेम कृतवद्भ्यः पण्डित व्याकरणशिरोमणि वेदान्तविद्वान् ब्रह्मश्रीयुत K. S. वेङ्कटरामशास्त्रिभ्यः, मुद्रणालयाध्यक्षेभ्यः ब्रह्मश्री V. कोदण्डरामार्येभ्यः च सर्वसौभाग्यसमृद्धिः भूयादिति आशास्महे ॥

श्रीदिव्यनटेशश्शरणम् ॥

विरोधिकृत् वृषभ, २२<br>
*6—6—1971*

शास्त्राचार्य पण्डित राजा-सोमशेखरदीक्षितः,<br>
चिदम्बरश्रीनटराजदेवालयनिर्वाहकः,<br>
सुहृत्सभास्थापकश्च ।<br>
नं, १००, दक्षिणरथवीथी, चिदम्बरम् ।

# முன்னுரை

கங்கா ஜலத்தை பரிசுத்தஞ் செய்பவரின் பொருட்டும் கேசமில்லாததால் ஸந்யாஸ வேஷம் அடைந்தவரான பரம சிவன் பொருட்டும் நமஸ்காரம் என்று ஸ்ரீருத்ரச்ருதி, கூறுகிறது. பரம சிவனுடைய சிரஸில் விழுந்த ஜலம் பரிசுத்த மென்றும் பரிசுத்தமான சிவனுடைய சிரஸில் கங்கை விழுந்தது—என்றும் ஸ்ரீராமாயண வசனம். நம்மால் பிரகாசஞ் செய்யப்பட்ட ஸ்ரீநடராஜ ஸஹஸ்ர நாம பாஷ்யத்தில் 60, 234 நாமாக்களிலும் இது ஸ்பஷ்டம். பரம வைராக்யசாலிகளான ஸந்யாஸிகளுக்கெல்லாம் மேன்மையாக விளங்கும் பரம சிவன் என்னுடைய அறிவில்லாமையை விலக்கட்டும் என்று மாளவிகாக்நிமித்ரம் என்ற நாடகத்தில் ஸ்ரீ காளிதாஸர் ஸ்துதிக்கின்றார், தைத்திரீயாரண்யகம், பத்தாவது ப்ரச்நம்-62-வது அனுவாகத்தில்-ஜாபாலாத்யுபநிஷத்துகளில் சொல்லியபடி அக்நி ஹோத்ரம் முதலிய கர்மாக்களை விடுதல் ஸந்யாஸம் அதுவே மோக்ஷத்திற்கு முதல் காரணம் என்று பிர்மா ஹிரண்யகர்பர் நினைக்கிறார். இந்தக் கருத்து ச்வேதாச்வதரோபநிஷத்திலும் ஸ்பஷ்டம், 63-வது அனுவாகத்தில் ஸந்யாஸத்தின் உயர்வை விளக்குகிறார். ஆருணி என்ற பிரம்ம புத்திரர் பிரம்மதேவரிடம் உயர்ந்த மோக்ஷ உபாயத்தை கேட்கிறார். அதற்கு பதில் 1 ஸத்யம் 2 தபஸ் 3 தமம் 4 சமம் 5 தானம் 6 தர்மம் 7 ப்ரஜநம் 8 அக்நிகள் 9 அக்நி ஹோத்ரம் 10 யாகம் 11 மானஸம்—என்ற பதினொன்றுகளையும் முந்தி சொல்லியதில் திருப்தியடையாத புத்ரனின் பொருட்டு பன்னிரெண்டாவதாக ஸந்யாஸத்தை விளக்கிக் கூறினார். மனுஸ்மிருதியில் மனுவும் கூறுகிறார். மண்ணாலும் ஜலத்தாலும் அசுத்தமான பதார்த்தங்கள் சுத்தமாகின்றன. நதி பிரவாஹத்தால் சுத்தியடைகிறது. ரஜோதர்சனத்தால் ஸ்திரீகள் சுத்தமாகிறார்கள். உயர்ந்த பிராமணன் ஸந்யாஸத்தால் சுத்தமாகிறான்.

பிராமணர்களுக்கு மட்டுமே ஸந்யாஸத்தில் அதிகாரம்—அக்நியை ஆத்ம ஸமாரோபணஞ் செய்து கொண்டு ஸந்யாஸாச்ரமத்தை அடைகிறார்கள் பிராமணர்கள் என்று வேதங் கூறுகிறது—பிராமணர்களுக்கு மட்டுமே குடீசகன், பஹூதகன், ஹம்ஸன், பரமஹம்ஸன் என்ற நான்குவிதமான ஸந்யாஸங்களும் உள்ளன என்று ஸம்வர்த்தமஹரிஷி கூறுகின்றார். மரண காலத்தில் செய்துகொள்ளும் ஸந்யாஸம் ஆதுரஸந்யாஸம் அதில் ஒரு விதியையும் அபேக்ஷியாமல் ப்ரைஷ மந்திரத்தை மட்டும் மனஸாலோ வாக்காலோ சொல்லி பூர்த்திசெய்து கொள்ளலாம் என்று சாஸ்திரம். ஆதுரஸந்யாஸத்துக்கு மட்டும் கலியுகத்தில் நிஷேதமில்லை. சங்கரபகவத்பாதர்களும் விவேகசூடாமணியில் உபதேசிக்கிறார்கள். ப்ராணிகளுக்கு மனுஷ்ய ஜன்ம துர்லபம் அதிலும் புருஷஜன்ம துர்லபம், அதிலும் பிராமணஜன்ம துர்லபம் அதிலும் வைதிக மார்க்கத்தில் ஈடுபடுவது துர்லபம். அதிலும் பண்டிதனாயிருப்பது துர்லபம் அதிலும், ஸந்யாஸம் துர்லபம், எவன் பிராமணனாய் பிறந்தும் வித்வானாக இருந்தும் ஸந்யாஸஞ் செய்துகொள்ளவில்லையோ, அவன் ஆத்மஹத்தி செய்கிறவன் என்று உபதேசிக்கிறார் இத்தகைய மஹிமை வாய்ந்த ஸந்யாஸத்தையும், அதன் பிரிவுகளையும், அதன் நியமங்களையும், ஸன்யாஸிகளின் தர்மங்களையும், ஸன்யாஸிகளின் ஸம்ஸ்காரங்களையும், ஆராதனங்களையும் நன்கு விளக்கி கூறும் இந்த யதிதர்மப்ரபோதம் என்ற க்ரந்த ரத்னத்தை தங்கம்போலவும், ரத்னம்போலவும், ஸித்தௌஷதம் போலவும் அடையவேண்டும், பார்க்கவேண்டும், ப்ரம்மலோக ஸுகத்தை அடையவேண்டும் என்று எண்ணி எல்லா ப்ராம்மண பண்டிதர்களின் உபகாரத்தின் பொருட்டு இப்புத்தகம் 1881-ல் திருநெல்வேலி அக்ரஹாரத்தில் ஸ்ரீ முத்தையரால் க்ரந்த லிபியில் அச்சிடப்பட்டதை இப்பொழுது தேவநாகரி லிபியில் ஸ்ரீரங்கம் ஸ்ரீ வாணீ விலாஸ அச்சகத்தில் அச்சிட்டு வெளியிடப்படுகிறது. ஸ்ரீ நடராஜர்

கிருபையால் இந்நூல் விளங்குக. இப்புத்தகம் நல்ல முறையில்வெளிவர உதவிய வியாகரண சிரோமணி வேதாந்த வித்வான் ஸ்ரீரங்கம் ப்ரம்மஸ்ரீ K. S. வெங்கடராம சாஸ்திரிகள் அவர்களுக்கும் அச்சக மானேஜிங் டைரக்டர் ஸ்ரீ V. கோதண்டராமய்யர் அவர்களுக்கும் ஸ்ரீ நடராஜர் கிருபையால் ஸர்வஸௌபாக்யமுண்டாக ஆசீர்வதிக்கின்றோம்.

எல்லாம் ஸ்ரீ நடராஜர் கிருபை.

100, தெற்கு வீதி,
சிதம்பரம்.

சாஸ்த்ராசார்ய, பண்டிதராஜ
ராஜா ஸோமசேகர தீக்ஷிதர்,
(ஸஹ்ருத்ஸபா ஸ்தாபகர்,
ஸ்ரீ நடராஜர் கோயில் டிரஸ்டி)

விரோதிக்ருத்-ஞு ஆனி-மீ 16உ (30—6—71) புதன்கிழமை
ஸ்ரீ நடராஜமூர்த்தியின் உத்தரத் திருமஞ்ஜன தர்சன
மஹோத்ஸவ புண்யதினத்தில் வெளியிடப்பட்டது.

## यतिधर्मप्रबोधे

# ॥ प्रकरणचन्द्रिका ॥

## ॥ प्रथमांशः ॥


| क्र-सं | विषयाः | पृ-सं |
|---|---|---|
| 1 | मङ्गलम् | 1 |
| 2 | उपोद्घातप्रकरणम् | 3 |
| 3 | परीक्षा | 4 |
| 4 | अधिकृतिः | ,, |
| 5 | मध्यमाधिकारिनिरूपणम् | 5 |
| 6 | अधमाधिकारिनिरूपणम् | 5 |
| 7 | अनधिकारिनिरूपणम् | 6 |
| 8 | क्रमसन्यासे कालविशेषः | 7 |
| 9 | अष्टश्राद्धदेवाः | 7 |
| 10 | आतुरविषयः | 8 |
| 11 | प्रैषविधानम् | 9 |
| 12 | क्रमसन्यासे विशेषः | ,, |
| 13 | दण्डग्रहणविधिः | 10 |
| 14 | प्रत्यहं दण्डधारणमन्त्रः | 10 |
| 15 | कुटीचकलक्षणम् | 11 |
| 16 | बहूदकलक्षणम् | 12 |
| 17 | हंसलक्षणम् | ,, |
| 18 | परमहंसलक्षणम | ,, |
| 19 | साधारणधर्माः | 13 |
| 20 | गुरूपसदनादि | ,, |
| 21 | महावाक्यार्थनिरूपणम् | 14 |
| 22 | शुकस्य स्वानुभव-निरूपणम् | 15 |
| 23 | तारकयोगः | 16 |
| 24 | लयसाधनयोगः | 17 |
| 25 | सगुणध्यानम् | 18 |


## ॥ द्वितीयांशः ॥


| क्र-सं | विषयाः | पृ-सं |
|---|---|---|
| 26 | मूलगुरुविचारः | 18 |
| 27 | नित्याचारः | ,, |
| 28 | शौचम् | 19 |
| 29 | आचमनविधिः | 20 |
| 30 | दन्तधावनम् | ,, |
| 31 | स्नानविधिः | 21 |
| 32 | प्रक्षेपः | 22 |
| 33 | विभूतिः | 22 |
| 34 | रुद्राक्षधारणम् | 23 |
| 35 | जलानुष्ठानम् | ,, |
| 36 | स्थलानुष्ठानम् | ,, |
| 37 | संगवसमयानुष्ठानक्रिया | 24 |
| 38 | श्रवणानन्तरकृत्यम् | 25 |
| 39 | ईश्वरसमर्चनम् | 26 |

| क्र-सं | विषयाः | पृ-सं | क्र-सं | विषयाः | पृ-सं |
|---|---|---|---|---|---|
| 40 | माध्याह्निकम् | 26 | 46 | वैराग्यबोधः | 30 |
| 41 | भिक्षानुज्ञा | ,, | 47 | निषिद्धानि | 31 |
| 42 | भोजनविधिः | 27 | 48 | गुरुपरिचर्या | 32 |
| 43 | वैराग्यम् | 28 | 49 | मननप्रकारः | 34 |
| 44 | मुनीनां वृत्तिः | 29 | 50 | विवेकः | 36 |
| 45 | विविदिषुधर्माः | ,, | 51 | क्षौरविधिः | 39 |

॥ तृतीयांशः ॥

| क्र-सं | विषयाः | पृ-सं | क्र-सं | विषयाः | पृ-सं |
|---|---|---|---|---|---|
| 52 | गुरुपूजा | 41 | 68 | आशौचसंसर्गविषयः | 59 |
| 53 | गुरुविन्यासक्रमः | 42 | 69 | प्रतिमासाराधनम् | 60 |
| 54 | महागुरुप्रार्थना | 43 | 70 | विभक्तपुत्राणां मासिक श्राद्धाराधनम् | 61 |
| 55 | यतिप्रश्नः | ,, | 71 | यतिविदेशमरणविषयः | ,, |
| 56 | गृहिणां विज्ञप्तिः | ,, | 72 | बलिविधिः | 63 |
| 57 | यतिप्रणामविधिः | 44 | 73 | माहेश्वरबलिः | ,, |
| 58 | प्रथमभिक्षा | ,, | 74 | ब्रह्मचारिसंस्कृतिः | 64 |
| 59 | प्रायश्चित्तम् | ,, | 75 | पार्वणम् | 65 |
| 60 | नामजपतो निष्कृतिः | 47 | 76 | श्राद्धे भोजनीयाः | 65 |
| 61 | नानाप्रायश्चित्तानि | 47 | 77 | दैवश्राद्धक्रमः | 66 |
| 62 | उत्क्रमकार्यम् | 52 | 78 | पार्वणश्राद्धम् | ,, |
| 63 | मृतिसूचनम् | ,, | 79 | आराधनम् | 67 |
| 64 | उत्तरक्रियाविचारः | 54 | 80 | मासाराधनम् | ,, |
| 65 | शिष्यकर्तव्यता | 55 | 81 | प्रार्थना | 68 |
| 66 | तर्पणमन्त्रः | 58 | 82 | யதிஸம்ஸ்கார சுருக்கம் | |
| 67 | देशान्तरे यतिमरणे कृत्यविचारः | ,, | 83 | यतिधर्मप्रबोधविवरणम् | 71 |


—×—



॥ श्रीगुरुभ्यो नमः ॥

॥ श्रीरस्तु ॥

॥ श्रीचित्सभेशाय मङ्गलम् ॥

# ॥ यतिधर्मप्रबोधः ॥

( श्रीनीलकण्ठयतीन्द्रप्रणीतः )

## अथ प्रथमांशः ॥

वाहिनीपरिलसत्सुमस्तकं लालनीयनिगमान्तविश्रुतम् ।
कामिनीकवलितार्धविग्रहं यामिनीरमणचूडमाश्रये ॥ १ ॥

சிரஸில் கங்கையை வஹிப்பவரும், வேதங்களால் புகழப்படுபவரும், தன் பாதி உடலில் பார்வதியை உடையவரும், சந்திரனை தலையில் அணியாகக்கொண்டவருமான பரமசிவனை ஸேவிக்கிறேன்.

विश्वेशं माधवं ढुण्डिं दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥ २ ॥

நூலாசிரியர் காசிவாசியானதால் காசியில் உள்ள தேவதைகளை வணங்குகிறார். ஸ்ரீ விச்வநாதரையும், பிந்துமாதவரையும், தண்டத்தை கையில் வைத்துள்ள டுண்டி விநாயகரையும், க்ஷேத்ர பாலகரையும், காசீபுரியையும், தேவர்களால் ஸேவிக்கப்படும் குஹா என்னும் ஸ்தான

விசேஷத்தையும், கங்காதேவியையும் ஸ்ரீவிசாலாக்ஷியையும் ஸ்ரீவிச்வநாதரின் ஸன்னிதியில் உள்ள மணிகர்ணிகா என்னும் தீர்த்தத்தையும் வணங்குகிறேன் என்பது ஸ்தூல தாத்பர்யம்.

ஸகல ஜகத்கர்த்தாவும், காமாதி சத்ருக்களை வென்ற வரும், எங்கும் நிறைந்தவரும், யமனை அடக்கியவரும், ப்ரளய காலத்தில் ஸர்வலோக நாசம் செய்வதால் பயங்கர மானவராயும் உள்ள பரமசிவனையும் ஸம்ஸார நாசத்தைச் செய்பவளும், ஹ்ருதய குஹையில் த்யானம் செய்யத்தகுந்த வளும், தஹராகாசத்தில் வஸிப்பவளும், பிரகாசிப்பவளும், ரத்னமயமான தாடங்கத்தை காதில் அணியாகக்கொண்ட வளுமான பார்வதீ தேவியையும் வணங்குகிறேன். என்பது முக்ய தாத்பர்யம்.

श्रीकान्तमुख्यसुरदेशिकदेशिकेन्द्रं
वाणीपतेः सकरुणं वचनं निशम्य ।
दिष्ट्यावतीर्णमवनौ कलिकल्मषघ्नं
श्रीशङ्करार्यमखिलात्मगुरुं नमामि ॥ ३ ॥

ப்ரஹ்மதேவரின் வேண்டுகோளுக்கு இணங்கி பூமியில் கலிதோஷத்தால் பீடிக்கப்பட்ட மக்களை உய்விக்க அவதரித் தவர்களும், விஷ்ணுமுதலிய தேவர்களுக்கு குருவாக விளங்கும் ப்ருஹஸ்பதி பகவானுக்கும் ஆசார்யராக விளங்குபவர்களும், எல்லா உலகங்களுக்கும் ஆசார்யாளு மான ஸ்ரீமத் ஆதிசங்கரபகவத்பாதாசார்யாளை வணங்கு கிறேன்.

श्रीकाशिकानगरमध्यगवेङ्कटेश
दिव्यालये निवसतः करुणार्णवस्य ।
श्रीशङ्करेन्द्रयमिनः चरणाब्जसेवी
श्रीनीलकण्ठयतिरात्मगुरुं प्रणौमि ॥ ४ ॥

இந்நூலாசிரியரான ஸ்ரீநீலகண்டயதீந்திரர் தனது குருவான, ஸ்ரீகாசிநகரின் நடுவில் அமைந்துள்ள ஸ்ரீவெங்கடேசாலயத்தில் வஸித்த கருணை உள்ளம் படைத்த ஸ்ரீசங்கரேந்திரயதீந்திரர்களை வணங்குகிறார்.

## ॥ उपोद्घातप्रकरणम् ॥

### நூலின் முகவுரை

यत्र वैदिकमर्यादा विद्योपबृंहणान्विता ।
समूला सुखबोधा सा यतिसेव्या नहीतरैः ॥ ५ ॥

यतिधर्मप्रबोधोऽयं मया ग्रन्थो विरच्यते ।
नीलकण्ठयतीन्द्रेण विश्वेश्वरकृपाबलात् ॥ ६ ॥

यो महापुरुषार्थेच्छुः यो महादेवभावनः ।
महावैराग्यलिङ्गं च धत्ते स पुरुषोत्तमः ॥ ७ ॥

शिवेन कथितं भिक्षुलक्षणादि पुरा किल ।
अत्रियोगिसमुत्थाय त्रिणेत्रांशाय योगिने ॥ ८ ॥

तदद्य संग्रहेणाहं ब्रुवे गुरुपरायणः ।
सर्वश्रुत्यनुसारेण सुश्रोतसुखदं बुधाः ॥ ९ ॥

सन्यासोऽयं शिवोक्तत्वात् शैव इत्यभिधीयते ।
वेदान्तशतमूलत्वात् वैदिकः श्रौत इत्यपि ॥ १० ॥

விச்வநாதரின் க்ருபையால் நீலகண்டயதீந்திரரால் யதிகளின் தர்மங்களை விளக்கும் நூலானது செய்யப்படுகிறது. இது வேதமார்கத்தை அனுஸரித்தது, ஸ்ம்ருதி புராணங்களுக்கு விரோதமற்றது. வேதத்தை அடிப்படையாகக்கொண்டது. எளியநடையில் அமைந்தது

ஸன்யாஸிக்கு மிகப் பயனளிக்கவல்லது. மோக்ஷத்தை விரும்புபவனும், உறுதியான சாம்பசிவத்யானமுள்ளவனும், சிறந்த வைராக்யமுள்ளவனும் இந்நூலைப் பயில முக்யாதிகாரியாவான். முன்னொருஸமயம் அத்திரியின் குமாரரும் பரமசிவனின் அம்சபூதருமான ஸ்ரீதுர்வாஸமுனிவருக்கு சிவன் எந்த ஸன்யாஸலக்ஷணங்களைக்கூறினரோ, அதை சுருக்கமாக கூறுகிறேன். சிவனால் கூறப்பட்டதால் சைவம் என்றும், வேதாந்தத்தை ஆடிப்படையாகக் கொண்டதால் வைதிகம் என்றும் ஸன்யாஸம் கூறப்படுகிறது.

## ॥ परीक्षा ॥

### சோதனை

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो विरतिं भजेत् ।
कृतेन कर्मणा मोक्षस्त्वकृतो न हि संभवेत् ॥ ११ ॥

ஜன்மாந்தரகர்மவிசேஷத்தால் அடையப்பட்ட ஸாகதுக்கங்களையும், புத்ரமித்ராதிவர்க்கங்களையும் நச்வரமாகக் கண்டு வைராக்யத்தை அடையவேண்டும். அக்னிஹோத்ராதி கர்மங்களால் மட்டும் மோக்ஷம் கிட்டாது. கர்மாக்களால் சித்தசுத்திபெற்று வைராக்யத்தை அடைந்து சாஸ்த்ராசார்ய உபதேசத்தால் வேதாந்த ஞானத்தை அடைந்து மோக்ஷமடைய முயலவேண்டும்.

## ॥ अधिकृतिः ॥

### தகுதி

अथाधिकारं संन्यासे वक्ष्ये श्रुतिविधानतः ।
तथाऽनधिकृतिं चापि तच्छेदस्य लक्षणम् ॥ १२ ॥

उत्तमः सर्वविद्यानां पारगो विदुषां वरः ।
सर्वेन्द्रियेषूपरतो नित्यानित्यार्थकोविदः ॥ १३ ॥

वयसा चैव सप्तत्या पौरुष्क पारदर्शनः ।
एषणात्रयनिर्मुक्तः सन्यासेषूत्तमोत्तमः ॥ १४ ॥

ஸன்யாஸம் ஏற்கும் தகுதியைக் கூறுகிறார். எல்லாக் கலைகளையும் கற்றுத்தேர்ந்தவனும், புலனடக்கமுள்ளவனும், பொருள்களின் அழிவுத் தன்மையும் உறுதித் தன்மையும் அறிந்தவனும், எழுபது வயதுள்ளவனும், பேடிமையுடைய வனும், சாஸ்த்ரங்களின் கரைகண்டவனும், புத்ரேஷணை வித்தேஷணை, லோகேஷணை என்னும் மூன்று ஏஷணை களிலிருந்து விடுபட்டவனுமான புருஷன் ஸன்யாசத்திற்கு சிறந்த அதிகாரியாவான்.

## ॥ मध्यमाधिकारिनिरूपणम् ॥

रोगाक्रान्तः सदापन्नः प्राणसंशयवानपि ।
अतृप्तः सर्वकामेभ्यः वयसा चैव मध्यमः ॥ १५ ॥

किञ्चिच्छास्त्रार्थतत्वज्ञः सन्यासे मध्यमो भवेत् ।

பிணியால் பீடிக்கப்பட்டவன், எப்பொழுதும் கஷ்டப் படுபவன், உயிருக்கு மன்றுடுபவன், ஸுகபோகங்களில் த்ருப்தியடையாதவன், நடுவயதையுடையவன், அறை குறை சாஸ்த்ராப்யாஸமுள்ளவனுமான புருஷன் மத்யமாதி காரியாவான்.

## ॥ अधमाधिकारिनिरूपणम् ॥

अधमोपद्रुतो बालः युवा च क्रोधनश्शठः ॥ १६ ॥

पुत्रमित्रकलत्रादिविवादे धनधान्ययोः ।

लोकापवादचौर्यादिभूपैरन्यैरुपद्रुतः ॥ १७ ॥

रोगैश्च ऋणतो वापि सन्यस्तोऽप्यधमो भवेत् ।

தீயவழிகளில் நாட்டம் கொண்டவனும், இளம் வயது உடையவனும், கோபமுடையவனும், துஷ்டனும், புத்ரன், நண்பன், மனைவி இவர்களுடைய பணம், தான்யம் ஸம்பந்தமான சண்டையில் ஈடுபட்டவன், உலக மக்களின் பழிக்கு ஆளானவன், திருடு முதலான பஞ்சமாபாதகங்கள் புரிந்தவன், அரசராலும் மக்களாலும் தண்டிக்கப்பட்டவன், பிணியாலும், கடனாலும் துன்பப்படுபவன் ஸன்யாஸம் எடுத்துக்கொள்வதில் அதமாதிகாரியாவான்.

## ॥ अनधिकारिनिरूपणम् ॥

षण्डोऽथ विकलोऽप्यन्धः बालकश्चापि वातरुक् ॥ १८ ॥

पतितश्च परद्वारि वैखानसहरद्विजौ ।

चक्री लिङ्गी च पाषण्डी शिपिविष्टोऽप्यनग्निकः ॥ १९ ॥

द्वित्रिवारेण सन्यस्तः भृतकाध्यापकोऽपि वा ।

एते नार्हन्ति सन्यासमातुरेण विना क्रमम् ॥ २० ॥

பேடி, குறைந்த உறுப்பு உடையவன், சாஸ்த்ர அறிவு அற்றவன், கண்ணில்லாதவன், இளம் வயதுடையவன், வாதரோகமுள்ளவன், பதிதன், பிறர் மனையில் வேலை செய்பவன், வையதீக்ஷை பெற்றவன், தந்திர சாஸ்திரத்தை அனுஷ்டிப்பவன், பாஞ்சராத்ர கர்மானுஷ்டானமுள்ளவன், லிங்கதாரி, வைதிக மார்கத்தை இகழ்பவன். மாட்டுத்தரகு வியாபாரத்தில் ஈடுபட்டவன், அக்னி உபாஸனம் செய்யாதவன், சிலகாலம் ஸன்யாஸ தர்மானுஷ்டானம் செய்து இரண்டு மூன்று தடவை விட்டவன், சம்பளம்பெற்று வேதம் கற்பிப்பவன், இவர்கள் க்ரமஸன்யாஸத்தில் தகுதியற்றவர்

கள், தகுதியற்றவனும் ப்ரைஷமந்த்ரோச்சாரணமாத்ரத்தர் லேயே ஸர்வபாபங்களும் போவதாக சாஸ்த்ரம் கூறுவதால் ஆபத்ஸன்யாஸத்தில் தகுதி பெறுவான்.

## ॥ क्रमसन्यासे कालविशेषः ॥

उत्तरायणकाले च शुक्लपक्षे तिथौ पुनः ।
रिक्तायां चामले मासि कृतमाध्यन्दिनक्रियः ॥ २१ ॥

सन्यासार्थं सुसंकल्प्य चतुःकृच्छ्रं समाचरेत् ।
साक्षात्कृच्छ्रप्रकरणाशक्तौ स्वानुगुणं चरेत् ॥ २२ ॥

உத்தராயணத்தில் 2 பூர்ணிமை, 2 அமாவாஸை இல்லாத சுபமாஸத்தில், வளர்பிறையில், சதுர்த்தி, நவமி, சதுர்தசீ திதியில் மாத்யாஹ்னிகம் செய்துவிட்டு ஸந்யாசம் ஏற்றுக்கொள்ளுவதற்கு ஸங்கல்பம் செய்துவிட்டு நான்கு க்ருச்ரங்கள் செய்யவேண்டும். செய்ய இயலாவிடில் தனக்குத் தக்கவாறு தானம் செய்யவேண்டும். (பிறகு வைச்வ தேவத்தின் முடிவில் ச்ராத்த தேவதைகளுக்கு தர்பணம் செய்யவேண்டும். பிறகு எள்ளு இல்லாமல் அக்ஷதையை வைத்துக்கொண்டு தேவ, ரிஷி, திவ்ய, மனுஷ்ய, பூத, பித்ரு, மாத்ரு, ஆத்ம, ச்ராத்தம் எட்டையும் ஸங்கல்ப முறையில் செய்யவேண்டும்.)

## ॥ अष्टश्राद्धदेवाः ॥

ब्रह्मविष्णुमहेशांश्च देवब्रह्मर्षिकानपि ।
क्षत्रर्षीन्वसुरुद्रादित्यांश्चापि सनकादिकान् ॥ २३ ॥

भूतानि चेन्द्रियाण्येव भूतग्रामं पितॄनपि ।

मातृवर्गात्मवर्गौ च तर्पयेच्छ्रुतिशासनात् ॥ २४ ॥

भाविकर्मसमृद्ध्यर्थं सप्तकेशान्विनाऽखिलम् ।
वापयित्वा पुनः स्नात्वा दद्याद्ब्रह्माञ्जलिं ततः ॥ २५ ॥

सायाह्नेऽग्निं प्रतिष्ठाप्य कुर्याच्छास्त्रोपसंहृतिम् ।
हुत्वाऽन्येनाहुतीरात्ममन्त्रैस्तच्छेषकं पिबेत् ॥ २६ ॥

अथाग्न्युत्तरतः कृष्णाजिने स्थित्वाप्युदङ्मुखः ।
आत्मबोधपुराणानि शृणुयाज्जागरन्निशि ॥ २७ ॥

अथोषस्समये स्नानाद्यखिलं स्वविधानतः ।
पुंसूक्तविरजामन्त्रैश्चरुणा सर्पिषापि च ॥ २८ ॥

हुत्वोपस्थाय सम्मेति चाजिघ्रेद्यात इत्यपि ।
आहिताग्निरथाग्नेयीं पश्चात्त्रैधातवीमपि ॥ २९ ॥

इष्टिं कुर्यात्पूर्णमासतन्त्रेणान्यच्च वर्जयेत् ।

## ॥ अथातुरविषयः ॥

अथातुरस्य सन्यासे त्वाग्नेयस्नानतश्शुचिः ॥ ३० ॥

औपासनाग्निमाजिघ्रेदाहिताग्निः स्वकेऽनले ।
हुत्वा पूर्णाहुतिं चाग्नेरात्मारोपो विधीयते ॥ ३१ ॥

उत्सृष्टानुगताग्नीनां विधुरब्रह्मचारिवत् ।
नामेरात्मसमारोपः होम एवाभिधीयते ॥ ३२ ॥

## अथ प्रैषविधानम् ॥

सुशीलान् पञ्चषान् ब्रह्मविदो नत्वाऽभ्यनुज्ञया ।
व्याहृतीभिस्सताराभिः प्रैषमन्त्रं स्वयं वदेत् ॥ ३३ ॥

सर्वसंकोचतोऽत्यापद्विषयेऽपि यथार्हतः ।
एकाकी मनसा वापि पुनस्सन्यस्तुमर्हति ॥ ३४ ॥

विवरणम्—ओं भूः सन्यस्तं मया, ओं भुवः सन्यस्तं मया, ओं सुवः सन्यस्तं मया ओं भूर्भुवस्सुवः सन्यस्तं मया, इति चतुर्धा त्रिधा वा मन्द्रमध्यमतारध्वनिभिः स्वयमुच्चरेत् । अङ्गिराश्च—आतुराणान्तु सन्यासे न विधि. नैव च क्रिया । प्रैषमन्त्रं समुच्चार्य सन्यासं तत्र पूरयेदिति ॥

क्रमसन्यासे विशेषमाह—

व्याहृतीः प्रणवाङ्गेषु विलाप्य प्रार्थयेत्ततः ।
अर्हन्नृक्षस्य यश्छन्दो मन्त्राभ्यां प्रयतो मनुम् ॥ ३५ ॥

ओं भूः सन्यस्तमित्यादिप्रैषमन्त्रं क्रमोच्छ्रितम् ।
उक्त्वाऽभयं जलं प्राश्य शिखामुच्छिद्य सूत्रकम् ॥ ३६ ॥

उपवीतं बहिरिति क्षिपेद्व्याहृतिभिर्जले ।
कटिसूत्रमपि च्छित्वा जातरूपधरश्चरेत् ॥ ३७ ॥

विधिनैवं च सन्यस्तं द्विजं दृष्ट्वापि भास्करः ।
बिभेति पितरः तृप्ताः कुलं पावनमेव तत् ॥ ३८ ॥

अथवा दण्डवसनखण्डकुण्डीपरिग्रहः ।
कार्य आचार्यसूक्ततः स्ववैराग्यानुसारतः ॥ ३९ ॥

येऽन्ये मूर्खस्य लोकस्य महान्तः शुभतातयः ।
तेषां तु यानच्छत्रादि भवेल्लोकोपकारकम् ॥ ४० ॥

## ॥ दण्डग्रहणविधिः ॥

दण्डं तु वैणवं सौम्यं सत्वचं समपर्वकम् ।
नासादघ्नं शिरोदघ्नं भ्रुवोर्वा बिभृयाद्यतिः ॥ ४१ ॥

अंगुष्ठमात्रमस्थूलं मूलाग्रे हीनपर्वकम् ।
चतुष्षडष्टदशकसमपर्वयुतं भवेत् ॥ ४२ ॥

आद्यस्य पर्वणो मूलं चतुस्त्रिव्यङ्गुलात्मकम् ।
उत्तमं मध्यमं हीनं अग्रं तद्द्विगुणं भवेत् ॥ ४३ ॥

पर्वसंख्याविभेदेन तस्य नाम विकल्प्यते ।
दण्डस्य धारणं श्रौतं किमन्येनेति केचन ॥ ४४ ॥

गौर्यादिपदभेदेन दण्डमुद्रा च भिद्यते ।
स्वाचार्यमुद्रितं दण्डं गृह्णीयात्सकमण्डलुम् ॥ ४५ ॥

नागमुद्रा त्वधोधार्या धेनुमुद्राजमुद्रिका ।
शंखिनी च तृतीयांशे धार्या परशुमुद्रिका ॥ ४६ ॥

## ॥ प्रत्यहं दण्डधारणमन्त्रः ॥

यत इन्द्रस्य वज्रोसि हृद्वाकायाघनाशनः ।
सखा मे हितकृद्भूयाः हरिमुद्रे नमोऽस्तु ॥ ४७ ॥

दण्डात्मनोस्तु संयोगः सर्वदैव भविष्यति ।
न दण्डेन विना गच्छेदिषुक्षेपत्रयं बुधः ॥ ४८ ॥

नालम्बनं प्रकुर्वीत न वस्त्रादीनि लम्बयेत् ।
न कश्चित्प्रहरेत्तेन न भूमौ केवलं क्षिपेत् ॥ ४९ ॥

जलाम्बरादिषु क्षिप्तो न कश्चिद्दोषभाग्भवेत् ।
केवलं भूमिनिक्षिप्तदण्डेनाघं भवेद्ध्रुवम् ॥ ५० ॥

हस्तपादादिवच्छिष्यनीतो दण्डो न दुष्यते ।
दिनमात्रमदण्डश्चेत् प्राणायामं दशाचरेत् ॥ ५१ ॥

शूद्रस्पृष्टो लंघितो वाऽशुद्धेषु पतितोपि वा ।
मार्गे दैवाज्जलालाभे मलमूत्रकृता धृतः ॥ ५२ ॥

स्नात्वा सचेलदण्डोऽसौ विशुद्धो भवति ध्रुवम् ।
चातुर्मास्यान्तरे दण्डभंगेऽशुद्धेपि वा पुनः ॥ ५३ ॥

प्राणसंधारणं कुर्वन् सिक्थवर्जं ततः परम् ।
मन्त्रेण दण्डं गृह्णीयात् अन्यं संस्कृतमेव च ॥ ५४ ॥

ततो गुरुमुखाद्दार्वलाबुवैणवमृन्मयम् ।
जगज्जीवनमन्त्रेण कमण्डलुमुपाहरेत् ॥ ५५ ॥

## कुटीचकलक्षणमाह ॥

एवं कुटीचकादीनां विधिस्साधारणः स्मृतः ।
तथापीष्टशिखादण्डोपवीताद्येव भिद्यते ॥ ५६ ॥

शिखोपवीते गायत्रीपश्चार्णात्ममनूनपि ।
त्रिदण्डकुण्डीकन्थाश्च सूचीं धृत्वा खनित्रकम् ॥ ५७ ॥

दत्ताभयप्रदानं च सर्वत्रानादरः शुचिः ।
शिवकांक्षी जपन्मन्त्रान्वसेत्कुट्यां कुटीचकः ॥ ५८ ॥

दारादिनिःस्पृहः शान्तः प्रतिग्रहविवर्जितः ।
काम्यकर्मपरित्यागी विषयेष्वरतिः सदा ॥ ५९ ॥

कालत्रयेऽपि सावित्रीं सपवित्रः प्रसन्नहृत् ।
सार्थमावर्तयञ्शंभुं हृदि कुर्यादनन्यधीः ॥ ६० ॥

## बहूदकलक्षणम् ॥

बहूदकस्तु सन्न्यासी बन्धुपुत्रादिवर्जितः ।
सप्तागारं चरेद्भैक्षं एकान्नं परिवर्जयेत् ॥ ६१ ॥

शिखायज्ञोपवीती च देवताराधने रतः ।
सन्ध्याकालेषु सावित्री जपकर्म समाचरेत् ॥ ६२ ॥

सर्वाङ्गोद्धूलनं तिर्यक्त्रिपुण्ड्रं लिङ्गपूजनम् ।

## हंसलक्षणम् ॥

हंसः कमण्डलुं शिक्यं भिक्षापात्रं तथैव च ॥ ६३ ॥

कन्थां कौपीनमाच्छाद्यं अङ्गवस्त्रं बहिःपटम् ।
एकं तु वैणवं दण्डं धारयन्नित्यमादरात् ॥ ६४ ॥

त्रिपुण्ड्रोद्धूलनं कुर्वन् शिवलिङ्गं समर्चयेत् ।
अष्टग्रासं सकृन्नित्यं अश्नीयात्सशिखं वपेत् ॥ ६५ ॥

सावित्रीमात्रसंपन्नो जपेदध्यात्मचिन्तकः ।

## परमहंसलक्षणम् ॥

परहंसस्त्रिदण्डादि नित्यकर्म च संत्यजेत् ॥ ६६ ॥

कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिकाम् ।
योगपट्टं चाक्षमालां वैणवं दण्डमव्रणम् ॥ ६७ ॥

धारयेदग्निरित्यादिमन्त्रैरुद्धूलनं मुदा ।
ओमित्येवं तु त्रिः प्रोच्य सहंसेन त्रिपुण्ड्रकम् ॥ ६८ ॥

ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत्सदा यतिः ।
अर्चयेद्यद्यशक्तस्तु बाणलिङ्गादि वा बहिः ॥ ६९ ॥

माधूकरं तथैकान्नं परहंसः समाचरेत् ।
अभिशस्तं समुत्सृज्य सार्ववर्णिकमाचरेत् ॥ ७० ॥

उत्तरोत्तरालाभे तु पूर्वं पूर्वं परित्यजेत् ।
गुरुशुश्रूषया नित्यं वेदान्तज्ञानमभ्यसेत् ॥ ७१ ॥

## साधारणधर्माः ॥

स्नानं शौचं शिवध्यानं मिथ्याभाषणवर्जनम् ।
कामक्रोधं च पैशून्यहर्षामर्षविवर्जनम् ॥ ७२ ॥

उद्धूलनं त्रिपुण्ड्राक्षधारणं लिङ्गपूजनम् ।
चातुर्मास्यं च सर्वेषां वदन्ति ब्रह्मवादिनः ॥ ७३ ॥

## गुरूपसदनादि ॥

अधीहि भगवन् ब्रह्मेत्याचार्यं प्रार्थयेच्चिरात् ।
सोऽपि तारमहावाक्याद्युपदिश्यानुपालयेत् ॥ ७४ ॥

विलोक्य पाकं शिष्यस्य प्रणवं सार्थकं तथा ।
महावाक्यं चतुर्वेद मध्यगं मणिसन्निभम् ॥ ७५ ॥

यो वेदादौ स्वरः प्रोक्तः वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ ७६ ॥

षडक्षरं योगपट्टं बाणलिङ्गं तथाख्यया ।
गुरुर्दद्यात् ससूत्रादि सानुष्ठानं यथोचितम् ॥ ७७ ॥

श्रीशुक उवाच—

देवादिदेव सर्वज्ञ सच्चिदानन्दलक्षण ।
उमारमण भूतेश प्रसीद करुणानिधे ॥ ७८ ॥

उपदिष्टं परं ब्रह्म प्रणवान्तर्गतं रहः ।
तत्वमस्यादिवाक्यानां प्रज्ञादीनां विशेषतः ॥ ७९ ॥

श्रोतुमिच्छामि तत्वेन षडङ्गं च यथाक्रमम् ।
चतुर्णामपि वेदानां यथोपनिषदः शिरः ॥ ८० ॥

श्रीसदाशिव उवाच —

इयं रहस्योपनिषत् तथोपनिषदां शिरः ।

प्रथमस्य महावाक्यस्यार्थमाह (प्रज्ञानं ब्रह्म) —

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ॥ ८१ ॥
स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितम् ।
चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ॥ ८२ ॥
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ।

द्वितीयस्यार्थमाह (अहं ब्रह्मास्मि) —

परिपूर्णः परात्माऽस्मिन्देहे विद्याधिकारिणि ॥ ८३ ॥
बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ।
स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः ॥ ८४ ॥
अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम् ।

तृतीयस्यार्थमाह (तत्त्वमसि) —

एकमेवाद्वितीयं सन्नामरूपविवर्जितम् ॥ ८५ ॥
सृष्टेः पुराधुनाऽप्यस्य तादृक्त्वं तदितीर्यते ।
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् ॥ ८६ ॥
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम् । इति ॥

चतुर्थस्यार्थमाह (अयमात्मा ब्रह्म) —

स्वप्रकाशापरोक्षत्वं अयमित्युक्तितो मतम् ॥ ८७ ॥
अहंकारादिदेहान्तत्प्रत्यगात्मेति गीयते ।
दृश्यमानस्य सर्वस्य जगतः तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥ ८८ ॥ इति ॥

अथ शुकः स्वानुभवं विवृणोति —

अनात्मदृष्टेरविवेकनिद्रां अहं मम स्वप्नगतिं गतोऽहम् ।
स्वरूपसूर्येऽभ्युदिते स्फुटोक्तेर्गुरोर्महावाक्यपदैः प्रबुद्धः ॥८९॥

वाच्यं लक्ष्यमिति द्विधार्थसरणी वाच्यस्य हि त्वंपदे
वाच्यं भौतिकमिन्द्रियादिरपि यल्लक्ष्यं त्वमर्थश्च सः ।
वाच्यं तत्पदमीशताकृतमतिः लक्ष्यं तु सच्चित्सुखा-
नन्तं ब्रह्म तदर्थ एष च तयोरैक्यं त्वसीदं पदम् ॥ ९० ॥

त्वमिति तदिति कार्ये कारणे सत्युपाधौ
द्वितयमितरथैकं सच्चिदानन्दरूपम् ।
उभयवचनहेतू देशकालौ च हित्वा
जगति भवति सोऽयं देवदत्तो यथैकः ॥ ९१ ॥

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ॥ ९२ ॥

श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम् ।
निदिध्यासनमित्येतत् पूर्णबोधस्य कारणम् ॥ ९३ ॥

अन्यविद्यापरिज्ञानं अवश्यं नश्वरं भवेत् ।
ब्रह्मविद्यापरिज्ञानं ब्रह्मप्राप्तिकरं स्थिरम् ॥ ९४ ॥

रहोवाक्यान्युपदिशेत् सषडंगानि देशिकः ।
केवलं नहि वाक्यानि ब्रह्मणो वचनं तथा ॥ ९५ ॥

एवमुक्त्वा मुनिश्रेष्ठ रहस्योपनिषच्छुक ।
मया पित्राऽनुनीतेन व्यासेन ब्रह्मवादिना ॥ ९६ ॥

ततो ब्रह्मोपदिष्टं वै सच्चिदानन्दलक्षणम् ।
जीवन्मुक्तः सदा ध्यायन् नित्यस्त्वं विहरिष्यसि ॥ ९७ ॥

उपदिष्टः शिवेनेति जगत्तन्मयतां गतम् ।
उत्थाय प्रणिपत्येशं त्यक्ताशेषपरिग्रहः ॥ ९८ ॥

परब्रह्मपयोराशौ प्लवन्निव ययौ मुनिः ।
अनुव्रजन्नाजुहाव पुत्रविश्लेषकातरः ॥ ९९ ॥

प्रतिनेदुस्तदा सर्वे जगत् स्थावरजङ्गमम् ।
तच्छ्रुत्वा सकलाकारं व्यासः सत्यवतीसुतः ॥ १०० ॥

पुत्रेण सहितः प्रीत्या परानन्दमुपेयिवान् ।
यो रहस्योपनिषदमधीते गुर्वनुग्रहात् ॥ १०१ ॥

सर्वपापविनिर्मुक्तः साक्षात् कैवल्यमश्नुते ।
इत्युपनिषत् ॥ इति । शुकरहस्योपनिषत् ॥
एवं गुरूपदेशेन विदित्वा स्वात्मपूर्णताम् ॥ १०२ ॥

आदेहपातं भुवनपावनः पर्यटेत्सुखम् ।
अन्ये स्वाश्रमधर्मांश्च कृत्वा देशिकसन्निधौ ।
ज्ञानं योगं चोभयं वा स्थिरचित्तः समभ्यसेत् ॥ १०३ ॥

मण्डलोपनिषदुक्ततारकयोगः —

मण्डलश्रुतिः — १ शीतोष्णादिजयः यमः । २ सुखासीनवृत्तिः आसनम् । ३ पूरककुम्भकरेचकैः प्राणसंयमः । ४ इन्द्रियाणां विषयेभ्यो निरोधनं प्रत्याहरणम् । ५ सर्वत्र चैतन्यैकत्वज्ञानं ध्यानम् । ६ तत्रैव चेतस्स्थापनं धारणा । ७ ध्यानविस्मृतिः समाधिः, एवंवित् स मुक्तिभाक् । देहस्य पञ्च दोषाः सन्ति, कामक्रोधनिद्राभयनिश्वासाः इत्यादिना प्रपञ्च्यते । अथ शाण्डिल्योपनिषदुक्तहठयोगः । तत्रैते श्लोका भवन्ति —

प्राणं प्रागिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत्
पीत्वा पिङ्गलया समीरणमथो बध्वा त्यजेद्वामया ।

सूर्याचन्द्रमसावनेन विधिनाभ्यासं सदा तन्वतां
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः । १०४ ॥

अन्तर्लक्ष्यविहीनचित्तपवनो योगी सदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ।
मुद्रेयं खलु खेचरी भवति सा लक्ष्यैकताना शिवा
शून्याशून्यविवर्जिता स्फुरति सा दृष्टिर्महायोगिनाम् ॥ १०५ ॥

अर्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षणः
चन्द्रार्कावपि लीनतामुपनयन्निष्यन्दभावोत्तरम् ।
ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परं
तत्त्वं तत्परमस्ति वस्तुविषयं शाण्डिल्य विद्धीह तत् ॥ इति ।

ज्ञानयोगमभ्यसेत् । लयसाधनं योगं ध्यानबिन्दूपनिषद्वचनेनाह—

प्राणापानौ समौ कृत्वा प्रणवेन समुच्चरन् ।
मूलाधारात्सुषुम्नाख्या नाडी तन्तुनिभा च या ॥ १०७ ॥

तत्रामूर्तो महानादो वीणादण्डे समुत्थितः ।
शङ्खनादस्ततश्चैव मध्ये मेघध्वनिस्ततः ॥ १०८ ॥

व्योमरन्ध्रगते वीणा मयूरभ्रमरध्वनिः ।
यदा श्रुत्वा सुसूक्ष्मं तं लीयते मनसेन्द्रियैः ॥ १०९ ॥

तदाऽऽत्मा राजते तत्र यथा व्योम्नि दिवाकरः ।
य एवं वेद पुरुषः स तु कैवल्यमश्नुते ॥ ११० ॥

ओंकारध्वनिनादेन वायोस्संहरणान्तिकम् ।
यावद्बलं समादध्यात् सम्यङ्नादलयावधि ॥ १११ ॥

न मानं नावमानादि नादश्रवणचेतसः ।

जाग्रन्निद्राविनिर्मुक्तः स्वरूपावस्थतामियात् ॥ ११२ ॥

एवमादियोगोऽभ्यसनीयः तत्साधनाभावे सगुणनिर्गुणात्मकं सर्वजगत्कारणं सर्वज्ञं ब्रह्म सततं ध्यायेदित्याह—

॥ सगुणध्यानम् ॥

आत्मा नित्यः स्वतस्सिद्धः तस्य किंचिन्न वस्तुतः ।
तस्य सोपाधिकस्यैव प्रसादाद्बोधसंभवः ॥ ११३ ॥

इति शङ्करयतीन्द्रनिदेशवशंवदेन श्रीकाशिनाथदामोदरप्रभृति महाविपश्चिदपश्चिमेन श्रीनीलकण्ठयतिवरेण विरचिते यतिधर्मप्रबोधे प्रथमांशः संपन्नः ॥

---

## अथ द्वितीयांशः ॥

### ॥ मूलगुरुविचारः ॥

जपक्रियाध्यानयोगश्रवणादौ महामुनिः ।
मूलदेशिकमारभ्य नमस्कुर्यात्स्वदेशिकम् ॥ १ ॥

### ॥ नित्याचारः ॥

ब्राह्मे मुहूर्ते उत्थाय प्रणवं प्राणिहृत्स्थितम् ।
अमात्रं सततं भान्तं ध्यायेत्तद्वाच्यमीश्वरम् ॥ २ ॥

ब्रह्मविद्याम्बुधिं रुद्रं दक्षिणामूर्तिमव्ययम् ।
उद्धूलितत्रिपुण्ड्राङ्गं ज्ञानमुद्राधरं हरम् ॥ ३ ॥

वीरासनं विरूपाक्षं नीलकण्ठं शुचिस्मितम् ।
सनकादिमहायोगिवन्दितं चन्द्रशेखरम् ॥ ४ ॥

व्याघ्रचर्माम्बरधरं मौनव्याख्यानमुद्रया ।
भासयन्तं निजजनस्वान्तं ध्यायेदनन्यधीः ॥ ५ ॥

अजपाहंस एवेति विद्या जप्या यतीश्वरैः ।
ततः शबलतां हित्वा केवलं तन्मयो भवेत् ॥ ६ ॥

दण्डमृद्दन्तकाष्ठादि गृहीत्वाथ नदीं व्रजेत् ।
केदारदेवायतनग्रामोद्यानादि सन्त्यजन् ॥ ७ ॥

शतहस्तं परित्यज्य मूत्रं कुर्यात् जलाशयात् ।
शतद्वयं पुरीषे तु तीर्थे चैव चतुश्शतम् ॥ ८ ॥

नियम्य प्रयतो वाचं संवृताङ्गोऽवकुण्ठितः ।
प्रत्यग्निं प्रतिसूर्यं च प्रतिसोमोदकं तथा ॥ ९ ॥

प्रतिगां प्रतिसन्ध्यां च प्रज्ञा नश्यति मेहतः ।
एवं विण्मूत्रमुत्सृज्य परिमृज्य तृणादिभिः ॥ १० ॥

गृहीतशिश्न उत्तिष्ठेद्वस्त्रेणाजानुसंवृतः ।
उत्तरास्यो दिवोत्सर्गे रात्रौ चेद्दक्षिणामुखः ॥ ११ ॥

अवान्तरोत्सर्गशङ्का यदि कुर्याद्यथा दिवा ।

॥ शौचम् ॥

लिङ्गे तिस्रः करे तिस्रः पादयुग्मे च तादृशाः ॥ १२ ॥

तिस्रः तिस्रः प्रतिमृदं लिङ्गशौचे समीरितः ।
पञ्चापानेऽङ्घ्रिहस्तानां सप्त सप्तैव मृत्तिकाः ॥ १३ ॥

आपः प्रतिमृदं पञ्च गुदे लिङ्गे त्रिधा विधिः ।
एतच्चतुर्गुणं प्रोक्तं यतीनां शुद्धिहेतवे ॥ १४ ॥

उत्थाय बध्वा कौपीनं संविश्यैव विसर्जयेत् ।
सर्वत्रायं समो न्यायः विना तत्परिवर्तनम् ॥ १५ ॥

अवशिष्टजलेनाथ तद्भूमिं परिशोधयेत् ।
कमण्डलुं द्वादशधा मृज्जलाभ्यां विशोधयेत् ॥ १६ ॥

अरत्निमात्रमुत्सृज्य कुर्याच्छौचं अनुद्धृते ।
पश्चात्तु शोधयेत्तीरं अन्यथा त्वशुचिर्भवेत् ॥ १७ ॥

॥ आचमनविधिः ॥

मुक्ताङ्गुष्ठकनिष्ठेन ब्राह्मेण त्रिः पिबेदपः ।
तारेण माषप्रमिताः प्रमृज्य द्विरथो मुखम् ॥ १८ ॥

त्रिमध्याङ्गुलिभिः मूर्धाद्यङ्गस्पर्शो विधीयते ।

॥ दन्तधावनम् ॥

सर्वे कण्टकिनः पुण्याः क्षीरिणश्च विशेषतः ॥ १९ ॥

तिक्ताः कटुकषायाश्च शोभना दन्तधावने ।
वर्ज्या हि शल्मली चिञ्चा फुल्लकिंशुकतिन्दुकाः ॥ २० ॥

अरिष्टोऽक्षः पारिभद्रः गुल्गुलुस्तिरटस्तथा ।
अलाभे दन्तकाष्ठानां निषिद्धदिवसेषु वा ॥

अपां द्वादशगण्डूषैः मुखशुद्धिर्विधीयते ।
शिवरात्र्यष्टमीसोमववारगामा विशेषतः ॥ २२ ॥

एकादशी च यमिभिः वर्जयेद्द्विजधावनम् ।
भुक्त्यन्ते नित्यमेव स्यान्न जिह्वां परिशोधयेत् ॥ २३ ॥

ईशानास्यः प्राङ्मुखो वा शिरः प्रावृत्य वाग्यतः ।
प्रदक्षिणत्वेन धावेद्दन्तानां शुद्धये शनैः ॥ २४ ॥

आमृज्यापां च गण्डूषैः मुखं शुध्येद्द्विषट्कृतैः ।
मूत्रे पुरीषे दन्तानां धावने भोजने तथा ॥ २५ ॥

चतुरष्टद्विषट्द्व्यष्टगण्डूषैः शुद्धिमाप्नुयात् ।
मूत्रोत्सर्गे पुरीषे च संध्यायां वन्दने तथा ।
जपारम्भे च विद्वद्भिः प्राणायामाष्षडीरिताः ॥ २६ ॥

॥ स्नानविधिः ॥

कुटीचादेः त्रिषवणं परहंसस्य वासकृत् ।
सर्वे वापि सकृत् कुर्युः अशक्तौ वाप्यनूदके ॥ २७ ॥

चतस्रो घटिका प्रातः अरुणोदय इष्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्बुसदृशं जलम् ॥ २८ ॥

वामहस्तस्य पृष्ठे तु संस्थाप्य स्नानमृत्तिकाम् ।
दण्डं कमण्डलुं चापि स्पृष्ट्वाचम्यायमेत् त्रिधा ॥ २९ ॥

चुलके जलमाधाय तद्वामेन पिधाय च ।
प्रणवेन द्विषड्वारं अभिमन्त्र्य च तेन ताः ॥ ३० ॥

संप्रोक्ष्य प्रणवेनाथ द्विषट्केनाभिमन्त्रयेत् ।
ततः प्रणवमालिख्य संप्रोक्ष्य सलिलेन च ॥ ३१ ॥

जलं नारायणं मत्वा तद्धेतुं परमेश्वरम् ।
गङ्गाधरं नमस्कृत्य चन्द्रलेखावतंसकम् ॥ ३२ ॥

ज्योतीरूपं महादेवं ध्यात्वा स्नायाच्छुभोदके ।
इडा भागीरथी प्रोक्ता पिङ्गला यमुना स्मृता ॥ ३३ ॥

तयोर्मध्यगता नाडी सुषुम्नाख्या सरस्वती ।
ध्यानह्रदे ज्ञानजले रागद्वेषमलापहे ॥ ३४ ॥

यः स्नाति मानसे तीर्थे स याति परमां गतिम् ।
नमः शिवायै गङ्गायै नारायण्यै नमो नमः ॥ ३५ ॥

नमः त्रिपथगामिन्यै विश्वमूर्त्यै नमो नमः ।
इति मन्त्रं समुच्चार्य तीर्थवन्दनमाचरेत् ॥ ३६ ॥

एवं विभाव्य मनसा मृत्तिकास्नानमम्भसा ।
कृत्वा संतर्प्य मन्त्रेण तथा दण्डं च तर्पयेत् ॥ ३७ ॥

॥ मृल्लेपः ॥

तिस्रः तिस्रः शिरोबाहुवक्षःपृष्ठेषु लेपयेत् ।
कट्यूरुजङ्घापादेषु स्नाने पञ्च मृदः स्मृताः ॥ ३८ ॥

आलिप्यालिप्य संक्षाल्य स्नायान्मध्ये पुनः पुनः ।
गोमुख्या वाऽथ षण्मुख्या मुद्रयाऽऽच्छाद्य खानि च ॥

त्रिर्निमज्जेच्छनैर्मूर्ध्नि स्मरन् गङ्गाधरं हरम् ।
एवं त्रिवारं सलिले स्नात्वा दण्डं च तर्पयेत् ॥ ४० ॥

एवमुक्तविधाचारे यावता यत्र जायते ।
मनश्शुद्धिः कस्यचिद्वाचरेत् न्यूनमथाधिकम् ॥ ४१ ॥

॥ विभूतिः ॥

अथ सर्वसमृध्यर्थं भस्मादायादरेण तु ।
सर्वाङ्गोद्धूलनं कृत्वा त्रिपुण्ड्रं मन्त्रतः चरेत् ॥ ४२ ॥

सहंसप्रणवेनाथ धृत्वा पुण्ड्रं जलं पिबेत् ।
भस्मलेपावशेषं च सर्वाङ्गेषु विलापयेत् ॥ ४३ ॥

एवं कामादिदोषघ्नं पशुपाशविमोचनम् ।
व्रतं कुर्याद्यतिः नो चेत् प्रत्यवायः प्रसिध्यति ॥ ४४ ॥

॥ रुद्राक्षधारणम् ॥

रुद्राक्षं धारयेत्पश्चात् यथाशक्ति महादरात् ।
तद्धारणफलं वक्तुं नालं श्रुतिरपीत्यतः ॥ ४५ ॥

॥ जलानुष्ठानम् ॥

देवादिवन्दनं कृत्वा जले जप्त्वा शतं मनुम् ।
प्राणानायम्य तत्तीर्थे पद्मं प्रणवसंयुतम् ॥ ४६ ॥

लिखित्वा प्रणवं यन्त्रं ऋष्यादिन्यासमाचरेत् ।
अंमण्डले हरिं ध्यात्वा तस्मिन्नावाहयेत् शिवम् ॥ ४७ ॥

मुद्राभिरुपचारैश्च पूजयन्परमेश्वरम् ।
अष्टोत्तरशतं तत्र सन्तर्प्यर्ष्यादिकानपि ॥ ४८ ॥

पुनः पूज्य समुद्रास्य कराङ्गन्याससपूर्वकम् ।
प्राणानायम्य मन्त्रेण दण्डमादाय तर्पयन् ॥ ४९ ॥

देवादिवन्दनं कुर्यात् इत्येषाऽनुष्ठितिर्जले ।
श्रुतिस्मृतिपुराणानामालयं करुणालयम् ॥ ५० ॥

नमामि भगवत्पादशंकरं लोकशंकरम् ।
शंकरं शंकराचार्यं केशवं बादरायणम् ॥ ५१ ॥

सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ।
आगच्छ देव देवेश शूलभृद्वृषवाहन ५२ ॥

गृहाण मत्कृतां पूजां लिङ्गेऽस्मिन्सन्निधिं कुरु ।

॥ अथ स्थलानुष्ठानम् ॥

स्नानासनं भूतशुद्धिः देहशुद्धिरुदीरिता ॥ ५३ ॥

भूरग्न्यात्मन इत्यादि न्यासान्ते प्रावृत्तित्रयम् ।
दिग्बन्धनं ततो ध्यानं ब्रह्मरन्ध्रे मनःस्थितिः ॥ ५४ ॥

समष्टिव्यष्टिमन्त्राणां ऋष्यादिकरणं ततः ।
मात्रापादैः सुसंयोज्य भावयन्परमेश्वरम् ॥ ५५ ॥

अष्टोत्तरसहस्रं वा तारं दशसहस्रकम् ।
जपन्कैवल्यमाप्नोति मुनिरित्याहुरास्तिकाः ॥ ५६ ॥

अथ संगवसमयानुष्ठानक्रिया उच्यते—

संप्रदायानुरोधेन दक्षिणामूर्तिपद्यकैः ॥ ५७ ॥

आचार्यं दण्डवन्नत्वा यो ब्रह्माणमुदीरयन् ।
योगपट्टाक्षमालादि सन्निधाप्य कमण्डलुम् ॥ ५८ ॥

ऊर्ध्वाग्रं वोदगग्रं वा दण्डं संस्थाप्य यत्नतः ।
वस्त्रेण नाभिमाच्छाद्य गुर्वनुज्ञापुरस्सरम् ॥ ५९ ॥

शान्तिं पठित्वा स्थिरधीः शृणुयात् श्रुतिशीर्षकम् ।
सूत्रं वैयासिकं चैव तद्भाष्यं स्वगुरोर्मुखात् ॥ ६० ॥

स्वोत्तमं स्वसमानं वा कनीयांसं गुरुं व्रजेत् ।
गौरवाप्रत्यये प्रत्यवायी भवति नान्यथा ॥ ६१ ॥

सूतसंमतमाह—

ब्रह्मचारी गृहस्थस्य वनस्थस्य यतेरपि ।
गृहस्थोऽपि वनस्थस्य यतेरप्यधिकारिणः ॥ ६२ ॥

वनस्थोऽपि यतीनां च चतुर्णामपि देशिकः ।
विद्योत्कर्षबलेनैव गुरुर्भवति नान्यथा ॥ ६३ ॥

अतिवर्णाश्रमी प्रोक्तः गुरुः सर्वाधिकारिणाम् ।
न कस्यापि भवेत् शिष्यः यथेशः परमेश्वरः ॥ ६४ ॥

विदेहनगरीं प्राप जनकेनाभिपालिताम् ।
आवेदितो याष्टिकैश्च जनकाय महात्मने ॥ ६५ ॥

जिज्ञासार्थं शुकस्यासौ अस्तु नामेत्यवज्ञया ।
उक्त्वा बभूव जनकः तूष्णीं सप्तदिनावधि ॥ ६६ ॥

स तं प्रवेशयामास जनकः शुकमङ्कणे ।
अथोन्मदाभिः कान्ताभिः भाजनैः भोगसंचयैः ॥ ६७ ॥

इत्यादिना प्रपञ्च्य पुनः पृच्छति—

संसाराडम्बरमिदं कथमभ्युत्थितं गुरो ।
कथं प्रशममायाति यथावत् कथयाशु नः ॥ ६८ ॥

मनुश्चाह —

ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता ।
बालोऽपि विप्रः विप्रस्य पिता भवति धर्मतः ।
अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः ॥ ६९ ॥

पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ।
न हायनैः न पलितैः न वित्तैः न च बन्धुभिः ॥ ७० ॥

श्रवणानन्तरकृत्यमाह—

तारं तथोत्तरां शान्तिं पठन् बध्वा च पुस्तकम् ।
षट् प्रणामान् पुनः कुर्यात् इत्येवं स्मृतिशासनम् ॥ ७१ ॥

असमाप्तौ तु मध्याह्ने समाप्तिः सायमिष्यते ।
सायं सन्ध्या न कर्तव्या श्रवणस्यासमाप्तितः ॥ ७२ ॥

नित्यकर्म परित्यज्य वेदान्तश्रवणं विना ।
वर्तमानस्तु सन्यासी पतत्येव न संशयः ॥ ७३ ॥

## अथेश्वरसमर्चनम् ॥

शिवलिङ्गं मोक्षकामी प्रणवेनैव पूजयेत् ।
बिल्वपत्रैः सभसितैः दारुपात्रैरिति श्रुतिः ॥ ७४ ॥

## माध्याह्निकम् ॥

अथ भस्म समादाय सहंसप्रणवेन च ।
मूर्धादिपादपर्यन्तं समुद्धूल्य महादरात् ॥ ७५ ॥

त्रिपुण्ड्रं ब्रह्मविद्याङ्गं धारयेत् श्रुतिशासनात् ।
उषसीव च मध्याह्ने सायाह्नेऽनुष्ठितिं चरेत् ॥ ७६ ॥

भिक्षास्नानगतिप्रश्नवन्दनादौ महामुनिः ।
सोऽहमस्मीत्यभिध्यायेत् यद्वेशाख्यामुदीरयेत् ॥ ७७ ॥

## अथ भिक्षानुज्ञा ॥

सर्वान्तरात्मन्भो भर्ग त्वन्नियोगाचलन्ति मे ।
भिक्षार्थमिन्द्रियाण्यद्य पर्यटामि प्रसीद मे ॥ ७८ ॥

इति संप्रार्थ्य शिक्यं च दण्डं कुण्डिकया सह ।
गृहीत्वादित्यमालोक्य भिक्षेत ब्राह्मणादिषु ॥ ७९ ॥

आजानु वाससाच्छन्नः शिरश्चान्येन वाससा ।
प्रादक्षिण्येन भिक्षेत यथासौकर्यमेव वा ॥ ८० ॥

अद्भिस्तारेण संप्रोक्ष्य दत्ताभिः शिक्यमात्मनः ।
धृत्वा शिक्यं स्वहस्तेन प्रतिगृह्णीत सादरम् ॥ ८१ ॥

पुनर्दत्ताभिरभ्युक्ष्य तारेणान्यगृहं व्रजेत् ।
यत्र गर्भवती दीक्षा दीक्षा वैवाहिकी च या ॥ ८२ ॥

पितृदीक्षा च यागे या व्रतदीक्षा तथाऽपरा ।
तत्र भिक्षा भवेन्नैव यतेर्माधूकरं विना ।
पुष्पिणी सूतिका वापि न भिक्षा संप्रदायतः ॥

तस्य प्राणो गार्हपत्योऽपानोऽन्वाहार्यपचनः व्यान आहवनीय उदानसमानौ सभ्यावसथ्यौ पञ्च वा एतेऽग्नयः आत्मस्थाः आत्मन्येव जुहोति स एष आत्मज्ञनिष्ठ आत्मानं क्षेमन्नयतीति विज्ञायते भूतेभ्यो दयापूर्वं संविभज्य शेषमद्भिः संस्पृश्य औषधवत्प्राश्नीयादिति ॥ ८३ ॥

बृहदारण्येऽपि—

विसृज्य यज्ञोपवीतं चतुर्वर्णेषु भैक्षमश्नीयान्माधुकरीं वेति ॥

काठके—

चतुर्वर्णेषु भैक्षचर्यां चरेत् पाणिपात्रेणाशनं कुर्यात् औषधवदश्नीयादिति ॥ ८७ ॥

चरेन्माधुकरीं भैक्षं यतिर्म्लेच्छकुलादपि ।
एकान्नं न तु भुञ्जीत बृहस्पतिसमादपि ॥ ८८ ॥

न वायुस्पर्शदोषेण नाग्निर्दहनकर्मणा ।
नापो मूत्रपुरीषाभ्यां नान्नदोषेण मस्करी ॥ ८९ ॥
संन्यासी

## अथ भोजनविधिः ॥

पञ्चाङ्गार्द्रः पीठसंस्थः गुरुज्येष्ठाद्यनुज्ञया ।
निवेद्येशाय पर्युक्ष्य प्राश्य प्राणाहुतीश्चरेत् ॥ ९० ॥

भिक्षान्नं उक्तपर्यासं अन्तरंगे महेश्वरम् ।
ध्यात्वा समुच्चरन् वापि महादेवेति भक्षयेत् ॥ ९१ ॥

घृतं श्वमूत्रसदृशं मधु स्यात्सुरया समम् ।
तैलं सूकरमूत्रं स्यात् सूपं लशुनसन्निभम् ॥ ९२ ॥

माषापूपादि गोमांसं क्षीरं मूत्रसमं भवेत् ।
घृतसूपादिसंयुक्तमन्नं नाद्यात् कदाचन ॥ ९३ ॥

उत्तरापोशनं तद्वत् शेषं दक्षिणतो नयेत् ।
पुनः गण्डूषणं पाणिपादान् क्षाल्य मृदंभसा ॥ ९४ ॥

यदि द्विभोजनापेक्षा दुर्बलोज्ञानलिप्सया ।
श्रवणस्यावश्यकत्वात् तत्र दोषो न विद्यते ॥ ९५ ॥

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
तस्माद्योगानुगुण्येन भुञ्जीयाद्यतिसत्तमः ॥ ९६ ॥

श्रुतिराह—

आशीर्युक्तानि कर्माणि हिंसायुक्तानि चान्यथा ।
लोकसंग्रहमेवापि नैव कुर्यान्न कारयेत् ॥ ९७ ॥

## ॥ वैराग्यम् ॥

पाणिपात्रं चरेद्योगी नासकृत् भैक्षमाचरेत् ।
तिष्ठन् भुञ्ज्याच्चरन् भुञ्ज्यात् मध्ये नाचमनं तथा ॥ ९८ ॥

आस्येन तु यदाऽऽहारं गोवन्मृगयते मुनिः ।
तदा समः स्यात् सर्वेषु सोऽमृतत्वाय कल्पते ॥ ९९ ॥

पांसुना च प्रतिच्छन्नः शून्यागारप्रतिश्रयः ।
वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः ॥ १०० ॥

कालकांक्षी चरन्नेव ब्रह्मभूयाय कल्पते ।
अज्ञातचर्यां लिप्सेत नचैनं हर्ष आविशेत् ॥ १०१ ॥

न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेत् बहून् ।
न व्याख्यामुपयुञ्जीत नारंभानारभेत् कचित् ॥ १०२ ॥

अव्यक्तलिङ्गोऽव्यक्तार्थो मुनिरुन्मत्तबालवत् ।
न कुर्यान्न वदेत् किंचिन्न ध्यायेत् साध्वसाधु वा ॥ १०३ ॥

आत्मारामोऽनया वृत्त्या विचरेत् जडवन्मुनिः ।
भैक्षाशनं च मौनित्वं तपो ध्यानं विशेषतः ॥ १०४ ॥

सम्यग्ज्ञानं च वैराग्यं अतीतस्य स्वभावजम् ।

अथ विद्यासंप्रदायप्रवर्तनार्थं सञ्चरतां मुनीनां वृत्तिमाह —

भैक्षेण वर्तयेन्नित्यं नैकान्नाशी भवेत्कचित् ॥ १०५ ॥

समदुःखसुखः क्षान्तो हस्तप्राप्तं च भक्षयन् ।
निर्वैरेण समं पश्यन् द्विजगोऽश्वमृगादिषु ॥ १०६ ॥

भावयन्मनसा विष्णुं परमात्मानमीश्वरम् ।
चिन्मयं परमानन्दं ब्रह्मैवास्मीति भावयन् ॥ १०७ ॥

आशांबरधरो भूत्वा सर्वदा मनोवाक्कायकर्मभिः सर्वसंसार-मुत्सृज्य प्रपञ्चावाङ्मुखः स्वरूपानुसन्धानेन भ्रमरकीटन्यायेन मुक्तो भवतीति ॥ १०८ ॥

विविदिषोः धर्माः उच्यन्ते —

नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ॥ १०९ ॥

एको भिक्षुर्यथोक्तः स्यात् द्वावेव मिथुनं भवेत् ।
त्रयो ग्रामः समाख्यातः तदूर्ध्वं नगरायते ॥ ११० ॥

नगरे नहि कर्तव्यं ग्रामो वा मिथुनं तथा ।
एतत्त्रयं प्रकुर्वाणः स्वधर्माच्चयवते यतिः ॥ १११ ॥
राजवार्तादि तेषां स्यात् भिक्षावार्ता परस्परम् ।
स्नेहपैशुन्यमात्सर्यं सन्निकर्षान्न संशयः ॥ ११२ ॥
नटादिप्रेक्षणं द्यूतं प्रमदां सुहृदं तथा ।
भक्ष्यं भोज्यमुदक्यां च षण्ण पश्येत् कदाचन ॥ ११३ ॥
मञ्चकं शुक्लवस्त्रं च स्त्रीकथालौल्यमेव च ।
दिवा स्वापं च यानं च यतीनां पातकानि षट् ॥ ११४ ॥
नामगोत्रादिचरणं देशं कालं कुलं श्रुतम् ।
वयो वृत्तं व्रतं भावं ख्यापयेन्नैव सद्यतिः ॥ ११५ ॥
न संभाषेत स्त्रियं काञ्चित् पूर्वदृष्टां च न स्मरेत् ।
कथां च वर्जयेत्तासां न पश्येल्लिखितामपि ॥ ११६ ॥
शिल्पव्याख्यानयोगश्च कामशास्त्रपरिश्रमः ।
अहंकारो ममत्वं च चिकित्सा धर्मसंग्रहः ॥ ११७ ॥
प्रायश्चित्तं प्रवासश्च मन्त्रौषधगिराशिषः ।
प्रतिषिद्धानि चैतानि सेवमानः पतत्यधः ॥ ११८ ॥
आगच्छ तिष्ठेति स्वागतं सुहृदोऽपि च ।
संमाननं च न ब्रूयात् मुनिर्मोक्षपरायणः ॥ ११९ ॥

## वैराग्यबोधः ॥

माया पुत्री सुतादीनां बन्धूनां च शुभाशुभम् ।
श्रुत्वा दृष्ट्वा न कम्पेत शोकमोहौ त्यजेद्यतिः ॥ १२० ॥
त्वचां क्व शोभा सौरभ्यकमनीयादयो गुणाः ।
मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ ॥ १२१ ॥

देहे चेत्प्रीतिमान्मूढो नरकेषु ततोऽपि सः ।
स्त्रीणामवाच्यदेशस्य क्लिन्नस्य पिलकस्य च ॥ १२२ ॥
अभेदेऽपि मनोभेदाज्जनः प्रायेण वञ्च्यते ।
चर्मखण्डं द्विधा भिन्नं अपानोद्गारलेपितम् ॥ १२३ ॥
ये रमन्ति नमस्तेभ्यः साहसं किमतः परम् ।

## निषिद्धानि ॥

वस्त्रमुच्छिष्टपलाभं चन्दनं ग्राम्यपङ्कवत् ॥ १२४ ॥
सभास्थानं श्मशानाभं सुवर्णं कालकूटवत् ।
कुम्भीपाकं राजधानी कृष्णसर्पा इव स्त्रियः ।
शवपिण्डवदेकत्र भिक्षान्नं परिवर्जयेत् ॥ १२५ ॥
आध्यात्मिकीं कथां मुक्त्वा लोकवार्ता विकत्थनम् ।
राजवार्ता तथा भिक्षावृत्तान्तकथनं त्यजेत् ॥ १२६ ॥
एकान्नं मदमात्सर्यं गजपुष्पविभूषणम् ।
ताम्बूलाभ्यञ्जनक्रीडा भोगकाङ्क्षारसायनम् ॥ १२७ ॥
कत्थनं कुत्सनं स्वस्ति ज्योतिश्च क्रयविक्रयम् ।
क्रियाभेदविवादश्च गुरुवाक्यविलङ्घनम् ॥ १२८ ॥
सन्धिश्च विग्रहो यानं मञ्चकं शुक्लवस्त्रकम् ।
शुक्लोत्सर्गो दिवा स्वापः भिक्षाचारश्च तैजसे ॥ १२९ ॥
विषं चैवायुधं बीजं हिंसा तैक्ष्ण्यमैथुने ।
गोत्रादिचरणं सर्वं पितृमातृकुलं धनम् ॥ १३० ॥
प्रतिषिद्धानि चैतानि सेवमानः पतत्यधः ।
सुजीर्णोऽपि सुजीर्णासु स्त्रीषु विद्वान्न विश्वसेत् ॥ १३१ ॥
नैवाददीत पाथेयं यतिः किंचिदनापदि ।

पक्कमापत्सु गृह्णीयात् सद्यो यदुपभुञ्जते ॥ १३२ ॥

अन्नपानपरो भिक्षुः वस्त्रादीनां प्रतिग्रही ।
आविकं वानाविकं वा तथा पट्टपटानपि ॥ १३३ ॥

प्रतिगृह्य यतिश्चैतान् पतत्येव न संशयः ।
अद्वैतनावमारुह्य जीवन्मुक्तत्वमाप्नुयात् ॥ १३४ ॥

वाक्दण्डे मौनमातिष्ठेत् कायदण्डे त्वभोजनम् ।
कर्तव्ये मानसे दण्डे प्राणायामो विधीयते ॥ १३५ ॥

कर्मणा बध्यते जन्तुः विद्यया तु विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ १३६ ॥

रथ्यायां बहुवस्त्राणि भिक्षा सर्वत्र लभ्यते ।
भूमिः शय्यास्ति विस्तीर्णा यतयः केन दुःखिताः ॥ १३७ ॥

## अथ गुरुपरिचर्या ॥

ब्रह्मविद्यार्थमीशानं गुरुं धीमान् शरीरतः ।
वित्तेन जीवितेनापि पूजयेच्चिरकालतः ॥ १३८ ॥

तारहंसमहावाक्यतत्वदेशिकपूजनम् ।
शिवस्य पूजनं हि स्यात् तयोर्भेदो न विद्यते ॥ १३९ ॥

पादशौचाभ्यङ्गवस्त्रवपुःपीडनमाचरेत् ।
गुरोरनिष्टकृच्छम्भोरेव तीव्रापराधकृत् ॥ १४० ॥

गुरूक्तवचनं वेदवाक्यवत्सत्यबुद्धितः ।
शिष्यः कुर्यात्प्रातिकूल्यं न वदेत्तु कदाचन ॥ १४१ ॥

काव्यनाटकशास्त्रादिपाठप्रवचनं तथा ।
पुराणेष्वपि गाथाश्च स्त्रीसद्मसुखसंपदाम् ॥ १४२ ॥

कीर्तनं नृत्तगीतं च दूरतः परिवर्जयेत् ।
पुराणोक्तमपीशस्य चेष्टितं मोहकारणात् ॥ १४३ ॥

व्यावहारिकमेवेदं मुमुक्षुः न तदाश्रयेत् ।
आत्मशान्तिप्रदा विद्या सेव्या यतिभिरादरात् ॥ १४४ ॥

विक्षेपशान्तये नित्यं जगन्मिथ्यात्वनिश्चयात् ।
मननादात्मविज्ञानात् ब्रह्मानन्दे चिरं रमेत् ॥ १४५ ॥

मत्तोऽन्यदस्ति चेन्मिथ्या यथा मरुमरीचिका ।
वन्ध्याकुमारसमरे भीतिश्चेदस्ति किंचन ॥ १४६ ॥

शशशृङ्गेण नागेन्द्रो हतश्चेदस्त्विदं जगत् ।
गन्धर्वनगरे सत्ये जगद्भवति सर्वदा ॥ १४७ ॥

शुक्तिकारजतं सत्यभूषणं चेत् जगद्भवेत् ।
चित्रस्थदीपैस्तमसो नाशश्चेदस्त्विदं जगत् ॥ १४८ ॥

ज्वालाग्निमण्डले पद्मवृद्धिश्चेदस्त्विदं जगत् ।
मायाकार्यमिदं भेदमस्ति चेत् ब्रह्मचक्रकम् ॥ १४९ ॥

देहोऽहमिति दुःखं चेत् ब्रह्माहमिति निश्चिनु ।
हृदयग्रन्थिरस्तित्वे छेदनं ब्रह्मचक्रकम् ॥ १५० ॥

एवमादिसुदृष्टान्तैः साधितं ब्रह्ममात्रकम् ।
ब्रह्मैव सर्वभुवनं भुवनं नाम संत्यज ॥ १५१ ॥

अहं ब्रह्मेति निश्चित्याप्यहंभावं परित्यज ।
सर्वमेव लयं याति सुप्तहस्तस्थपुष्पवत् ॥ १५२ ॥

सर्वव्यापारमुत्सृज्याप्यहं ब्रह्मेति भावय ।
शांकरीयं महाशास्त्रं न देयं यस्य कस्यचित् ॥ १५३ ॥

तेजोबिन्दूपनिषदं अभ्यसेत्सर्वदा मुदा ।
सकृदभ्यासमात्रेण ब्रह्मैव भवति स्वयम् ॥ १५४ ॥

इत्युपनिषत् ॥ मननप्रकारमाह—

कारणं भ्रान्तिरेव स्यात् कर्तृत्वादेर्विपश्चिताम् ।
अपि तन्मननान्नश्यत्यञ्जसा ब्रह्मतेजसा ॥ १५५ ॥

आत्मानमञ्जसा वेद्मि काप्यज्ञानं पलायितम् ।
कर्तृत्वमद्य मे नष्टं कर्तव्यं वा न मे क्वचित् ॥ १५६ ॥

ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यजातयः ।
स्थूलदेहगता एते स्थूलाद्भिन्नस्य मे नहि ॥ १५७ ॥

क्षुत्पिपासान्ध्यबाधिर्यकामक्रोधादयोऽखिलाः ।
लिङ्गदेहगता एते लिङ्गाद्भिन्नस्य मे नहि ॥ १५८ ॥

जडत्वप्रियमोदत्वधर्माः कारणदेहगाः ।
न सन्ति मम नित्यस्य निर्विकारस्वरूपिणः ॥ १५९ ॥

उलूकस्य यथा भानौ अन्धकारः प्रतीयते ।
स्वप्रकाशे परानन्दे तमो मूढस्य जायते ॥ १६० ॥

चक्षुर्दृष्टिनिरोधेऽभ्रे सूर्यो नास्तीति मन्यते ।
तथाऽज्ञानावृतो देही ब्रह्म नास्तीति मन्यते ॥ १६१ ॥

यथामृतं विषाद्भिन्नं विषदोषैर्न लिप्यते ।
न स्पृशामि जडाद्भिन्नो जडदोषान् प्रकाशतः ॥ १६२ ॥

स्वल्पाऽपि दीपकणिका बहुलं नाशयेत्तमः ।
स्वल्पोऽपि बोधो महतीमविद्यां नाशयेत्तमः ॥ १६३ ॥

चिद्रूपत्वान्न मे जाड्यं सत्यत्वाच्चानृतं मम ।
आनन्दत्वान्न मे दुःखं अज्ञानाद्भाति सत्यवत् ॥ १६४ ॥

वक्ष्ये जीवात्मनोऽवस्थां हृदयेऽष्टदलाम्बुजे ।
जीवज्योतिः सूक्ष्मरूपः वालाग्रशतभागवत् ॥ १६५ ॥

सदाऽनीशो हि कर्ताऽहं भोक्ता दुःखी सुखीति च ।
स्वतन्त्रोऽप्यस्वतन्त्रश्च चलत्यभित एव सः ॥ १६६ ॥

यदा विश्रमते पूर्वदले धर्ममतिर्भवेत् ।
निद्राऽऽग्नेयदले द्वेषो दक्षिणे पत्रके पुनः ॥ १६७ ॥

नैरृते चेत्पापबुद्धिः क्रीडा पश्चाद्दले भवेत् ।
वायव्ये गतिवैराग्यचलनादिमतिर्भवेत् ॥ १६८ ॥

उत्तरे सुखशृङ्गारधीरीशानदले पुनः ।
कृपादानादिबुद्धिः स्यात् एवं बाह्यसुखस्थितिः ॥ १६९ ॥

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ १७० ॥

नैव स्त्री न पुमानेषः नैव चायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते ॥ १७१ ॥

मुक्तिकोपनिषदर्थमाह—

हस्तेन हस्तं संपीड्य दन्तान्दन्तैश्च पीड्य च ।
कूर्मवद्दीन्द्रियाण्यन्तः संस्थाप्य गतबाह्यदृक् ॥ १७२ ॥

पद्मासनस्थो भस्माङ्गः गुरुदेवश्रुतिप्रियः ।
विजने परमात्मानं निश्चलः कश्चिदीक्षते ॥ १७३ ॥

यदैष चलनं हित्वा तुलाकीलवदास्थितः ।

SRI GNANANANDA NIKETAN,
LIBRARY,
THAPOVANAM P.O.
Pin-605756

परतत्त्वोन्मुखः सद्यः तदैक्यं भजते ध्रुवम् ॥ १७४ ॥

इतः कोन्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति ।
शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् ।
पौरुषेण प्रयत्नेन योजनीया शुभे पथि ॥ १७५ ॥

अशुभेषु समाविष्टं शुभेष्वेवावतारयेत् ।
अशुभाच्चालितं याति शुभं तस्मादपीतरत् ॥ १७६ ॥

पौरुषेण प्रयत्नेन लालयेच्चित्तबालकम् ।
चित्तं कारणमर्थानां तस्मिन्सति जगत्त्रयम् ॥ १७७ ॥

तस्मिन्क्षीणे जगत्क्षीणं तत् चिकित्स्यं प्रयत्नतः ।
अंकुशेन विना मत्तो यथा दुष्टमतङ्गजः ॥ १७८ ॥

न वशं याति तच्चित्तं शनैः प्रत्यङ्मुखं नयेत् ।
अध्यात्मविद्याधिगमः साधुसंगतिरेव च ॥ १७९ ॥

वासनासंपरित्यागः प्राणस्पन्दनिरोधनम् ।
एतास्ता युक्तयः पुष्टाः सन्ति चित्तजये किल ॥ १८० ॥

सतीषु युक्तिष्वेतासु हठान्नियमनं तु ये ।
चेतसो दीपमुत्सृज्य विचिन्वन्ति तमो जनाः ॥ १८१ ॥

## विवेकः ॥

विवेकबुद्ध्या युक्त्याऽहं जानाम्यात्मानमद्वयम् ।
तथापि बन्धमोक्षादिव्यवहारः प्रतीयते ॥ १८२ ॥

निवृत्तोऽपि प्रपञ्चो मे सत्यवद्भाति सर्वदा ।
सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम् ॥ १८३ ॥

ब्रह्मादिकीटपर्यन्ताः प्राणिनो मयि कल्पिताः ।
बुद्बुदादिविकाराश्च तरङ्गाः सागरे यथा ॥ १८४ ॥

तरङ्गस्थद्रवं सिन्धुः न वाञ्छति यथा तथा ।
विषयानन्दवाञ्छा मे माभूदानन्दरूपिणः ॥ १८५ ॥

स्वात्मानन्दरसो येन सकृदास्वादितो मुदा ।
स सर्वकार्यं उत्सृज्य तत्रैव परिधावति ॥ १८६ ॥

स्वात्मानन्दरसः सम्यग्येन नास्वादितो भवेत् ।
स चान्यत्रापि रमते तं विहायैव दुर्मतिः ॥ १८७ ॥

अहो मायावृतो लोकः स्वात्मानन्दमहोदधिम् ।
विहाय रमते क्षुद्रे विषये किं वदामि ते ॥ १८८ ॥

शुद्धोऽहमान्तरङ्गोऽहं शाश्वतविज्ञानसमरसात्माहम् ।
शोधितपरतत्त्वोऽहं बोधानन्दैकमूर्तिरेवाहम् ॥ १८९ ॥

इत्यन्वहं आत्मानमनुसंदध्यात् ॥

महोपनिषदि निदाघऋभुसंवादमाह—

तथा निदाघऋभुसंवादं शुकमुनेः कृते ।
शिवेनैवोपदिष्टार्थं चित्तशुद्ध्यर्थमाह हि ॥ १९० ॥

प्रज्ञया त्वं विजानासि ईश्वरानुगृहीतया ।
मोक्षद्वारे द्वारपालाश्चत्वारः परिकीर्तिताः ॥ १९१ ॥

शमो विचारस्सन्तोषः चतुर्थस्साधुसंगमः ।
एकं वा सर्वयत्नेन सर्वमुत्सृज्य संश्रयेत् ॥ १९२ ॥

एकस्मिन् वशमायाते चत्वारोऽपि वशं गताः ।
कोऽहं कथमिदं चेति संसारमलमाततम् ॥ १९३ ॥

प्रविचार्यं सदा सर्वप्रयत्नेन ससाधुना ।
नाकर्मसु नियोक्तव्यं नानार्येण सहावसेत् ॥ १९४ ॥

द्रष्टव्यस्सर्वसंहर्ता न मृत्युरवहेलया ।
गुरुशास्त्रोक्तमार्गेण स्वानुभूत्या च चिद्धने ॥ १९५ ॥

ब्रह्मैवाहमिति ज्ञात्वा वीतशोको भवेन्मुनिः ।
विनष्टदिग्भ्रमस्यापि यथापूर्वं विभाति दिक् ॥ १९६ ॥

तथा विज्ञानविध्वस्तं जगन्नास्तीति भावय ।
मातरीव परं यान्ति विषमाणि मृदूनि च ॥ १९७ ॥

विश्वासमिह भूतानि सर्वाणि शमशालिनि ।
न रसायनपानेन न लक्ष्म्यालिङ्गितेन च ॥ १९८ ॥

न तथा सुखमाप्नोति शमेनान्तर्यथा जनः ।
तुषारकरविम्बाच्छं मनो यस्य निराकुलम् ॥ १९९ ॥

मरणोत्सवयुद्धेषु स शान्त इति कथ्यते ।
अप्राप्तं च परित्यज्य प्राप्ते च समतां गतः ॥ २०० ॥

अदृष्टखेदाखेदो यः संतुष्ट इति कथ्यते ।
तेनेयमिन्द्रजालश्रीः जगति प्रवितन्यते ॥ २०१ ॥

द्रष्टुः दृश्यस्य सत्तान्तः बन्ध इत्यभिधीयते ।
द्रष्टा दृश्यवशात् बद्धः दृश्याभावे विमुच्यते ॥ २०२ ॥

अहं त्वं जगदित्यादौ संशान्ते दृश्यविभ्रमे ।
संकल्पजाते गलिते स्वरूपमवशिष्यते ॥ २०३ ॥

देशाद्देशान्तरप्राप्तौ संविदो मध्यमेव यत् ।
निमेषेण चिदाकाशं तद्विद्धि मुनिपुङ्गव ॥ २०४ ॥

तस्मिन्निरस्तनिश्शेषसंकल्पस्थितिमेष्यसि ।
सर्वात्मकं पदं शान्तं तदा प्राप्नोष्यसंशयम् ॥ २०५ ॥

उदितोदारसौन्दर्यवैराग्यरसगर्भिणी ।
आनन्दस्यन्दिनी यैषा समाधिरमिधीयते ॥ २०६ ॥

कल्पं क्षणीकरोत्यन्तः क्षणं नयति कल्पताम् ।
मनोविलासस्संसार इति मे निश्चिता मतिः ॥ २०७ ॥

ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ।
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ २०८ ॥

तुणार्चकादियोगान्ता ईश्वरभ्रान्तिमाश्रिताः ।
लोकायतादिसांख्यान्ताः जीवविभ्रान्तिमाश्रिताः ॥ २०९ ॥

तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः ।
कार्या किन्तु ब्रह्मतत्त्वं निश्चलेन विचार्यताम् ॥ २१० ॥

## क्षौरविधिः ॥

आषाढ्यां पौर्णिमायां तु कारयेद्वपनं यतिः ।
चातुर्मास्याभिमासाभ्यां अन्यत्र वपनं यतेः ॥ २११ ॥

ऋतुसंधौ पूर्णिमायां संगवस्पृशि वापयेत् ।
त्रिमूहूर्ताधिकं ग्राह्यं पर्वणः क्षौरकर्मणि ॥ २१२ ॥

अयं तु मुख्यः कल्पः स्यात् द्विमूहूर्तस्तु मध्यमः ।
ततो न्यूनं न संग्राह्यं यतिभिस्तु कदाचन ॥ २१३ ॥

वेधस्तु त्रिमुहूर्तः स्यात् द्विमुहूर्तोऽथवा मतः ।
तिथिक्षये विद्धमपि पर्व ग्राह्यं मनीषिभिः ॥ २१४ ॥

मुहूर्तद्वितयं नो चेत् क्षौरादौ तु परेऽहनि ।

विद्यारण्यनिबन्धने बृहस्पतिः —

दीक्षितो यदि संन्यासी वपेत्पर्वणि पर्वणि ॥ २१५ ॥

क्षौरार्थमभ्यनुज्ञातः गुरुपादौ प्रणम्य च ।
कारयित्वा ततः क्षौरं कण्ठादुपरि वाग्यतः ॥ २१६ ॥

कौपीनं चाङ्गवस्त्रादि तीरे संस्थाप्य मृत्तिकाम् ।
केशलोमनखाः भूमौ निपतिष्यन्ति नो यथा ॥ २१७ ॥

तथा च वापयेत् पत्राण्यास्तीर्याधस्ततः सुधीः ।
भूमौ तन्निखनेत्पश्चात् स्नातुं गच्छेज्जलाशयम् ॥ २१८ ॥

हस्तांघ्रिनखवस्त्राणि शोधयेच्च मृदम्भसा ।
नाभिदघ्ने जले स्थित्वा मृत्तिकास्नानमाचरेत् ॥ २१९ ॥

आदित्याभिमुखो भूत्वा प्रवाहाभिमुखोऽपि वा ।
त्रिराचम्याथ मृत्पिण्डैः शिरो द्वादशधा पृथक् ॥ २२० ॥

शोधयेत्तत्र चैकैकं पिण्डं दक्षिणपाणिना ।
स्नायाद् द्वादशवारं च मृदमालिप्य लिप्य तु ॥ २२१ ॥

प्राणायामाः षोडशकाः कर्तव्याः क्षौरशुद्धये ।
ततो नित्यविधानेन शुद्धस्नानं समाचरेत् ॥ २२२ ॥

स्नात्वोद्धृत्य च कौपीनवस्त्राद्यादाय भस्मधृत् ।
गुरुज्येष्ठादिवपनकर्मसाद्गुण्यमाचरेत् ॥ २२३ ॥

कालदेशद्रव्यमन्त्रलोपदोषप्रशान्तये ।
प्राणायामान्यथाशक्ति प्रणवं वा जपेत्सुधीः ॥ २२४ ॥

ऋष्यादि वाचिके कुर्यादीश्वरध्यानपूर्वकम् ।
अष्टोत्तरसहस्रं वा मुच्यते भवबन्धनात् ॥ २२५ ॥

ऋषिः ब्रह्मास्य मन्त्रस्य छन्दो गायत्रमुच्यते ।
देवतास्य शिवः साक्षात् सत्यज्ञानसुखाद्वयः ।
एवं न्यासविधानेन ध्यात्वा सांबं त्र्यम्बकम् ॥ २२६ ॥

इति श्रीकाशिकापुरनिवासिना श्रीशंकरयतीन्द्रशिष्येण श्रीनीलकण्ठयतिना विरचिते यतिधर्मप्रबोधे द्वितीयांशः संपन्नः ॥

---

## अथ तृतीयांशः ॥

### ॥ गुरुपूजा ॥

श्रीगुरुं दक्षिणामूर्तिं उपसन्नाः सुरा नराः ।
येऽभवन् लोकगुरवः संप्रदायविदः स्वयम् ॥ १ ॥

ब्रह्मविद्याविलासार्थं तैः तं संपूजयेत्सदा ।
अपूजकः कथं पूज्यो भवेत्तत्पूजयेद्गुरून् ॥ २ ॥

आषाढ्यां पूर्णिमायां तु स्वात्मज्ञानप्रसिद्धये ।
कुर्यात् यतीन्द्रो विधिना गुरुपूजामनुत्तमाम् ॥ ३ ॥

नगरग्रामराष्ट्राणां शिवप्राप्त्यै शिवाश्रयाः ।
कारयेयुश्च तां पूजां स्वस्ववित्तानुसारतः ॥ ४ ॥

प्रणम्य दक्षिणामूर्तिं ज्ञानमुद्राधरं हरम् ।
नारायणं पद्मभुवं वसिष्ठं शक्तिमेव च ॥ ५ ॥

पराशरमुनिं बादरायणं तत्सुतं शुकम् ।
गौडपादं च गोविन्दयोगीन्द्रं शंकरं तथा ॥ ६ ॥

एवमन्यान्गुरून्विद्यासंप्रदायविदः पुरा ।
नत्वा संप्रार्थयेत्तत्र गृहस्थैः प्रार्थितो यतिः ॥ ७ ॥

यतिज्येष्ठैः समागम्य कनीयोभिश्च शास्त्रवित् ।
पूजोपकरणं यत्र प्राङ्मुखस्तूपसंविशेत् ॥ ८ ॥

पीठोपरि नवीनं तु वस्त्रं संस्तीर्य संयमी ।
क्षालितान् तण्डुलान् शुभ्रान् वस्त्रोपरि विकीर्य च ॥ ९ ॥

अवशिष्टं तण्डुलानां भागमादाय मुष्टितः ।
मध्ये पीठाकृतिं व्यूह्याभ्यर्चयेद्देशिकोत्तमान् ॥ १० ॥

आत्मा चाव्यक्तगायत्री परहंस इति क्रमात् ।
ऋष्याद्युच्चार्य शुध्यर्थं हंसमन्त्रं जपेद्यतिः ॥ ११ ॥

ध्यानम् —

स्फटिकममलवर्णं मौक्तिकीमक्षमाला-
ममृतकलशविद्याज्ञानमुद्राः कराग्रैः ।
विधृतमुरगकक्षं चन्द्रमौलिं त्रिणेत्रं
अमलविविधभूषं दक्षिणामूर्तिमीडे ॥ १२ ॥

अथ गुरुविन्यासक्रम उच्यते —

मध्ये महागुरुव्यूहं प्राच्यामाचार्यपञ्चकम् ।
दक्षिणस्यां गुरुव्यूहं उत्तरे व्यासपञ्चकम् ॥ १३ ॥

पश्चात्सनकमुख्यांश्च विन्यसेदेवमादितः ।
अष्टदिक्ष्वष्टविघ्नेशान् अनन्तादीन् बहिर्यजेत् ।

तद्बहिर्वह्निकोणाग्रे कर्मादौ गणनायकम् ॥ १४ ॥

॥ महागुरुप्रार्थना ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ १५ ॥

॥ यतिप्रश्नः ॥

प्रायशः प्रावृषि प्राणिसंकुलं दृश्यते स्थलम् ।
अतस्तेषामहिंसार्थं पक्षान्वै श्रुतिसम्मतान् ॥ १६ ॥

निवसाम्यत्र भवतां आनुकूल्येन सर्वथा ।
जीवांकुराणां जीवानां अहिंसाहेतवेऽपि च ॥ १७ ॥

प्राणिभिः व्याप्यते भूमिः व्यक्ताव्यक्तैः समन्ततः ।
किञ्चित्कालं वसाम्यत्र सर्वदोषप्रशान्तये ॥ १८ ॥

॥ गृहिणां विज्ञप्तिः ॥

निवसन्तु महान्तोऽत्र यावच्छक्ति मुदा वयम् ।
यावद्वार्षिकमासान्तं परिचर्याश्च कुर्महे ॥ १९ ॥

दीनानस्मान्भवन्तोऽत्र स्थित्वा रक्षन्त्वपांगतः ।
भवतामर्चनं भूतिकामानां शिवमेव नः ॥ २० ॥

इति संप्रार्थ्य गृहिणो निधाय यतिसाधनम् ।
कौपीनदोरवासांसि भस्मभस्त्रीः तथाक्षिकम् ॥ २१ ॥

मृद्दण्डकुण्डिकादन्तकाष्ठाद्यन्यद्यथार्हतः ।
सन्निधाप्य पुरो नित्यं भिक्षान्नैः परिरक्षयेत् ॥ २२ ॥

## ॥ यतिप्रणामविधिः ॥

तारेण पञ्चाक्षर्या वा नमस्कुर्याद्यतीश्वरम् ।
महेशबुध्या बहुशः नानयोर्विद्यते भिदा ॥ २३ ॥

## ॥ प्रथमभिक्षा ॥

अथ गुरुपूजान्ते भिक्षावरणे फलविशेषमाह —

प्रथमेऽहनि यो भिक्षां वृणुयात्स महाभगी ।
द्वितीयां च तृतीयां च तथा पुत्रार्थकामिनौ ॥ २४ ॥

## ॥ प्रायश्चित्तम् ॥

अन्नं पिपीलिकायुक्तं भुञ्जानोऽन्नमपक्षुतम् ।
तावन्मात्रं समुद्धृत्य प्रोक्षयेदम्भसा ततः ॥ २५ ॥

आज्याभिघारणाच्छुद्धिः भस्मक्षेपेण वा भवेत् ।
अनिवेद्य न भुञ्जीत यदाहाराय कल्पितम् ॥ २६ ॥

अनिवेद्य तु भुञ्जानः प्रायश्चित्ती भवेद्यतिः ।
शिवसाष्टशतं जप्त्वा पूजया च विशुध्यति ॥ २७ ॥

अनस्थिप्राणिसंघातं हत्वैकादशिकां जपेत् ।
हत्वा च पक्षिणः सर्वान् त्रिरेकादशिकां जपेत् ॥ २८ ॥

सर्पमार्जारनकुलशुनकोष्ट्रखरान्हयान् ।
गजादींश्च मृगान्सर्वान् हत्वा चाष्टशतं जपेत् ॥ २९ ॥

जपेदष्टसहस्रं तु क्षत्रविड्गोवधे पुनः ।
( शिवाग्निगुरुपूजाश्च योगीन्द्रद्विजभोजनम् ) ॥ ३० ॥

हत्वा शूद्रं स्त्रियं बालं शिवं पञ्चशतं जपेत् ।
जपेदष्टसहस्रं तु सच्छूद्रस्य निपातने ॥ ३१ ॥

ज्ञानाज्ञानकृतात्पापात् सर्वस्मान्मुच्यते यतिः ।
शिवध्यानात् शिवार्चायाः शिवशब्दजपेन च ॥ ३२ ॥

पिङ्गलाया इडायां तु वायोः संक्रमणं च यत् ।
तदुत्तरायणं प्रोक्तं पिङ्गलायामिति श्रुतिः ॥ ३३ ॥

इडापिङ्गलयोः सन्धि यदा प्राणः समागतः ।
अमावास्या तदा प्रोक्ता देहे देहवतां वर ॥ ३४ ॥

मूलाधारं यदा प्राणः प्रविष्टः पण्डितोत्तम ।
तदाद्यं विषुवं प्रोक्तं तापसैः तापसोत्तम ॥ ३५ ॥

प्राणसंज्ञो मुनिश्रेष्ठ मूर्धानं प्रविशेद्यदा ।
तदन्यत् विषुवं प्रोक्तं तापसैः तत्वचिन्तकैः ॥ ३६ ॥

निश्वासोच्छ्वासनं सर्वं मासानां संक्रमो भवेत् ।
इडायाः कुण्डलीस्थानं यदा प्राणः समागतः ॥ ३७ ॥

सोमग्रहणमित्युक्तं तदा तत्वविदां वर ।
यदा पिङ्गलया प्राणः कुण्डलीस्थानमागतः ॥ ३८ ॥

तदा तदा भवेत्सूर्यग्रहणं मुनिपुङ्गव ।
श्रीपर्वतः शिरस्स्थाने केदारस्तु ललाटके ॥ ३९ ॥

वाराणसी महाप्राज्ञ भ्रुवोः घ्राणस्य मध्यमे ।
कुरुक्षेत्रं कुचस्थाने प्रयागं हृत्सरोरुहे ॥ ४० ॥

चिदम्बरं तु हृन्मध्ये चाधारे कमलालयम् ।
आत्मस्थं तीर्थं उत्सृज्य बहिस्तीर्थानि यो व्रजेत् ॥ ४१ ॥

करस्थं सुमहारत्नं त्यक्त्वा काचं विमार्गते ।
भावतीर्थं परं तीर्थं प्रमाणं सर्वकर्मसु ॥ ४२ ॥

अन्यथा लिङ्गयते कान्ताभावे न दुहितान्यथा ।
तीर्थानि तोयपूर्णानि देवान् काष्ठादिनिर्मितान् ॥ ४३ ॥

योगिनो न प्रपद्यन्ते स्वात्मप्रत्ययकारिणः ।
आत्मतीर्थं परं तीर्थं अन्यत्तीर्थं निरर्थकम् ॥ ४४ ॥

चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुद्धयति ।
शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचिः ॥ ४५ ॥

विषुवायनकालेषु ग्रहणे चन्द्रसूर्ययोः ।
वाराणस्यादिके स्थाने स्नात्वा शुद्धो भवेन्नरः ॥ ४६ ॥

ध्यानयोगपराणां तु पादप्रक्षालितं जलम् ।
भावशुद्ध्यर्थमज्ञानां तत्तीर्थं मुनिपुङ्गव ॥ ४७ ॥

तीर्थे दाने जपे यज्ञे काष्ठे पाषाणकेऽपि वा ।
शिवं पश्यति मूढात्मा शिवे देहे प्रतिष्ठिते ॥ ४८ ॥

अन्तस्थं मां परित्यज्य बहिष्ठं यजते तु यः ।
हस्तस्थं पिण्डमुत्सृज्य लिहेत्कूर्परमात्मनः ॥ ४९ ॥

अत एवाह श्रीपराशरः —

यथाग्निमानयेत्युक्ते ज्वलत्काष्ठादृते स्वयम् ।
नाग्निरानीयते तद्वत् ध्येयो मूर्त्यात्मना शिवः ॥ ५० ॥

शिवध्यानानलेनैव पापसंघातकाननम् ।
क्षणाद्दग्धं भवेत्सर्वं ध्यानं तद्यदि सिद्धयति ॥ ५१ ॥

बहवः खलु रुद्रस्य ध्यानेन ब्रह्मवित्तम ।
अनायासेन संसारात् विमुक्ता भवबन्धनात् ॥ ५२ ॥

किं पुनः पापसंघातविमोक्षः शङ्करस्य तु ।

ध्यानेन जायते तस्माद्ध्यानमेव सदाभ्यसेत् ॥ ५३ ॥

नामजपतो निष्कृतिमाह —

एवं शिवध्याननामकीर्तनाद्यैर्महत्तरम् ।
पापं नाशयितुं शक्नोत्येव वेदगुरुप्रियः ॥ ५४ ॥

भिक्षास्नानजपध्यानसंध्योत्सर्गेश्वरार्चने ।
मौनप्रस्खलनेऽन्यत्र प्राणायामत्रयं चरेत् ॥ ५५ ॥

श्वषण्डकाकचण्डालपाषण्डपतितादिभिः ।
दूषितं चान्नमश्नंस्तु यतिश्चान्द्रायणं चरेत् ॥ ५६ ॥

पूयशोणितमांसैस्तु स्पृष्टं मूत्रपुरीषयोः ।
श्लेष्माश्रुरेतस्स्पृष्टं च यतिः पात्रं विवर्जयेत् ॥ ५७ ॥

आखुजम्बूकमार्जारकाकोष्ट्रग्रामसूकरान् ।
भासवानरवारस्त्रीनरास्थिग्रामकुक्कुटान् ॥ ५८ ॥

नकुलं मद्यभाण्डं च यूपकाष्ठं विधर्मिणम् ।
अपविद्धमसन्मार्गं चितिकाष्ठं चितिं तथा ॥ ५९ ॥

अमेध्यनिचयं षण्डं स्पृष्ट्वा देवलकं तथा ।
नीलवस्त्रं चाभरणं नारीणां कञ्चुलीं तथा ॥ ६० ॥

स्नात्वा द्वादश संयच्छेत् प्राणायामान्विशुद्धये ।
उपानहौ विना भिक्षुः कृत्वा भिक्षाटनादिकम् ॥ ६१ ॥

मार्गे मूत्रादिसंकीर्णे सम्यक्स्नानेन शुध्यति ।
अशक्तः प्राणरक्षार्थं पुनर्मूलफलादिकम् ॥ ६२ ॥

भक्षयन्नैव दूष्येत प्राणायामत्रिमात्रतः ।
मक्षिकाकीटमशकयूकानस्थिकजन्तुषु ॥ ६३ ॥

निहतेषु यतिः प्राणायामान् षोडशधा चरेत् ।
सुवर्णं रजतं ताम्रं तैजसं यच्च किंचन ॥ ६४ ॥

स्पृष्ट्वा परिव्राट् शूद्रं च सचेलस्नानमाचरेत् ।
कायिके दश कुर्वीत वाचिके विंशतिं तथा ॥ ६५ ॥

मानसे तु शतं चापि पातके प्राणसंयमाः ।
उक्तामुक्ताघसंघातसंभवेपि विवेकिनः ॥ ६६ ॥

स्नानं ध्यानं जपः पूजा निष्कृतिः परमा मता ।
आग्नेयं मानसं दिव्यं वायव्यं वारुणं तथा ॥ ६७ ॥

स्नानं पञ्चविधं प्रोक्तं मुनिभिः ब्रह्मवादिभिः ।
आग्नेयं भस्मना स्नानं मानसं तत्त्वचिन्तनम् ॥ ६८ ॥

वायव्यं गोरजस्स्नानमवगाहं तु वारुणम् ।
सातपेनैव वर्षेण स्नानं दिव्यमुदाहृतम् ॥ ६९ ॥

प्रायश्चित्तेषु सर्वेषु प्रायश्चित्तप्रसादतः ।
गुरौ भक्तिः शिवे भक्तिः तद्ध्यानं तज्जपो व्रतम् ॥ ७० ॥

भूतिरुद्राक्षविधृतिः सर्वपापप्रणाशनम् ।
यदि प्रस्खलितं भिक्षोरिन्द्रियं बुद्धिपूर्वकम् ॥ ७१ ॥

लक्षमेकं जपेत्तारं मुच्यतेऽघाच्छिवाग्रतः ।

श्रीपराशरः —

द्विजस्त्रीगमने भिक्षुरवकीर्णिव्रतं चरेत् ॥ ७२ ॥

कुयोनिषु तथा गत्वा रेतस्तोये विसृज्य च ।
कृच्छ्रं सान्तपनं कुर्यात्तत्पापविनिवृत्तये ॥ ७३ ॥

आस्यमैथुनशुद्ध्यर्थं चरेच्चान्द्रायणत्रयम् ।

भावमैथुनशुद्ध्यर्थं तथा कुर्यात् द्विजोत्तम ॥ ७४ ॥

सर्वपापविशुद्ध्यर्थं ध्यायेद्देवं त्र्यम्बकम् ।
साम्बं चन्द्रकलाचूडं नीलग्रीवं शुचिस्मितम् ॥ ७५ ॥

आद्ये यामे मुहूर्ते वा हृदयांभोजमध्यमे ।
जपेत्पञ्चाक्षरीं विद्यां प्रणवेन समन्विताम् ॥ ७६ ॥

विष्ण्वादिदेवताध्यानमपि पापविनाशनम् ।
शिवध्यानसमं ध्यानं नास्ति नास्ति श्रुतौ स्मृतौ ॥ ७७ ॥

तदेव सर्वपापानां प्रायश्चित्तमनुत्तमम् ।
स्वप्ने स्त्रीसंगतः स्नात्वा त्रिसहस्रं जपेन्मनुम् ॥ ७८ ॥

रात्रिशेषे यदि स्वप्ने रेतोमूत्रच्युतौ पुनः ।
स्नानं कृत्वा विशुध्येत द्वादशप्राणसंयमैः ॥ ७९ ॥

स्कन्ने ज्ञातेपि सुप्तश्चेद्दिवा स्कन्नेऽपि तेजसि ।
यदुक्तं निशि तस्यापि द्विगुणं तद्विधीयते ॥ ८० ॥

कण्डूयनक्षरणयोः श्रवणेनापि चिन्तया ।
स्नात्वा सचेलं त्रिदिनं उपोष्यैव विशुद्ध्यति ॥ ८१ ॥

संध्यातिक्रमणे भिक्षुः प्रायश्चित्तं समाचरेत् ।
प्रणवं त्रिसहस्रं वा प्राणायामांस्तु षोडश ॥ ८२ ॥

सामर्थ्ये शिबिकां मश्वं गजं तुरगमेव वा ।
शकटं वा रथं वापि समारुह्य च कामतः ।
व्रतं सान्तपनं कुर्यात् प्राणायामशतान्वितम् ॥ ८३ ॥

मार्कण्डेयः —

मूत्रोच्चारं तु यः कृत्वाऽप्यकृत्वा शौचमात्मनः ।
मोहात् भुक्त्वा त्रिरात्रं स गव्यं पीत्वा विशुद्ध्यति ॥ ८४ ॥

व्रतान्येतानि भिक्षूणां तथैवोपव्रतानि च ।
एकैकातिक्रमे तेषां कृच्छ्रं सान्तपनं तु वा ॥ ८५ ॥

आदित्यपुराणे —

एकासने चोपविश्य गुरुणा सह मूढधीः ।
प्रायश्चित्तं न तस्यास्ति पापं गुरुतरं हि तत् ॥ ८६ ॥

या शुद्धिर्गोवधे प्रोक्ता गुरोरग्रेऽनृतस्य च ।
प्राक् दत्तस्याप्रदानेन ब्रह्महत्यासमं भवेत् ॥ ८७ ॥

स्थूलानि यानि पापानि सूक्ष्माणि विविधानि च ।
तानि शातयति क्षिप्रं मुहूर्तं शिवचिन्तनम् ॥ ८८ ॥

जपाद् ध्यानात्तथा ज्ञानात् नान्यत्पापविशोधनम् ।
तस्माद्यथा तथा कुर्यात् यतिः शुद्ध्यर्थमात्मनः ॥ ८९ ॥

उपपातकिनो भिक्षोः लघ्वाहारो जपस्तपः ।
मौनं कालत्रये स्नानं विहितानि विशेषतः ॥ ९० ॥

अवशीकृतचित्तानां कृच्छ्रचान्द्रायणादिकम् ।
वशिनां ध्यानमेवैकं प्रायश्चित्तं विशिष्यते ॥ ९१ ॥

सर्वपापापनोदार्थं प्रायश्चित्तमिदं मुने ।
समाहितो जले मग्नः शिवं ध्यायन् प्रसन्नधीः ॥ ९२ ॥

अष्टकृत्वो हर इति जप्त्वा तेभ्यो विमुच्यते ।

मनुस्मृतौ —

जप्त्वाऽथर्वशिरो यस्तु ब्रह्महत्यां व्यपोहति ॥ ९३ ॥

अहिंसया च भूतानां जपयज्ञोऽघनिष्कृतिः ।
जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते ॥ ९४ ॥

सूतसंहितायां—

महादेवेति यो ब्रूयात् प्रातरुत्थाय सादरम् ।
जन्मान्तरसहस्रैश्च कृतं पापं विनश्यति ॥ ९५ ॥

ब्राह्मे मुहूर्ते उत्थाय शुचिर्भूत्वा समाहितः ।
शिवेति कीर्तयन् सर्वैः मुच्यते पातकैरिति ॥ ९६ ॥

रहस्यानां तु संन्यासः प्रायश्चित्तं तथैनसाम् ।
प्रसिद्धानां च पापानां प्रायश्चित्तमिदं तथा ॥ ९७ ॥

शिवध्यानं शिवज्ञानं शिवशब्दजपस्तथा ।
अग्निरित्यादिभिर्मन्त्रैः भस्मनैवावकुण्ठनम् ॥ ९८ ॥

रुद्राक्षधारणं भक्त्या त्रिपुण्ड्रस्य च धारणम् ।
संन्यासश्चैव पापानां प्रायश्चित्तं महत्तरम् ॥ ९९ ॥

जाबालश्रुतौ —

अथ हैनं ब्रह्मचारिणः ऊचुः । किं जप्येनामृतत्वं ब्रूहीति । स होवाच याज्ञवल्क्यः शतरुद्रीयेणेति । एतानि ह वामृतस्य नामधेयानि भवन्ति । एतैर्ह वा अमृतो भवतीति । श्रीशिवार्पणम् ॥

न स्नानं न जपो होमः स्तुतिः दानादिसाधनम् ।
नार्चनं पितृकार्यञ्च तीर्थयात्रा व्रतानि च ॥ १०० ॥

धर्माधर्मादिकं नास्ति न विधिर्लौकिकक्रिया ।
सन्त्यजेत् सर्वकर्माणि लोकाचारञ्च सर्वशः ॥ १०१ ॥

नित्यमन्तर्मुखः स्वच्छः प्रशान्तात्मा स्वपूर्णधीः ।
अन्तः सङ्गपरित्यागी लोके विहर नारद ॥ १०२ ॥ इति ।

अन्यत्र च —

निर्वैरेण समं पश्यन् द्विजगोश्वमृगादिषु ।
भावयन्मनसा विष्णुं परमात्मानमीश्वरम् ॥ १०३ ॥

चिन्मयं परमानन्दं ब्रह्माहमिति निश्चयन् ।
पिधाय बुद्ध्या द्वाराणि मनो ध्याने निवेशयेत् ॥ १०४ ॥

आतिथ्यश्राद्धयज्ञेषु देवयात्रोत्सवेषु च ।
महाजनेषु सिद्ध्यर्थं न गच्छेद्योगवित्तमः ॥ १०५ ॥

उत्क्रमकार्यमाह —

मुमूर्षुः परमो हंसः सर्वसङ्गविवर्जितः ।
सर्वकारणमीशानं हृदि ध्यायेत् प्रयत्नतः ॥ १०६ ॥

॥ पुराणाभिप्रायेण मृतिसूचनम् ॥

आदित्यमण्डले रन्ध्रं चन्द्रे खे रक्तमालिकाम् ।
श्मशानभस्मकेशांश्च नदीं शुष्कां भुजङ्गमान् ॥ १०७ ॥

यः स्वप्ने पश्यति क्षिप्रं तस्य मृत्युरुपस्थितः ।
भास्वन्तं पावकं पश्यन्नादित्यं मन्दतेजसम् ॥ १०८ ॥

मृत्युः स्यात् वत्सरादर्वाक् तस्य कश्चिन्न संशयः ।
विण्मूत्ररजतं हेम वमन् यो दशमासिकः ॥ १०९ ॥

प्रेतादीन् रञ्जितान् वृक्षान् नवमासायुरीरितः ।
अकस्मात् स्थौल्यकार्श्ये वा कार्ष्ण्यं वा यदि पश्यति ॥ ११० ॥

अष्टमासवया एव तदूर्ध्वं नैव जीवति ।
पांसुगर्तेऽथवा पङ्के पतिते पार्ष्णिखण्डने ॥ १११ ॥

सति स्वप्ने सप्तमासवया नोर्ध्वं स जीवति ।
कपोतगृध्रकाकादिः के चेत् षण्मासजीवनः ॥ ११२ ॥

गच्छेत् काकैः पांसुभिर्वा पश्येच्छायामथान्यथा ।
स चतुःपञ्च वा मासान् जीवत्यूर्ध्वं न तिष्ठति ॥ ११३ ॥

निर्मेघे दक्षिणे भागे विद्युतं यदि पश्यति ।
जले चेन्द्रधनुर्द्वित्रिमासादूर्ध्वं न तिष्ठति ॥ ११४ ॥

विशिरस्कं स्वमात्मानं दर्पणादौ यदीक्षते ।
मासप्रायः पक्षजीवी दुर्गन्धश्चेत् स्वदेहके ॥ ११५ ॥

सदा शरीरकंपश्च मस्तके धूमसंहतिः ।
जिह्वाहृच्छोषणं भूयः तस्य मृत्युरुपस्थितः ॥ ११६ ॥

कृष्णांबराः स्त्रियः कृष्णा दक्षिणां दिशमात्मना ।
अनुधावन्ति चेद्दासः शुक्लं कृष्णं च भासते ॥ ११७ ॥

नग्नमात्मानमपि वा दिवा नक्षत्रसन्ततिम् ।
नक्तमिन्द्रधनुश्चन्द्रं कृष्णं रक्तं च भास्करम् ॥ ११८ ॥

यः स्वप्ने पश्यति क्षिप्रं तस्य मृत्युरुपस्थितः ।
मुण्डिभिः पीडनं यस्य पाषाणैः ताडनं तथा ॥ ११९ ॥

यत्पुरः प्रातराक्रोशः जंबूकानां पुनः पुनः ।
शुष्कोष्ठभयकंपाद्याः स्वस्थानात् कर्णविच्युतिः ॥ १२० ॥

नासाया वक्रता कार्ष्ण्यं जिह्वाया गण्डरक्तता ।
श्वभ्रे निपतनं यस्य वह्नौ वा मृत्युहस्तगः ॥ १२१ ॥

एवमादीन्यरिष्टानि भासन्ते यस्य सुस्थिरम् ।
स भयं शोकमोहौ च त्यक्त्वैकाग्रमना दृढम् ॥ १२२ ॥

श्रीमान् भगी पुण्यशाली श्रुतिदेवगुरुप्रियः ।
धन्योऽस्म्यनुगृहीतोऽस्मि कृतकृत्योऽस्मि नित्यशः ॥ १२३ ॥

प्रयाणकालविज्ञानी ध्रुवं पशुपतिं भजे ।
इति निश्चित्य सततं सादरं भस्मलेपनः ॥ १२४ ॥

अध्यात्मे चाधिभूते वा काश्यादिक्षेत्रमाश्रयन् ।
विचित्रशक्तिं विश्वेशं ध्यायन् कालं सुखं नयेत् ॥ १२५ ॥

॥ उत्तरक्रियाविचारः ॥

ततः सिद्धिं गते तस्मिन् किं कार्यमिति संशयः ।
निर्मूलत्वात् प्रसिद्धस्यानुष्ठानस्य च सत्वतः ॥ १२६ ॥

अवस्थात्रयहीनानां यतीनां द्वादशेऽहनि ।
श्राद्धाधिकारसिद्ध्यर्थं पार्वणं तु सुतश्चरेत् ।
अहन्येकादशे प्राप्ते कुर्यात्तस्यैव पार्वणम् ॥ १२७ ॥
इति यमस्मृतिवचनात् ॥

वसिष्ठ आह —

चतुर्विधानां भिक्षूणां ज्ञातिबन्धुसुतादिभिः ।
द्वादशेऽहनि कर्तव्यं तेषां श्राद्धं तु पार्वणम् ॥ १२८ ॥

यतीनां प्रेतकार्ये तु नरकं याति पुष्कलम् ।
उदकं नात्र दातव्यं न पिण्डं श्राद्धमेव च ॥ १२९ ॥
इति वचनैः पिण्डादिनिवृत्तिः ॥

पुम्सः प्रव्रजिनः प्रोक्तं नेतराय कदाचन ।
नाशौचं नाग्निकार्यं च न पिण्डं नोदकक्रिया ॥ १३० ॥

न कुर्यात् पार्वणादीनि ब्रह्मीभूताय भिक्षवे ।
दग्धस्य दहनं नास्ति पक्वस्य पचनं यथा ।
ज्ञानाग्निदग्धदेहस्य नैव श्राद्धं न च क्रिया ॥ १३१ ॥

अथ शिष्यकर्तव्यतामाह —

यावद्दोपाधिपर्यन्तं तावत् शुश्रूषयेद्‌गुरुम् ।
गुरुवत् गुरुभार्यायां तत्पुत्रेषु च वर्तनम् ॥ १३२ ॥

तथा च श्रीपराशरः —

वेदादन्यत्र विज्ञानं नास्ति नास्ति शुभाः क्रियाः ।
अतः परमकल्याणं वेदमेकं समाश्रयेत् ॥ १३३ ॥

वेदमूलानि शास्त्राणि मन्वादीनि महान्ति च ।
पुराणादीनि सर्वाणि सादरं नित्यमभ्यसेत् ॥ १३४ ॥

वेदमूलतयान्यानि प्रवृत्तान्यपि सत्तम ।
भवन्ति वेदबाह्यार्थे कदाचिच्च क्वचित् क्वचित् ॥ १३५ ॥

भाति प्रत्यक्षवेदेन यद्विरुद्धतया शुक ।
वैदिकैस्तत्परित्याज्यं नैव ग्राह्यं कदाचन ॥ १३६ ॥

मनुः —

प्रत्यक्षमनुमानं च शास्त्रं च विविधागमः ।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥ १३७ ॥

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ १३८ ॥

एवं विवेकतः श्राद्धे कर्तव्ये भक्तिमात्रतः ।
खननाद्यखिलं सर्वं दैवं संन्यासवर्त्मना ॥ १३९ ॥

दुर्वाससोक्तविधिना यतिसंस्कारमाचरेत् ।
शास्त्रेणान्येन वा नैव स्वच्छन्दं तु कदाचन ॥ १४० ॥

अविमुक्तेऽपि वान्यत्र क्षेत्रे यतिवरं मृतम् ।
यतयो वाऽथ पुत्राद्याः स्नाप्य वस्त्रैश्च वेष्टयेत् ॥ १४१ ॥

भस्मनालिप्य सर्वाङ्गं त्रिपुण्ड्रं धारयेत्ततः ।
योगपट्टेन चाबद्ध्य पूजयेत् रुद्रमन्त्रतः ॥ १४२ ॥

भस्मरुद्राक्षभूषाढ्याः शम्भुभक्ता महत्तराः ।
रथशिक्यं समारोप्य विप्रीयुः भूतिकांक्षिणः ॥ १४३ ॥

नानावाद्यैः स्वस्तिपाठैः लाजपुष्पौघवृष्टिभिः ।
ग्रामं प्रदक्षिणीकृत्य यास्यन्ति सलिलाशयम् ॥ १४४ ॥

संन्यासः शिवलिङ्गं हि तेन तस्यार्हणा भवेत् ।
नमोन्तशिवमन्त्रेण नमस्कुर्युः शिवेप्सवः ॥ १४५ ॥

तीरेऽवरोप्य मालूराश्वत्थमूले शुचिस्थले ।
दण्डप्रमाणगर्ते त्रिः व्याहृतीभिरवीक्ष्य च ॥ १४६ ॥

प्रणवव्याहृतीभिश्च पञ्चब्रह्मैश्च वेदिकाम् ।
दर्भैरास्तीर्य परितः चेलाजिनकुशोत्तरे ॥ १४७ ॥

योगासनस्थं तं श्वभ्रे निधाय प्रणवेन च ।
वामदक्षिणपार्श्वे च दद्यात् दण्डकमण्डलू ॥ १४८ ॥

प्रजापते नत्वदेति मन्त्रयेत् हृदयं यतेः ।
भ्रूमध्यं ब्रह्मजज्ञानं ऋतं सत्यं इति स्वयम् ॥ १४९ ॥

मानो महान्तमित्यादि चतुर्भिर्मस्तकस्थलम् ।
अग्निर्मूर्धानमिति च स्पृष्ट्वा कर्ता समुच्चरन् ॥ १५० ॥

लवणैः सिकताभिर्वा ह्याकण्ठं पूरयेद्यतेः ।
नालिकेरेण निर्भिन्द्यात् प्रणवेनोच्चितेन वा ॥ १५१ ॥

अथ शैवं पदं यत्र तद्ब्रह्म ब्रह्मतत्परः ।
तदभ्यासेन लभ्येत पूर्वजन्मार्जितेन हि ॥ १५२ ॥

सभूत्यै वायुना व्याप्य हृदयं तप उच्यते ।
ऊर्ध्वं प्रवर्तते देहात् भित्वा मूर्धानमव्ययम् ॥ १५३ ॥

स्वदेहस्य तु मूर्धानं ये प्राप्य परमां गतिम् ।
भूयस्ते न निवर्तन्ते परापरविदो जनाः ॥ १५४ ॥

रन्ध्रे निक्षिप्य भसितं पूजयेत् प्रणवेन च ।
यो देवानामिति मनुं परमेश्वरवाचकम् ॥ १५५ ॥

जप्त्वा गर्तं समापूर्य वेदिं कुर्यात् सगोमुखीम् ।
अन्यथा भूमिमित्यादि मन्त्रेण तु विरुध्यते ॥ १५६ ॥

शिरःप्रहारः तेनेति केचिदाहुः न युज्यते ।
सद्यो लिङ्गं विनिर्माय रङ्गवल्याद्यलंकृते ॥ १५७ ॥

वितानतोरणैर्युक्ते मण्टपे पूजयेत् गुरुम् ।
कालाग्निरुद्रकैवल्यश्वेताश्वतरमन्त्रतः ॥ १५८ ॥

अथर्वशिरसा देवं शिखया स्तुतिमाचरेत् ।
नालिकेरकणं कर्ता समाघ्राय प्रदापयेत् ॥ १५९ ॥

गर्भिण्यः सुतकांक्षिण्यः भक्षयेयुः परे जनाः ।
स्नात्वाऽवभृथबुध्याऽथ गृहं गच्छेत् प्रसन्नधीः ॥ १६० ॥

न रुदं नाश्रुमोक्षं वा कुर्यात्कश्चित् सुतोऽपि वा ।
माधूकराशी शिष्यश्चेत् प्रत्यहं ब्रह्म तर्पयेत् ।
अन्योऽपि यः कश्चिदिह संकोचो नहि तर्पणे ॥ १६१ ॥

तर्पणमन्त्रमाह श्रुतिः —

॥ ब्रह्मस्वरूपप्रश्नस्योत्तररूपाः ॥

आत्मानं तर्पयामि, अन्तरात्मानं तर्पयामि, परमात्मानं तर्पयामि, इति तर्पयेत् ॥ १६२ ॥

अथ अङ्गिराः त्रिविधः पुरुषोऽजायत आत्मा, अन्तरात्मा, परमात्मेति ॥ १६३ ॥

तत् त्वङ्मांसलोमाङ्गुलि नखगुल्फोदर नाभिमेढ्र कट्यूरु कपोल-श्रोत्रभ्रूललाटशिरःपार्श्वाक्षीणि भवन्ति जायते क्रियते इत्येष आत्मा। अथ पृथिव्यादीच्छादिविजृंभितः कर्ता विज्ञानात्मा पुरुषोऽन्तरात्मा ॥ अथ परमात्मा यथाक्षरः उपासनीय इति श्रुतेः। तथात्रिधपुरुष-तर्पणादेव सर्वजगत्तृप्यतीत्यर्थः ॥ १६४ ॥

यतिसंस्कारतो ग्रामदेशानां नृपतेः शुभम्।
निर्माय मण्टपं तत्र शिवलिङ्गं प्रपूजयेत् ॥ १६५ ॥

एवं क्षत्रियवैश्यानां संस्कारविधिरीरितः।
कर्तुः नाशौचमुद्दिष्टं पुण्यं स्यादथ चाक्षयम् ॥ १६६ ॥

तत एकादशे वाह्नि वेदिमालिप्य गोमयैः।
नानोपहारैः बिल्वैश्च पूजयेद्गुरुमादरात् ॥ १६७ ॥

अथ पुत्रकर्तृत्वे देशान्तरयतिमरणे कृत्यविचारः —

एकादशाहमध्ये तु श्रुत्वा यतिमृतिं सुतः।
क्षौरस्नानानि कृत् ब्रह्मतर्पणं च समाचरेत् ॥ १६८ ॥

स्मृत्यन्तरे—

देशान्तरे मृतं श्रुत्वा यतिं पुत्रो विदेशगः।

कृत्वावगाह्य वपनं आत्मादीन्तर्पयेज्जलैः ॥ १६९ ॥

तत्रत्यस्य सुतस्यापि वपनं तर्पणं समम् ।
दशाहमध्ये श्रुत्वा तु प्रसंख्याय मृताहतः ।

द्वादशाहादिषु श्रुत्वा परेद्युः पार्वणं चरेत् ॥ १७० ॥

आशौचसंसर्गविषयः —

अशुचिः ब्रह्मदीक्षायां कर्तुः न क्वचिदीरिता ।
जनन्याद्यागता तत्र सापि तात्कालिकी भवेत् ॥ १७१ ॥

तथा च कर्मदीपिकायाम् —

सिद्धिं गतेऽपि पितरि संप्राप्ते सूतकान्तरे ।
कारयेत्सर्वकर्माणि तदघं नैव विद्यते ॥ १७२ ॥

स्मृतिसारे च —

सिद्धिं गते च पितरि संप्राप्ते सूतकान्तरे ।
तदघं संपरित्यज्य कर्म कुर्याद्यथाविधि ॥ १७३ ॥

आशौचमध्ये पितरि सिद्धिं प्राप्ते तु पुत्रकः ।
तदघं संपरित्यज्य सर्वकर्माणि कारयेत् ॥ १७४ ॥

याज्ञवल्क्यः —

सिद्धिं गते तु पितरि संप्राप्ते सूतकान्तरे ।
तदघं संपरित्यज्य यावत्कर्म समाचरेत् ॥ १७५ ॥

चतुर्णामपि भिक्षूणां न तत्संस्कारकर्मणि ।
आराधनान्तं पुत्रस्तु कुर्यादेवाविचारतः ॥ १७६ ॥

स्मृतिसंग्रहे —

स्वपत्न्याः प्रसवे मातुः मरणे जनके यतौ ।

सिद्धिं गते सुतेनैवोभयं कर्म समाचरेत् ॥ १७७ ॥

मातुः संस्कारकाले तु कर्तुराशौचमिष्यते ।
क्रियावसाने स्नानाच्च शुद्धिः स्याद्यतिकर्मणः ॥ १७८ ॥

गुरौ सिद्धिं गते चापि कर्तृभार्या प्रसूयते ।
आशौचान्ते तु कर्तव्यं पार्वणादि यथाविधि ॥ १७९ ॥

अन्यत्र, यतिसंस्कारमध्ये तु सूतकद्वयमापतेत् —

आशौचान्ते तु कर्तव्यं पुत्रश्चैव तु पार्वणम् ।
औरसो दत्तपुत्रश्च भ्राता च भ्रातृपुत्रकः ॥ १८० ॥

दौहित्रो भागिनेयश्च यतेः संस्कारकर्मणि ।
वपनस्नानमेतेषां षण्णामेव विधीयते ॥ १८१ ॥

इतरेषां यतीनां च स्नात्वा कर्म समाचरेत् ।

मनुः —

आशौचसमये रोगी सन्यासेप्सुः भवेद्यदि ॥ १८२ ॥

मूलमन्त्रं समुच्चार्य कर्तव्यं मनुरब्रवीत् ।

प्रतिमासमाराधनस्यावलम्बमाह —

एकसंवत्सरं भिक्षुं मासि मासि प्रपूजयेत् ॥ १८३ ॥

पुत्रस्य पार्वणं केचिद्वदन्त्यन्यस्य पूजनम् ।
उभयोः पूजनं कार्यं यावत्संवत्सरं त्विति ॥ १८४ ॥

उशन्ति मुनयः प्राज्ञाः भृग्वादीनां मतेन तु ।
मासिकाराधनस्येह प्रत्यहो न पुनः कृतिः ॥ १८५ ॥

आकर्षणे निमित्तं तु न स्मरन्ति मनीषिणः ।
आत्मान्तरात्मपरमात्मेति शिष्यस्तु पार्वणम् ॥ १८६ ॥

उपवीत्येव कुर्वीत प्राङ्मुखो भोजयेत्तदा ।
नैवाग्नौ करणं कार्यं अन्ते पिण्डत्रयं पुनः ॥ १८७ ॥

प्राचीनाग्रेषु दर्भेषु क्रमादात्मादिमन्त्रतः ।
विभक्तपुत्राणां मासिकश्राद्धाराधनविषयसंशयः उच्यते —
कनीयसा कृते श्राद्धे केचिज्ज्येष्ठस्य पार्वणम् ॥ १८८ ॥

अनिच्छन्त्यपरे पूजां यथाचारं चरेद्बुधः ।
ज्येष्ठेन तु कृते श्राद्धे कनीयान्नैव पार्वणम् ॥ १८९ ॥

पूजामेव तु कुर्वीत प्रत्यब्दं श्राद्धपूजनम् ।
पुरोक्तविदेशमरणविषयस्य विधिवाक्यमिदमुच्यते —
देशान्तरमृतं श्रुत्वा मुनिं पुत्रो विदेशगः ॥ १९० ॥

कृत्वावगाह्य वपनं तर्पयेदम्भसा मुनिम् ।
आत्मानं अन्तरात्मानं परमात्मानमित्यपि ॥ १९१ ॥

एकादशेऽहनि श्राद्धं कुर्यात्पैतृकवत्सुतः ।
एकादशाहे श्रुत्वा तु स्नात्वा वपनपूर्वकम् ।
तस्मिन्नेव दिने श्राद्धं कुर्याद्विधिबलेन च ॥ १९२ ॥

द्वादशाहादिषु श्रुत्वा परेद्युः पार्वणं चरेत् ।
अथवानन्तरे मासि मृताहे पार्वणं चरेत् ॥ १९३ ॥

तिथ्यज्ञाने पार्वणस्य शुक्लायां द्वादशीतिथौ ।
मासिकाराधनं चापि शुक्लायां न तु पार्वणम् ॥ १९४ ॥

मासाज्ञाने मार्गशुक्लद्वादश्यां पार्वणं चरेत् ।
प्रत्याब्दिकादि द्वादश्यां मार्गशीर्ष्यां चरेत्तथा ॥ १९५ ॥

दुर्मृतौ तु दशाहान्तं कृत्वा संस्कारपूर्विकाम् ।

क्रियां मार्गे सितायां तु द्वादश्यां पार्वणं चरेत् ॥ १९६ ॥

बलिं चाराधनं पश्चान्मासिकाराधनं तथा ।
वत्सरान्ते मृताहे तु पार्वणं पूजनं स्मृतम् ॥ १९७ ॥

विदेशस्थसुतस्यापि दुर्मृतौ कारणं समम् ।
मार्गशीर्षे पूजनादेरब्दान्ते पार्वणस्य च ॥ १९८ ॥

ज्ञातिबान्धवमित्रादिः यतेः संस्कृतिकृद्यदि ।
शिष्यवत्पार्वणं कुर्यात् वसिष्ठस्य वचो यथा ॥ १९९ ॥

नारायणबलिं कुर्यात् शिष्यश्चैव न पार्वणम् ।
वत्सरान्तेऽप्येवमेव मृतितिथ्यां तु पूजनम् ॥ २०० ॥

केचिदाहुः सुतस्यापि विकल्पेन जगुः परे ।
विशेषेण मृताहीति सुतस्याप्यत्र पार्वणम् ॥ २०१ ॥

प्राहुः समत्वं भिक्षूणां चतुर्णामपि पार्वणम् ।
एकादशद्वादशाहे बलिं चाराधनं समम् ॥ २०२ ॥

शिष्यादीनां सुतस्यापि वत्सरान्ते च पार्वणम् ।
आराधनं परेद्युश्च कर्तव्यमिति नित्यवत् ॥ २०३ ॥

आशौचादावनुप्राप्ते पूजामन्येन कारयेत् ।
निर्वृत्तशौचः कुर्वीत पार्वणं तु यथाक्रमम् ॥ २०४ ॥

एकादशेऽह्नि कुर्वीत बलिं श्रद्धासमन्वितः ।
द्वादशे पार्वणं चेति केचिदाहुः मनीषिणः ॥ २०५ ॥

यतीनां प्रेतकार्यें तु नरकं याति पुष्कलम् ।
उदकं नात्र दातव्यं न पिण्डं श्राद्धमेव च ॥ २०६ ॥

गोभिलः —

आशौचान्तरमालोच्य मौढ्याल्लोभाच्च पुत्रकः ।
न त्यजेद्यतिकर्माणि त्यक्तश्चेत्पतितो भवेत् ॥ २०७ ॥

मात्राशौचावसाने तु एकोद्दिष्टं चरेत्सुतः ।
आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ॥ २०८ ॥

पत्न्या सहैव संधानं कृच्छ्राचरणपूर्वकम् ।
नित्यहोमं प्रकुर्वीत पितुः पार्वणमाचरेत् ॥ २०९ ॥

॥ बलिविधिः ॥

त्रयोदशदिने मातुः षोडशं च सपिण्डनम् ।
ततो बलिं च कुर्वीत पुत्रस्त्वौपासनेऽनले ।
आराधनं च विधिवत् सोऽश्वमेधफलं लभेत् ॥ २१० ॥

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः ॥ २११ ॥

पायसं तु परित्याज्यं महागुरुनिवेदितम् ।
अप्सु वात्मविदे देयं निर्माल्यमिव सर्वथा ॥ २१२ ॥

वीरभद्रादिशपिता भक्तिभाजः शिवेतरे ।
येऽशुद्धकर्मणः शम्भोः अन्यत्र समदर्शिनः ॥ २१३ ॥

तेषामनर्हमीशस्य तत्प्रसादचतुष्टयम् ।

॥ माहेश्वरबलिः ॥

एकादशेऽह्नि पूजान्ते यद्वा तु द्वादशेऽहनि ॥ २१४ ॥

द्विजानामन्त्र्य चतुरो वाष्टौ ब्रह्मविदुत्तमान् ।
माहेश्वरबलिं कुर्वे दूर्वासोमुनिभाषितम् ॥ २१५ ॥

इति संकल्प्य विधिवत् बलिं कुर्वीत शान्तधीः ।
पाराशरमाधवीये ब्रह्मचारिसंस्कृतौ —
हरिं वा शिवमुद्दिश्य प्रदीयेत बलिं पुनः ॥ २१६ ॥ इति ।

स्नात्वा मध्यं गते सूर्ये भस्मरुद्राक्षभूषितः ।
कुलीनान् तादृशान् पीठे भवाद्यर्थे निवेशयेत् ॥ २१७ ॥

स्वगृह्योक्तविधानेन प्रतिष्ठाप्य हुताशनम् ।
ब्राह्मणानुज्ञया चापि चरुणाज्येन नामभिः ॥ २१८ ॥

पूर्वोदितैश्च स्वाहान्तैः हुत्वा कर्मान्ततः पुनः ।
शतरुद्रीयमन्त्रेण कुर्यात्पूर्णाहुतिं ततः ॥ २१९ ॥

शिवमस्त्विति पुण्याहं वाचयित्वा द्विजोत्तमान् ।
आवाहनाङ्घ्रिनिर्णेजनाम्बरस्रग्भिरर्चयन् ॥ २२० ॥

ससूपसाज्यभोज्यान्नं दत्वाङ्गुष्ठाभिमन्त्रितम् ।
भुञ्जानेष्वेष्वथर्वोक्तमन्त्रा जप्या यथार्हतः ॥ २२१ ॥

आचान्तेष्वासनस्थेषु दत्वा ताम्बूलदक्षिणाम् ।
माहेश्वरबलिं कुर्यात्तदनुज्ञापुरस्सरम् ॥ २२२ ॥

विसृज्य तान् होमशेषं भुक्तशेषं च मेलयन् ।
भवादिनामभिश्चाष्टौ बलीन् दद्यात्कुशेष्वपि ॥ २२३ ॥

बलिं संपूज्य गन्धाद्यैः यो वै रुद्र इति स्तुवन् ।
भुञ्जानो वैदिकैः सार्धं पूर्णकामो भवेत्सुतः ॥ २२४ ॥

द्वितीयशंकरो योगी यथाचीकरदंततः

SRI GNANANANDA NIKET'N,
LIBRARY,
THAPOVANAM P.O.
Pin-605756.

द्विजानामन्त्र्य चतुरो वाष्टौ ब्रह्मविदुत्तमान् ।
माहेश्वरबलिं कुर्वे दूर्वासोमुनिभाषितम् ॥ २१५ ॥

इति संकल्प्य विधिवत् बलिं कुर्वीत शान्तधीः ।

पाराशरमाधवीये ब्रह्मचारिसंस्कृतौ —

हरिं वा शिवमुद्दिश्य प्रदीयेत बलिं पुनः ॥ २१६ ॥ इति ।

स्नात्वा मध्यं गते सूर्ये भस्मरुद्राक्षभूषितः ।
कुलीनान् तादृशान् पीठे भवाद्यर्थे निवेशयेत् ॥ २१७ ॥

स्वगृह्योक्तविधानेन प्रतिष्ठाप्य हुताशनम् ।
ब्राह्मणानुज्ञया चापि चरुणाज्येन नामभिः ॥ २१८ ॥

पूर्वोदितैश्च स्वाहान्तैः हुत्वा कर्मान्ततः पुनः ।
शतरुद्रीयमन्त्रेण कुर्यात्पूर्णाहुतिं ततः ॥ २१९ ॥

शिवमस्त्विति पुण्याहं वाचयित्वा द्विजोत्तमान् ।
आवाहनाङ्घ्रिनिर्णेजनाम्बरस्रग्भिरर्चयन् ॥ २२० ॥

सद्सूपसाज्यभोज्यान्नं दत्वाङ्गुष्ठाभिमन्त्रितम् ।
भुञ्जानेष्वेष्वथर्वोक्तमन्त्रा जप्या यथार्हतः ॥ २२१ ॥

आचान्तेष्वासनस्थेषु दत्वा ताम्बूलदक्षिणाम् ।
माहेश्वरबलिं कुर्यात्तदनुज्ञापुरस्सरम् ॥ २२२ ॥

विसृज्य तान् होमशेषं भुक्तशेषं च मेलयन् ।
भवादिनामभिश्चाष्टौ बलीन् दद्यात्कुशेष्वपि ॥ २२३ ॥

बलिं संपूज्य गन्धाद्यैः यो वै रुद्र इति स्तुवन् ।
भुञ्जानो वैदिकैः सार्धं पूर्णकामो भवेत्सुतः ॥ २२४ ॥

द्वितीयशंकरो योगी यथाचीकरदंततः ।

श्राद्धव्यवस्थां तन्न्यायाद्वक्ष्ये संप्रति दैविकम् ॥ २२५ ॥

श्राद्धं तु त्रिविधं ज्ञेयं दैवं पित्र्यं च मानुषम् ।
वैश्वदेवादिकं यत्तत् दैवश्राद्धं प्रचक्षते ॥ २२६ ॥

पितॄनुद्दिश्य यच्छ्राद्धं पैतृकं तत्प्रचक्षते ।
येषां तु मरणे दत्तं मानुषं श्राद्धमुच्यते ॥ २२७ ॥

एकोद्दिष्टं पार्वणं च नान्दीश्राद्धमिति त्रिधा ।
वैष्णवं च तथा शैवमेवं श्राद्धं तदष्टधा ॥ २२८ ॥

भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च ।
मित्राय गुरवे श्राद्धं एकोद्दिष्टं न पार्वणम् ॥ २२९ ॥

कः किं करिष्यतीत्यत्राह—

वस्वादिपैतृकं धर्मलिप्सुरर्थार्थ्यनन्तरम् ।
नान्दीश्राद्धं चरेत्कामी वैष्णवं शैवमात्मधीः ॥ २३० ॥

॥ पार्वणम् ॥

वैष्णवे वृणुयाद्विष्णुं तद्वैष्णवमुदाहृतम् ।
इदं तु पार्वणं शैवं इत्याहात्रिसमुद्भवः ॥ २३१ ॥

द्वादशेऽहनि भस्माक्षभूषितः सपवित्रकः ।
संकल्प्य ब्रह्मविच्छ्रेष्ठान्यतीन्वा वृणुयाद्द्विजान् ॥ २३२ ॥

सांबायैकं शिवायैकं आत्मने चान्तरात्मने ।
परमात्मन इत्येवं वृणुयाद्वा यथाख्यया ॥ २३३ ॥

श्राद्धे भोजनीयानाह व्यासः—

अग्निहोत्रपरो विद्वान् न्यायविच्च षडङ्गवित् ।

गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः ॥ २३४ ॥

महादेवार्चनरतः वैष्णवः पङ्क्तिपावनः ।

मनुः —

वृथा संकरजातीनां प्रव्रज्यासु च तिष्ठताम् ॥ २३५ ॥

आत्मनः त्यागिनां चैव निवृत्ते नोदकक्रिया ।
नाशौचं नाश्रुमोक्षं च न दाहाद्यन्तकर्म च ॥ २३६ ॥

स्मृतिचन्द्रिकायां पारस्करः —

आत्मनः त्यागिनां नास्ति पतितानां तथा क्रिया ।
तथा सन्यासिनां चैव नाशौचं नान्यकर्म च ॥ २३७ ॥

न चाश्रुपातः पिण्डादि नैव श्राद्धादि किंचन ।

स्मृत्यन्तरे —

वृत्ते पितरि सन्यस्ते ताते च पतिते सति ॥ २३८ ॥

येभ्य एव पिता दद्यात् तेभ्यः श्राद्धं स्वयं सुतः ।

दैवश्राद्धक्रम उच्यते —

वस्त्रोपवीतगन्धाद्यैः अलंकृत्य द्विजोत्तमान् ।
पूर्वोपरिष्टात्तन्त्रेण भवाद्यैर्हविषा हुनेत् ॥ २३९ ॥

॥ पार्वणश्राद्धम् ॥

संतर्प्य स्वादुभोज्यैस्तानात्मादिभ्यः त्रिपिण्डकान् ।
दद्याद्वायसपिण्डं चाप्यैन्द्रवारुणमन्त्रतः ॥ २४० ॥

शावाशौचादिसंप्राप्तावपि काकेश्वरं बलिं ।
कृत्वाशौचान्तरश्राद्धं यदि पुत्रः समाचरेत् ॥ २४१ ॥

## ॥ आराधनम् ॥

त्रयोदशेऽह्नि कर्तव्यं यतेराराधनं पुनः ।
गुर्वर्थे चतुरो विप्रान्भवाद्यर्थे द्विजाष्टकान् ॥ २४२ ॥

अभ्यर्च्य पादौ प्रक्षाल्य नमस्कुर्वीत मन्त्रतः ।
तत्तीर्थं कलशे स्थाप्य पूजयेत्सद्य एव च ॥ २४३ ॥

सद्योमन्त्रेण विप्रांस्तान् अभ्यर्च्यावाहनादिभिः ।
संप्रार्थ्य तेषां स्वाद्वन्नं दद्यादत्यन्तभक्तितः ॥ २४४ ॥

सर्वव्यञ्जनसंयुक्तं साज्योपस्करसंयुतम् ।
परिषिच्यान्नमखिलं दद्यादापोशनं ततः ॥ २४५ ॥

भोजनान्ते पुरोक्तेन सद्योजातादिनादरात् ।
तीर्थराजं च संपूज्य यो वै रुद्र इति स्तुवन् ॥ २४६ ॥

तत्तीर्थं शिरसि स्थाप्य परिक्रम्य नमन्मुहुः ।
चरणादिमनुभ्यां च तीर्थेनासिञ्चयेत्तनुम् ॥ २४७ ॥

ऋतमित्यादिना तीर्थं प्राश्नीयुः पुण्यभागिनः ।
ताम्बूलदक्षिणाद्यैश्च विसृजेदनुव्रज्य तान् ॥ २४८ ॥

शास्त्रमज्ञस्य बहुधा विभात्येकं विवेकिनः ।
मेय एकत्र द्रष्टारः भिद्यन्ते तन्न भिद्यते ॥ २४९ ॥

## ॥ मासाराधनम् ॥

मासिकाराधनं चापि पूर्वोक्तविधिनाचरेत् ।
तद्विच्छेदेऽपि न पुनः कार्यमित्याहुरास्तिकाः ॥ २५० ॥

आकृष्यापि तथा कुर्यान्न श्राद्धं मासि मासि च ।
प्रत्यब्दं दैविकं श्राद्धं पूजनं च यथार्हतः ॥ २५१ ॥

एवं श्रुतिस्मृतिन्यायैः यतिधर्मः प्रकाशितः ।
अनुगृह्णन्तु तत्वज्ञा जनश्रेयस्करा मुदा ॥ २५२ ॥

इति श्रीकाशीनिवासि कौण्डिन्यगोत्रज भिण्डासुधाकरसूरिकुमार नीलकण्ठ-विपश्चिता परमहंसाश्रमिणा श्रीशङ्करयतीन्द्रनिजगुरुनिर्दिष्टेन विरचितोऽयं यतिधर्मप्रबोधाख्यग्रन्थः समाप्तः ॥

---

## ॥ யதி ஸம்ஸ்காரம் ॥

யதி சித்தியடைந்தவுடன் குமாரன் முதலியவர்கள் யதியின் சரீரத்தை ஸ்நானம் செய்வித்து, வஸ்திரங்களால் சுத்தி உடல் முழுவதும் விபூதிபூசி, நெற்றியில் த்ரிபுண்ட்ரம் இட்டு யோகபட்டங்கட்டி, அமரவைத்து, ருத்ரமந்திரத்தால் பூஜிக்கவேண்டும். தேரிலோ, பல்லக்கிலோ, வைத்து, விபூதி, ருத்திராட்சம் அணிந்துகொண்ட சிவபக்த பிராமணர்கள் பல்லக்கை, வாத்யங்கள் முழங்க, வேதப்பிராமணர்கள் மந்த்ர பாராயணம் செய்துகொண்டுவர, பொரி, மலர்கள் இவைகளைத் தூவிக்கொண்டு சுமந்துசென்று, ஊரை வலம் வந்து, நதிக்கரையை அடையவேண்டும் யஜமானன் க்ஷவரம் செய்துகொள்ளவேண்டும். கரையில் இறக்கி, அரசமரத்தடியில் தூய்மையான இடத்தில் பள்ளம்வெட்டி, மேடை கட்டி, தர்ப்பங்கள் பரப்பி, வஸ்திரம், மான்தோல் விரித்து அதில் பிரணவ மந்திரத்தைக்கூறி, யோகாஸன நிலையில் உள்ள அந்த சரீரத்தை வைத்து, இடது புறத்தில் தண்டத்தையும், வலது புறத்தில் கமண்டலுவையும் வைத்து யதியின் மார்பை தொட்டு प्रजापते न त्वदेतानि என்ற மந்திரத்தையும், புருவத்தின் நடுவைத்தொட்டு ब्रह्मजज्ञानं,

ऋतं सत्यं, मानो महान्, என்கிற மந்திரங்களையும், தலையின் நடுவைத்தொட்டு, अग्निर्मूर्धा, என்கிற மந்திரத்தையும் ஜபித்துவிட்டு உப்புகளால் கழுத்துவரை நிரப்பி, பிறகு மண்களால் நிரப்பி, தேங்காயினுல் பிரணவமந்திரம் கூறி, தலையை பிளக்கவேண்டும். அந்த துவாரத்தில் விபூதியை நிரப்பி, பிரணவ மந்திரத்தாலும் यो देवानां प्रथमं पुरस्तात् என்னும் மந்திரத்தாலும் வழிபடவேண்டும். பிறகு மண்களைக்கொட்டி பள்ளத்தை மூடி கோமுகத்துடன் கூடிய மேடையைக்கட்டவேண்டும். அதில் லிங்கம் வைத்து தோரணம், மேல் விரிப்பு முதலிய அலங்காரம் செய்து யதியைப் பூஜிக்கவேண்டும் காலாக்னி ருத்ரமந்த்ரம், கைவல்யம், ச்வேதாச்வதரம், அதர்வ சிரஸ் முதலிய மந்திரங்களைப் பாராயணம் செய்யவேண்டும். உடைத்த தேங்காய்த்துள்களை ஸம்ஸ்காரம் செய்தவன் முகர்ந்து பார்த்து மக்கட் பேரற்றவர்களுக்கும், கர்ப்பிணி ஸ்திரீகளுக்கும் சாப்பிடக்கொடுக்கவேண்டும் அப்படி பக்தி சிரத்தையுடன் சாப்பிட்டால் அவர்களுக்கு ஆண் குழந்தை பிறக்கும்.

பிறகு நதியில், யாகத்தின் முடிவில் செய்யும் அவபிருத ஸ்நானமாகக் கருதி, ஸ்நானம் செய்துவிட்டு தெளிவான புத்தியுடன் வீட்டிற்குச் செல்லவேண்டும். யதியின் குமாரனே, மற்றேனையரோ அழக்கூடாது. கண்ணீரும் விடக்கூடாது. தினந்தோறும் தர்ப்பணம் செய்யவேண்டும் आत्मानं तर्पयामि, अन्तरात्मानं तर्पयामि, परमात्मानं तर्पयामि, என்ற மந்திரம் கூறி. யதி ஸம்ஸ்காரத்தால் தேசத்திற்கு மங்களம் ஏற்படும். ஸம்ஸ்காரம் செய்யும் யதிகுமாரனுக்கும் மற்றேனையோருக்கும் தீட்டு கிடையாது. பதினேராவது நாளில் சாணம் போட்டு மேடையை மெழுகி அலங்கரித்து மலர்களாலும், பில்வங்களாலும் யதியை பூஜை செய்ய வேண்டும். உபவீதியாக இருந்துகொண்டு கிழக்கு முகமாக அமர்ந்து, எட்டு அல்லது நான்கு பிராமணர்களை வரித்து, மாஹேச்வர பலியைச் செய்யவேண்டும் வரித்த பிருமணர்

ளுக்கு அறுசுவை உண்டியளிக்கவேண்டும். தாம்பூலம், தக்ஷிணை கொடுக்கவேண்டும். பிறகு பலி வைக்கவேண்டும். பன்னிரண்டாவதுதினத்தில் விபூதி பூசிக்கொண்டு, ருத்ராட்சம் அணிந்துகொண்டு, பவித்ரம் போட்டுக்கொண்டு, உயர்ந்த பிராமணர்களையோ, சன்னியாசிகளையோ, ஐந்து பேர்களை வரித்து, பார்வண சிராத்தம் செய்யவேண்டும். பதிமூன்றுவது நாளில் யதிக்கு ஆராதனம் செய்யவேண்டும். பன்னிரண்டு அந்தணர்களை வரித்து, அவர்கள் காலை அலம்பி, அந்த ஜலத்தை குடத்தில் நிரப்பி, பூஜை செய்து, அந்தணர்களையும் ஆவாஹனம் முதலியவைகளால் வழிபட்டு, அறுசுவை உண்டி அளித்து, ஆபோசனம் போட்டு, சாப்பிடச் செய்தல் வேண்டும். சாப்பாட்டின் முடிவில், கலசத்திலுள்ள ஜலத்தை, மீண்டும் பூஜைசெய்து, தன் தலையில் வைத்துக் கொண்டு, ஆனந்தக்கூத்தாடி, அந்த ஜலத்தால் தன் உடலை நனைத்துக்கொள்ளவேண்டும். மீதி உள்ள ஜலத்தை ஓம் ஸத் என்று மந்திரம்கூறி, குடித்து, அருகில் உள்ளவர்களையும் குடிக்கச்செய்யவேண்டும். பிறகு பிராமணர்களுக்கு உத்தரா போசனம் இட்டு, கையலம்பச்செய்து, தாம்பூலம் தக்ஷிணை முதலியவைகள் கொடுத்து, பிராமணர்களை சந்தோஷத்துடன் சிறிது தூரம் பின் சென்று, வழி யனுப்பிவைக்க வேண்டும்.

பார்வண சிராத்தத்தில் பிராமணர்கள் சாப்பிட்ட பிறகு, ஆத்மாதிகளுக்கு மூன்றுபிண்டங்களையும், காக்கைக்கு ஒரு பிண்டத்தையும், மந்திரம் கூறி அளிக்கவேண்டும். மற்ற பிண்டங்கள் கிடையாது. மாதந்தோறும் ஆராதனம் செய்யவேண்டும். வருஷ ஆராதனமும், வருஷ சிராத்தமும், அவசியம் செய்யவேண்டும். அப்படிச்செய்தால் தேவதாப் பிரீதியும், மங்கள பரம்பரைகளும், ஸம்ஸ்காரம் செய்த யஜமானனுக்கு உண்டாகும். சுபம்.

श्रीचिदम्बरेशः शिवमातनोतु ॥

॥ श्रीगुरुभ्यो नमः ॥
॥ श्रीचित्सभेशाय मङ्गलम् ॥

# ॥ यतिधर्मप्रबोधविवरणम् ॥

## ॥ प्रथमांशः ॥

पृष्ठसंख्या-१ श्लोकसंख्या-२ *

अथ चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्तये प्रचयगमनाय च शिष्टाचारपरिप्राप्त शिवशक्त्यात्मक विशिष्टदेवतानमस्कारलक्षणं मङ्गलमादौ निबध्नाति । विश्वेशमिति । यद्यप्यस्य ग्रन्थस्य मृदुपदगुंभितत्वान्न व्याख्यापेक्षा, तथापि मन्दबुद्ध्यनुग्रहार्थमस्फुटार्थपदप्रकाशिका नाम विवृतिः क्रियते ॥

विश्वेशं सकलजगत्कर्तारं शिवमित्यर्थः । 'विश्वस्य कर्ता भुवनस्य गोप्ते'ति, 'विश्वस्य ईशानं वृषभं मतीनां' इति, 'ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानामिति', 'उतामृतत्वस्येशानः' इति, 'ईशानो भूतभव्यस्य स एव' इत्यादिश्रुतय एव शिवस्य जगत्कर्तृत्वे प्रमाणम् । तादृशं शिवशक्त्यप्रतियोगिकपरशिवस्वरूपभूतां भवानीं च वन्दे नमस्करोमीति संबन्धः । तं कथंभूतमित्यत आह—माधवमिति । 'शिवात्परतरं नास्ति शिवादन्यन्न किञ्चन', 'न सन्न चासत् शिव एव केवलः' 'शिव एको ध्येयः शिवंकरः' इत्यादिश्रुतिसिद्धसर्वोत्तरविश्वेशनमस्कारेणैव अभीप्सितलाभे किमर्थमितरदेवतानमस्कार इति चेत्-सत्यम्, माधवस्य शिवेतरत्वमपि न संभवति । 'नाम नामैव नाम मे' इतीशस्य सर्वनामवत्वं श्रुतिप्रसिद्धम् । विशिष्य 'नामानि तव गोविन्द यानि लोके महान्ति च । तान्येव मम नामानि नात्र कार्या विचारणा' इति परशिवसूक्तेः । किमुत माधवशब्दस्य शिववाचकत्वे? अपि च, 'सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः

---

*'वाग्दिनीति' विवरणमङ्गलश्लोकः मूले मुद्रितः ।

जनिताग्नेः जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः' इति, 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्राः ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैः न कारण-' मित्यादि श्रुतिभिः माधवस्य शिवांशतयांशांशिनोरभेद इति न्यायेन तदीयमपि कृतं नमः शिवस्यैव भवति। यद्वा 'विश्वमेवेदं पुरुषः। विश्वात्मानं परायणम्' इति श्रुत्या विष्णोः जगद्रूपत्वे शरीरत्वं प्राप्तम्। विश्वेशस्य विश्वस्येशो विश्वेश इति व्युत्पत्त्या शरीरित्वम्। अतश्शरीरशरीरिणोरभेद इति न्यायेन शरीरात्मकमाधवनमस्कारः शरीरिणि परमात्मनि शिव एव पर्यवस्यति। अथवा मधूयते कम्पयते शत्रून् कामादीनिति व्युत्पत्त्या माधवपदं विश्वेशस्यैव विशेषणम्। तस्मादितरदेवतानतिशंकानवकाशः॥

[1]ढुण्ढि ढुण्ढिशब्दस्य व्यापकपरतया 'आकाशवत् सर्वगतश्च नित्यः' इति श्रुतेः सर्वव्यापकमित्यर्थः। दण्डपाणिं दण्डो यमशासनरूपः पाणौ यस्य तं मृत्युञ्जयमित्यर्थः। शिवस्य मृत्युञ्जयत्वे 'यो वामपादेन जघान कालं घोरं पपौ हालहलं दहन्तम्' इति श्रुतिरेव प्रमाणम्। भैरवं 'योऽस्यान्तकाले सर्वलोकान् सजह' इति श्रुतेः प्रलयकाले भयहेतुत्वात् भैरवस्तमिति॥

एवं सर्वकारणं सर्वज्ञं विश्वेश्वरं नत्वा चन्द्रचन्द्रिकान्यायेन शिवे नित्यसमवेतां परशिवाभिन्नां पराशक्तिं नमस्करोति भवानीमिति। भवस्य पत्नी भवानीति वा, भवः संसार आङ् समन्तात् नीयते नाश्यत इति वा भवानी जरामरणादिरूपसंसारमोचिनी तामित्यर्थः। तस्याः संसारमोचकत्वे हेतुमाह— गुहामिति। गुहां सनकादिभिरन्विष्यमाणदहराकाशस्वरूपिणीं चिच्छक्तिमित्यर्थः। गुहात्वं परापश्यन्ती-मध्यमारूपत्वं, 'गुहा त्रीणि निहिता नेङ्गयन्ति' इति श्रुतेः। तस्या गुहारूपत्वे हेतुः—गङ्गामिति। गकारस्य सुखरूपत्वेन दहराकाशस्य निरतिशयसुखावाप्तिहेतुत्वात् सुषुम्ना-न्तर्गतदहरस्य चिच्छक्तिस्थानत्वेन निरूपणाच्च गं दहरं गच्छतीति गङ्गा तामिति। काशीमिति। 'चिद्धीदं सर्वं काशते चेति' श्रुत्या, काशृ दीप्तौ

---

1. ढुण्ढ अन्वेषणे इति धातोरिन्प्रत्ययः।

इति धातोश्च काशी स्वप्रकाशेत्यर्थः। तस्याः स्वप्रकाशत्वे 'बहुशोभमानामुमां हैमवती'मिति श्रुतेरेव प्रमाणत्वात्। मणिकर्णिकां मणिमया कर्णिका कर्णभूषणं यस्यास्तामिति सर्वाभरणभूषितेति यावत्। यद्वाऽस्य ग्रन्थकर्तुः श्रीकाशी-क्षेत्रवासित्वेन महाप्रलयेऽपि अनश्वरकाशीक्षेत्रस्थितान् विश्वेशादीन् नम-स्करोति— विश्वेशमिति। विश्वेशं निखिलजगत्कर्तारं लोकानुग्रहार्थं स्वय-माविर्भूतं विश्वेशमहालिङ्गमित्यर्थः। माधवं तत्क्षेत्रवासिनं बिन्दुमाधवं, ढुण्ढि ढुण्ढिविनायकं, दण्डपाणिं गणनाथविशेषणम्। भैरवं क्षेत्रपालकं, काशीं वेदलोकप्रसिद्धां पुरीं, गुहा देवैरुपसेव्यमानस्थानविशेषः। गङ्गा भागीरथी। भवानी विशालाक्षी नाम पराशक्तिः। मणिकर्णिका विश्वेशसन्निधानस्थित-गङ्गातीर्थविशेषः। एता देवताः वन्दे नमस्करोमि इत्यर्थः॥ (२)

**पृष्ठसंख्या-२ श्लोकसंख्या-३-४**

एवं शिवशक्त्यात्मकनमस्काररूपं मङ्गलं विधाय पुनश्शिवांशावतार-रूपानखिलजगद्गुरून् शंकरभगवत्पादान् नमस्कृत्य स्वात्मगुरून् नमस्करोति। श्रीकान्तमुख्येत्यादिना। महागुरुवन्दनमेव सकलतीर्थवन्दनमासी-दित्याशयः। श्रूयते हि योगशिखोपनिषदि 'गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः। न गुरोरधिकः कश्चित् त्रिषु लोकेषु विद्यते॥ दिव्य-ज्ञानोपदेष्टारं देशिकं परमेश्वरम्। पूजयेत् परया भक्त्या सम्यग्ज्ञानफलं लभेत्॥' आत्मगुरून् आत्मनः तत्वोपदेष्टारं आत्मैव गुरुरूपेणाविर्भूतमिति वा तमिति। तथा हि—'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वामिति' श्रुतेः॥ (३-४)

**पृ. सं.-२ श्लो. सं.-५, ६**

इह खलु पुण्यभूमितया प्रसिद्धहिन्दुस्थानीयमण्डलमण्डनायमान-श्रीकाशिकापुरीकृतावताराणां अनेकविपश्चित्कुलभूषणानां महाराष्ट्रभाषा-वेषवतां भिण्डोपनामकसुधाकरसूरिवर्याणां कौण्डिन्यगोत्रजानामात्मजेन

श्रीनीलकण्ठविपश्चिता विरचितायां त्रैवर्णधर्मप्रकाशिकायां पश्चात् चतुर्थमाश्रमं प्रविष्टेन मया श्रीभागवतव्याख्याकरणनिपुणेन मृदुपदललितो यतिधर्मप्रबोधाख्योऽयं निबध्यते —

यत्रेति । यस्मिन् ग्रन्थे प्रतिपादिता विद्या तुरीयाश्रमधर्मप्रकाशनरूपा ब्रह्मविद्येति लक्ष्यते, सा वैदिकमर्यादा वैदिका वेदविहिता मर्यादा विहितप्रतिषिद्धानुल्लङ्घनरूपा यस्याः सा । एतेनास्य ग्रन्थस्य तन्त्रसंबन्धाभावः, विहिताकरणप्रतिषिद्धसेवनरूपदोषाभावश्च सूचितः । अस्य निर्मूलत्वमाशंक्य निराकरोति — समूलेति । श्रुतिमूलेत्यर्थः । वेदमूलकत्वेऽपि स्मृत्यादि-विरोधः स्यादित्यत आह— उपबृंहणान्वितेति । स्मृतिपुराणरूपोपबृंहण-सहितत्वे सति वेदमूलकत्वेन उत्तमाधिकारिणामनुपादेयत्वशङ्कानवकाशः । यतीनां धर्मप्रकाशकेषु बहुषु ग्रन्थेषु सत्सु किमर्थमस्मिन् प्रवृत्तिरिति चेत्; तेषामतिगम्भीरार्थत्वेन दुरवगाहत्वादत आह — सुखबोधेति । सुखेना-नायासेन बोधः तुरीयाश्रमधर्मज्ञानं यस्यां सा सुखबोधा । अस्मिन् अधिकारि-निरूपणाभावात् प्रयासो व्यर्थ इत्यत आह — यतिसेव्येति । वेदान्त-विज्ञानसुनिश्चितार्थाःसंन्यासिनस्तैः सेव्याभ्यसनीयेत्यर्थः । पूर्वकाण्डोक्तकर्मा-नुष्ठानवतां गृहस्थादीनामपि वेदान्तविज्ञानसुनिश्चितार्थत्वसंभवेन तेषामप्यधि-कारः स्यादित्यत आह— नहीतरैरिति । इतरैः यतिभिन्नगृहस्थादिभिर्न सेव्या नाभ्यसनीया, अत्र तद्धर्माणामनुक्तत्वात् । हिशब्दो हेत्वर्थः, अवधारणार्थो वा । इह वैदिकमर्यादेत्यनेन निर्दोषत्वं सूचितम् । विद्येत्यनेन विषय उक्तः । सुखबोधेत्यनेन प्रयोजनं निरूपितम् । यतिसेव्येत्यनेन अधिकारी प्रतिपादितः, प्रतिपाद्यप्रतिपादकभावसंबन्धश्च । अनेन अनुबन्ध-चतुष्टयसद्भावेन मुमुक्षुभिः उपादेयत्वमावश्यकमिति सिद्धम् ॥ (५—६)

पृ. सं. ३ श्लो सं ७

अथ अधिकारिलक्षणं स्पष्टयति — य इति । यस्तु धर्मार्थत्रयाणां

सुखलेशाभासदुःखोत्तरत्वेन विचार्य मुमुक्षुरेव भवति । तथा च मैत्रेयोपनिषदि — 'वर्णाश्रमाचारयुता हि मूढाः कर्मानुरूपेण फलं लभन्ते । वर्णादिधर्मं तु परित्यजन्तः स्वानन्दतृप्ताः पुरुषा भवन्ति ॥' इति । निरालम्बे –'महापुरुषो यस्तद्वित् स मय्येवावतिष्ठते । अहं च तस्मिन्' इति । तस्मान्मुमुक्षुरेव गरीयान् । ततोऽपि महादेवध्याता, मुक्त्यन्तरङ्गसाधनत्वात् ध्यानस्य । 'ध्यानेन परमेशस्य साम्बमूर्तिधरस्य च । सुनिष्कलपरिज्ञानं जायते नान्यहेतुने'ति ॥ ततोपि महावैराग्यलिङ्गावाप्तिरेव गरीयसी । 'तपसो वाऽप्यलिङ्गा'दित्याथर्वणाः । पूर्वोक्तमुमुक्षुत्वशिवध्यातृत्वयोः सत्वेऽपि वैराग्यलिङ्गाभावे न साक्षान्मुक्तिः सिद्ध्यतीत्यर्थः ॥ (७)

पृ. सं.-२ श्लो. सं. ८-९

अथ प्रकृतावतरणम् —

**शिवेनेति** । पुरा किल दूर्वाससे मुनये भिक्षुलक्षणादिसंस्कारान्तविधानं शिवेनोपदिष्टं । सोऽपि तदनुसृत्य स्वशिष्येभ्यः षष्टिसहस्रसंख्याकेभ्यश्चोपदिष्टवानिति पुराणे — कथं च शैवसंन्यासविधिं चक्रे मुनीश्वरः । अत्रिपुत्रोऽथ दूर्वासाः शिष्येभ्यश्चोपदिष्टवानिति' । तदेव वचनजातं सुश्रोतॄणां शोभनार्थश्रवणरसिकानां सुखदं ब्रुवे । ननु जडभरतदत्तात्रेयरैवतकादिकर्मन्दिष्वनेकेषु सत्सु कुतः शापायुधस्यास्य मुनेः उपदेशवचनप्रपञ्चनमिति चेत्; सत्यम्, इतरोपदिष्टमपि नः पथ्यमेव । अन्यत्र एवंविधोपक्रमादिलिङ्गसाकल्याभावान्न प्राधान्येनाद्रियते इति । किं च, 'ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः । चत्वार आश्रमा एते पृथगाचारलक्षणाः ॥ एषां चतुर्णां चत्वारो मुनयोप्यवतारकाः । दधीचो गौतमोऽगस्त्यो दुर्वासाश्च यथाक्रमम् ॥' इत्यादिना तत्तदाश्रमप्रवर्तकान् त्रीन् निरूप्य 'दुर्वाससा मुनीनामन्त्याश्रमो निर्मितो हर' इति शिवसूक्त्या तदाश्रमप्रवर्तकत्वात् तदुपदिष्टार्थस्यैव हि प्रामाण्यम् । अपि च शापायुधत्वं तस्य भूषणमेव,

शिवकल्पत्वात् । ब्रह्मलक्षणं तु तस्य युज्यत एव । तस्मात् श्रुत्यनुसारिकाळीखण्डोक्तविधिना चतुर्थाश्रमप्रवेशतदाचारतत्संस्कारादिलक्षणमेवादरणीयमित्यर्थः ॥ (८-९)

**पृ. सं.-३ श्लो. सं.-१०**

अयं परमहंसधर्मो वेदान्तप्रतिपाद्यत्वात् शिवोपदिष्टत्वाच्च वैदिकसंन्यासविधिः शैवः श्रौत इत्यपि कथ्यते । अत एव ब्रह्मचार्याद्याश्रमिभिः मुमुक्षुभिरयं प्राप्य एवेत्यर्थः । ननु कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इति श्रुतेः गार्हस्थ्यादिनैव गतिप्राप्यत्वे कुतोऽन्धबधिराद्याश्रयणीयकर्मत्यागलक्षणस्यास्य गतिप्रदत्वमिति चेत्; जिजीविषेदिति श्रवणाद्देहाभिमानिन एव अनुष्ठानविधिः, न हि मुमुक्षोरिति उपरितनासुर्या नाम इत्यादितन्निन्दावचनात् व्यज्यते । अन्यत्र 'एतद्ध स्म वै तद्विद्वांस आहुः ऋषयः कावषेयाः किमर्थं वयमध्येष्यामहे, किमर्थं वयं यक्ष्यामहे, एतद्ध स्म वै तद्विद्वांसोऽग्निहोत्रं न जुहवांचक्रिरे । एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणाया वित्तैषणाया लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यंचरन्ती'ति । परत्र 'त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति सर्वे एते पुण्यलोका भवन्ति । ब्रह्मसंस्थोऽमृतत्वमेती'ति । 'अथ ह याज्ञवल्क्यस्य द्वे भार्ये' इत्यारभ्य 'याज्ञवल्क्यः प्रवव्राजे'ति श्रुतिभिः सर्वैश्वर्यतोपि पारिव्राज्यमेव साम्राज्यमिति उन्नीयते । 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवती'ति 'तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति' श्रुतिभिः संन्यास एव स्वीकर्तव्यः (१०)

**पृ. सं.-४ श्लो. सं.-११**

कर्मणा रचितान् पुत्रवित्तगृहादीन् ब्राह्मणो यथोक्तधर्मनिष्ठः वक्ष्यमाणप्रकारेण परीक्ष्य पर्यालोच्य विरक्तो भवेत् । तथा च योगशिखोपनिषदि — 'आपदः क्षणमायान्ति क्षणमायान्ति संपदः । क्षणं जन्माथ मरणं सर्वं

नश्वरमेव हि ॥ यः स्तनः पूर्वपीतस्तं निपीड्य मुदमश्नुते । यस्मात् जातो भगात् पूर्वं तस्मिन्नेव भगे रमन् ॥ एवं संसारचक्रेऽयं कूपचक्रे घटा इवेति' ॥ महोपनिषदि — 'कालोऽयं सर्वसंहारी तेनाक्रान्तं जगत्त्रयम् । दृष्टा यस्मिन् मुने मुक्ता हारस्योल्लासशालिता ॥ श्मशानेषु दिगन्तेषु स एव ललनास्तनः । श्वभिरास्वाद्यते काले लघुपिण्ड इवान्धसः ॥ केश-कज्जलधारिण्यो दुःस्पर्शा लोचनप्रियाः । दुष्कृताग्निशिखा नार्यो दहन्ति तृणवन्नरम् ॥ शैला अपि विशीर्यन्ते शीर्यन्ते तारका अपि । शुष्यन्त्यपि समुद्राश्च ध्रुवोऽप्यध्रुवजीवनः' ॥ इत्येवमादिलोकस्वभावं विचार्य वैराग्यलिङ्गं संन्यासमुपेयादेव । कृतेन कर्मणा नित्यसिद्धोऽकृतो मोक्षो न संभवति, 'नास्त्यकृतः कृतेनेति' श्रुतेः ॥

ननु अग्निहोत्रादेः श्रुतिविहितत्वात् कथमपि तदेव नः परमं श्रेय इति चेत्तर्हि श्रुतिशिरोविहितत्वादात्मदर्शनाङ्गभूतस्य चतुर्थाश्रमस्यानुपादानेऽस्य देहाभिमानिनश्चाब्राह्मण्यं हि श्रूयते वज्रसूच्याम्— 'भगवन् इदं शरीरं मैथुनादेवोद्भूतं विद्यापेतं निरयमिव मूत्रद्वारेण निष्क्रान्तं कथमात्मेति विचार्य पश्चात् ब्रह्म जानातीति ब्राह्मण इति निर्वक्ति । गार्हस्थ्ये धर्मे कृष्णकेशी यजेतेति वर्णाश्रमवयोवस्थाभ्रान्त्या केवलं कर्मणि प्रवृत्ते साधकः । भ्रान्तममुमेवोद्दिश्य धर्मचोदनाप्रवृत्तिः । वैराग्योदयपर्यन्तं तच्छास्त्र-मनुवर्तते । तथा च आहुः भाष्यकाराः — 'प्राक्च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते' इति । संन्यासानुपादाने वेदान्तविचारानवकाशतया महाहानिः श्रूयते — 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिरिति । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादिना कर्मणां विविदिषाजनकत्वात् वेदनेच्छोदये ज्ञानसाधनं संन्यास-लिङ्गमुपेयादिति ॥

(११)

पृ. सं.-४ श्लो. सं-१२

अथ शुभेच्छोदयानन्तरं संन्यासेऽधिकारं अनधिकारं मध्यमं च वक्ष्ये पुराणश्रुतिवचनैः इत्यर्थः ॥ (१२)

पृष्ठ सं.-६ श्लो सं.-१८-२०

अत्र विकलोऽङ्गहीनः शास्त्रजन्यज्ञानहीनश्च । परद्वारि वेतनार्थं परमन्दिरद्वारि प्रेष्य इवासीनः । वैखानस इति । 'ये नखाः ते वैखानसाः' इति श्रुतेः आदिपुरुषस्य नखोत्पन्नः कश्चिद्विनखो नाम मुनिः । स एव वर्णव्यत्ययेन 'हिसिधातोर्सिंहशब्दः वश कान्तौ शिवः स्मृतः । वर्णव्यत्ययतः सिद्धं पश्यकः कश्यपो यथे'तिवदत्र वैखानसो नाम तन्त्रप्रवर्तकः । विखनसार्चितेति प्रयोगदर्शनात् । तत्कृततन्त्रप्रविष्टो वैखानसो द्विजः । हरद्विजः शिवद्विज इति समयादिदीक्षाप्रविष्टः । चक्री पाञ्चरात्री । लिङ्गी वीरतन्त्रप्रविष्टः । पाषण्डी वैदिकं पन्थानं खण्डयतीति पाखण्डः । स एव पाषण्ड इत्यर्थः । शिपिविष्टः शिपिषु गवादिषु क्रयविक्रयार्थमभिमानेन तिष्ठति स तथोक्तः । भृतकाध्यापक वेतनार्थं वेदाध्यापनं करोतीति । एतेऽप्यवसानसमयेन विना क्रमसंन्यासे त्वनधिकारिण एव । तदापि तु प्रैषमात्रेण सर्वपापक्षयात् पुनः पापव्यतिकरस्य चानवकाशात् सर्वेऽप्यधिकारिण इत्यर्थः ॥ (१८ २०).

पृष्ठ. सं.-७ श्लो सं.-२१-२२

स्मर्यते च कालविशेषः । देवतानां तटाकादिप्रतिष्ठां मौञ्जिबन्धनं आश्रमस्वीकृतिं काम्यवृषोत्सर्गं च निर्गमं व्रतारम्भसमाप्ती च काम्यकर्म च वापनं प्रायश्चित्तं च सर्वस्य मलमासे विवर्जयेदिति । एवंगुणविशिष्टतिथौ संन्यासार्थं संकल्प्य कृच्छ्रचतुष्टयमाचरेत् । तत्प्रकारमाह याज्ञवल्क्यः 'एकभुक्तेन नक्तेन तथैवायाचितेन च । उपवासेन चैवायं पादकृच्छ्र उदाहृतः ॥ यथाकथञ्चित् त्रिगुणः प्राजापत्योऽयमुच्यते । प्राजापत्य

क्रियाशक्तौ धेनुं दद्याद्विशुद्धये ॥ गवामभावे निष्कं स्यात् तदर्धं पादमेव वा । अथायुतं च गायत्र्याः तिलहोमसहस्रकम् ॥' इति । संन्यासोपनिषदि —'कुर्यात् कृच्छ्राणि चत्वारि संन्यासेप्सुरनाश्रमी । आश्रमी कृच्छ्रमेकं तु कृत्वा संन्यस्तुमर्हति ॥ इति । तत्रैव निमित्तान्तरप्रायश्चित्तमाह — संन्यासे निश्चयं कृत्वा पुनर्न च करोति यः । स कुर्यात् कृच्छ्रमात्रं तु पुनः संन्यस्तुमर्हति ॥ इति । अन्यत्र 'संन्यासं पातयेद्यस्तु पतितं न्यासयेत्तु यः । संन्यासविघ्नकर्तारः त्रयस्ते पापिनो विदुः ॥' इति । तस्माद्यथार्हमात्मशुद्धिं कुर्यात् । अथाष्टौ श्राद्धकर्माणि संकल्पविधिनाचरेत् । प्रथमं वैश्वदेवान्ते श्राद्धदेवांश्च तर्पयेत् । कृच्छ्राचारानन्तरं माध्याह्निकं सर्वं विधाय पक्वान्नेन श्राद्धं करिष्यमाणः तत्पूर्वमेव वक्ष्यमाणदेवतास्तर्पयित्वा दैवसंकल्पविधिना तिलादि वर्जयन्नक्षतादिभिः श्राद्धमाचरेत् ॥ (२१-२२)

पृ. सं.-७ श्लो. सं. २३-२४

श्राद्धदेवस्वरूपानाह । श्रूयते-अथ देवर्षिदिव्यमनुष्यभूतपितृमात्रात्मेत्यष्टश्राद्धानि कुर्वीतेति । तद्विवरिष्यते । प्रथमं सत्यवसुसंज्ञकविश्वेदेवाः । ब्रह्मविष्णुमहेश्वरा दैवे । देवर्षिब्रह्मर्षिक्षत्रर्षय आर्षे । वसुरुद्रादित्या दिव्ये । सनकसनन्दनसनत्कुमारा मानुषे । पृथिव्यादिपञ्चभूतानि चक्षुरादीन्द्रियाणि चतुर्विधभूतग्रामाश्च भौतिके । पितृपितामहप्रपितामहाः पित्र्ये । मातृपितामहीप्रपितामह्यो मातृश्राद्धे । आत्मान्तरात्मपरमात्मान आत्मश्राद्धे । एवं दैवविधिना युग्मशः कुर्यात् ॥ (२३-२४)

SRI GNANANANDA NIKETAN LIBRARY, THAPOVANAM P.O. Pin-605756.

पृ. सं.- ८ श्लो. सं. २५-२६

कालदेशानुसारेण वपनस्नानपञ्चगव्यपुण्याहादिविशुद्धः द्विर्दर्भपवित्रमञ्जलिं विधाय उच्चैः "ओं ब्रह्मणे नमः" इति एवं इन्द्रसूर्यसोमात्मज्ञानसत्यानन्तसमन्वितान् जपेत् । ततस्सायमग्निं प्रतिष्ठाप्य व्याहृतीभिर्हुत्वा पुनः स्वस्वचंदादिना वा तत्तद्व्याहृत्या वा हुत्वा होमं समाप्य तच्छेषाज्यकणिकाः

आत्मने नमः अन्तरात्मने नमः परमात्मने नमः इति प्राश्याचम्य ओं भूः सावित्रीं प्रवेशयामि तत्सवितुर्वरेण्यं ओं भुवः सावित्रीं प्रवेशयामि भर्गो देवस्य धीमहि इत्यनया पदव्या व्यस्तसमस्तव्याहृतीषु गायत्रीं व्यस्तसमस्तरूपेण विलापयेत् ॥ (२५-२६)

पृ. सं.-८ श्लो. सं. २७-२९

रात्रिशेषं सन्मार्गेण क्षपयन् चतुर्थयाम उत्थाय मलजलोत्सर्गदन्तधावनस्नानभस्मोद्धूळनत्रिपुण्ड्रधारणरुद्राक्षधारणानन्तरं स्वाग्नौ संकल्पपूर्वकं चरुं निरुप्य पुरुषसूक्तषोडशमन्त्रैः विरजामन्त्रविंशतिकैश्च चरुणा घृतेन च हुत्वा समाप्य ब्रह्मणे सदक्षिणं वस्त्रं सुवर्णपात्रं धेनुं च दत्वोद्वास्य संमासिञ्चन्तु मरुतस्समिन्द्रस्सं बृहस्पतिः । संमायमग्निः सिञ्चत्वायुषा च बलेन चायुष्मन्तं करोतु मेत्युपस्थाय या ते अग्ने यज्ञि ... सक्षय एहीत्यग्निमात्मन्यारोप्य प्रातस्सन्ध्योपस्थानानन्तरं पुनः सावित्रीं व्याहृतीषु प्रविष्टां तामेव प्रणवाकारां सर्वशब्दप्रकृतिरूपां ध्यायन् यश्छन्दसामृषभो ... गोपायेति । अहं वृक्षस्य ... वेदानुवचनमिति द्वाभ्यां प्रणवात्मानं प्रार्थयेत् ॥

एवं उपनिषद्विधिं अनुसृत्य दर्शितम् । सूतसंहितायां विरजाहोम एवोक्तः, न पुरुषसूक्तहोमः । अत्र केनापि हेतुनाऽग्न्यलाभे संकोचतोऽप्सु जुहुयादिति जाबालपारिव्राज्यानुग्रहश्च । तथाहि — यद्यग्निं न विन्देताप्सु जुहुयादापो वै सर्वा देवताः । सर्वाभ्यो देवताभ्यो जुहोमि स्वाहेति । एष वा अग्नेर्योनिर्यः प्राणः प्राणं गच्छ स्वां योनिं गच्छ स्वाहेति च हुत्वोद्धृत्य तदुदकं प्राश्नीयादिति । यज्ञवैभवखण्डे तु 'सं स्वमग्नौ तु होमान्ते कुर्युः श्रद्धापुरस्सरम् । विरजाख्यैर्महामन्त्रैराज्येन चरुणापि च । हुतशेषं चरुं साज्यं प्राश्याचम्यैव सादरम् । पूर्णाहुतिं ततश्च कुर्यात् प्रणवेनाग्निजायया । सहाग्निं पुनराघ्राय अयन्ते योनिऋत्वियः । इदं मन्त्रेण कुर्युस्ते प्रैषोच्चारणमादरात् । इति ॥

पृष्ठ. सं.-८ श्लो सं.-२९-३०

जाबालश्रुतौ — 'तत्रैके प्राजापत्येष्टिं कुर्युस्तदु तथा न कुर्यादाग्नेयीमेव कुर्यात्। अग्निर्हि प्राणः प्राणमेवैतया करोति। तस्मात्त्रैधातवीयामेव कुर्यात् त्रयो वै धातवो यदुत सत्वं रजस्तम इति। परिव्राजकश्रुतौ च — 'तत्रैके प्राजापत्यामेवेष्टिं कुर्वन्ति अथवा न कुर्यादाग्नेयीमेव कुर्यादिति। हारीतः — चतुर्थमाश्रमं गच्छेत् संन्यासविधिना द्विजः। दत्वा देवपितृभ्यश्च मनुष्येभ्यस्तथैव च। दत्वा श्राद्धमृषिभ्यश्च भूतेभ्यश्च तथात्मनः॥ इष्टिं वैश्वानरीं कृत्वा प्राजापत्यामथापि वा। अग्निं स्वात्मनि संयोज्य ब्राह्मणः प्रव्रजेत् गृहात्॥ इति। मनुस्तु — प्राजापत्यां निरूप्येष्टिं सर्ववेदस्वदक्षिणाम्। आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहात्' इति। याज्ञवल्क्यः — वनाद्गृहाद्वा कृत्वेष्टिं सर्ववेदस्वदक्षिणाम्। प्राजापत्यामथाग्नेयीमग्नीनारोप्य चात्मनि' इति॥

संन्यासोपनिषदि अन्त्येष्ट्यामृत्विग्विशेषमाह — ये चास्य ऋत्विजः पूर्वं तान् वृणीत्वा वैश्वानरेष्टिं निर्वपेत्सर्वस्वदक्षिणां दद्यादिति। संवर्तकश्च — चतुर्थमाश्रमं गच्छेत् हुतहोमो जितेन्द्रियः। अग्निं स्वात्मनि संयोज्य ब्राह्मणः प्रव्रजेत् गृहात्' इति। बोधायनः — अथादित्यस्यास्तमयात् पूर्वमग्नीन् विहृत्य सः। आज्यं च गार्हपत्ये तु संस्कृत्यैतेन च स्रुवा॥ पूर्णयाह्वनीये तु जुहुयात् प्रणवेन तत्। तद्ब्रह्माधानमेवैतत् अग्निहोत्रं हुनेत्ततः॥ स्थित्वा तु गार्हपत्यस्य दर्भेषूत्तरतस्सुधीः। पात्राणि सादयित्वा तु ब्रह्मायतनमेव च॥ जागृयाद्रात्रिमेतान्तु यावत् ब्राह्मो मुहूर्तकः। एतामवस्थां संप्राप्य मृतोप्यानन्त्यमश्नुते॥ अग्निहोत्रं स्वयं हुत्वा काले प्रातरनन्तरम्। इष्टिं वैश्वानरीं कुर्यात् प्राजापत्यामथापि वा॥ इति॥

एवं च प्राजापत्याग्नेयी वैश्वानरी त्रैधातवीष्टिचातुर्विध्यस्य हीयं गतिः। तत्र प्राजापत्येष्टिः कुटीचकादिवृत्तिप्रवेशविषया। तथा च मनुस्मृति-

विहितप्राजापत्येष्टिविधानान्ते शिखादण्डादिलक्षणवचनेन निर्विचिकित्सा भवति । पुनराग्नेयीवैश्वानर्योरेकत्वम् । वैश्वानर इति गुणनाम, अग्निरिति प्रसिद्धं तत्र एकतरेण व्यवह्रियत इति व्यज्यते । तत्राग्निर्वैश्वानरो देवता पूर्णमासतन्त्रं द्वादश कपालानि निर्वापणेऽग्नये वैश्वानरायेत्यादिकपालोपधाने द्वितीयचतुर्थषष्ठाष्टमानां मन्त्राणामावृत्तिः । न पार्वणहोमः । नारिष्ठान् स्विष्टकृतं हुत्वा विरज्य प्राशित्रम् । चतुर्धाकरणे स्वांशसर्वस्वं दक्षिणां दत्वा यज्ञो बभूवेत्यादि वर्जयेत् । त्रैधातवीस्थाने पूर्णाहुतिं जुहुयात् । एवमन्त्येष्टिं समाप्याहवनीये दारुपात्राणि, पुत्रादौ तैजसाश्ममयानि, जले मृन्मयानि च निक्षिपेत् ॥

अथवा त्रैधातवीं स्वरूपतो वा कुर्यात् । तत्प्रकारस्तु—प्रव्रजिष्यन् त्रैधातवीयया यक्ष्ये इति । त्रैधातवी हविः, अमावास्यातन्त्रं, द्वादश कपालानि स्फ्यद्वन्द्वं शूर्पद्वयं इन्द्राविष्णुभ्यां जुष्टमिति व्रीहीनन्वाप्य यवाना-मप्येवमिन्द्राविष्णुभ्यामिति तथा पुनः व्रीहींश्च नानाबीजधर्मेण व्रीहियवा-नवहन्ति व्रीहीन् पिष्ट्वा यवान् पिनष्टि कपालाष्टकमुपधाय शिष्टं तूष्णीं न्यसेत् । व्रीहिपिष्टं एकस्यां समोप्यान्यपात्र्यां यवान् संवपति व्रीहिप्रथमं यवमध्यं व्रीह्युत्तरमधिश्रयति । उपर्युपरि पृथुर्भवेत् । ममाग्ने पञ्चहोता, सामिधेनीषु प्रसो मम अग्न इत्युष्णिहः ककुभौ धाय्ये भवतः इत्यादि । हिरण्यन्तार्प्यं धेनुश्च ददाति अग्नये हिरण्यम् । उत्तानस्त्वेति तार्प्यं रुद्राय गामिति धेनुम् । एवं योज्यम् । तथा च ऊर्ध्वाधःसुषिरकीचकनाळमुद्ग-मथनेन उपरिस्थायिहविर्वितयं यथा भवति तथा लौकिकोपायः कार्यः । श्रुतिः यजुषि द्वितीयकाण्डे एकादशानुवाके यो यक्ष्ये इत्युक्त्वा न यजत इत्यादिना प्रपञ्चिता द्रष्टव्या पुरोडाशत्रयस्य सकृदेवावदानमन्यद्यथासंभवं द्रष्टव्यम् ॥

एवं च कुटीचक बहूदकहंसाश्रमाणां प्राजापत्येष्टिविशेषः ।

परमहंसाश्रमस्य वैश्वानरेष्टिपर्यायाग्नेयीष्टिर्विशेषः । त्रैधातवी तु सर्वेषां समाना पाश्चात्या च भवति । तथा च यज्ञवैभवे – अतो विज्ञानलाभाय परहंसो भवेद् द्विजः । कुटीचकाश्च हंसाश्च तथैव च बहूदकाः ॥ ये भविष्यन्ति ते कुर्युः प्राजापत्येष्टिसंज्ञिनम् । आग्नेयीष्टिं द्विजाः कुर्युः परहंसाभिलाषिणः । पश्चात्त्रैधातवीं कुर्युः सर्वे संयतमानसाः ॥ येऽनाहिताग्नयो विप्राः तेषां नेष्टिर्विधीयते । इति व्यवस्थितं भवति ॥

पृ सं.–८ श्लो सं.–३० ३१

आतुर औपासनानन्तरं व्याहृतीभिश्चतसृभिः स्वाग्नौ हुत्वा पुनरों स्वाहेति च हुत्वोपस्थाय संमासिचत्विति या ते अग्न इत्यग्निमाजिघ्रेत् । आहिताग्निरिष्टिद्वयस्थाने पूर्णाहुतिमाहवनीये हुत्वा पूर्वोक्तमन्त्रेण उपस्थायाग्निं आजिघ्रेत् ॥

पृ. सं.–८ श्लो. सं –३२

उत्सृष्टानुगताग्नीनामपि विधुरवत् होममात्रं कार्यं नारोपणम् । होम एवेत्यवधारणेन यथोक्तहोमानुपपत्तौ पूर्णाहुत्या वा समाधानं कार्यम् । अग्न्यलाभे सन्धानानवकाशेऽपि जलेन प्रतिविधेयं श्रौतमन्त्रतः । तत्प्रकारः – किञ्चित् स्थालीजलं हस्ते गृहीत्वा एष वाऽग्नेर्योनिर्यः प्राणः प्राणं गच्छ स्वाहा आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहेति हुत्वा तस्मिन् पात्रजले स्थालीजलशेषेण पुत्रैषणा वित्तैषणा दारैषणा मया त्यक्ता स्वाहेति जुहुयात् । अभयं सर्वभूतेभ्यो मत्तस्स्वाहेति प्राश्नीयात् । अनेनैवातुरस्याङ्गपरिसमाप्तिर्भवति ॥

पृष्ठ सं.–९ श्लो सं.–३३–३४

अत्र केचित् प्रैषमन्यैर्विभज्योदीर्यमाणं कर्ता समुच्चरेदिति मन्यन्ते । तत्प्रमाणमन्वेषणीयम् । स्वयमेव विद्वानुच्चरेत् । अशक्तश्चेत् स्वयाजकेनान्येन

केनचित् महापुरुषेण वा बोधितो ब्रूयात् । अन्यथा संसारच्युतिभीरुभिः बहुभिरुक्तमन्त्रस्यानादरणीयत्वमेव । आदरणीयत्वे तु पुनर्दण्डादि को दद्यादिति संशयो भवति । संन्यासाश्रयुणा दत्तं दण्डं काषायमेव वा । परिगृह्येत्यादि-वचनानुरोधेनाचार्यमुखेन स्वेन वा समुच्चरेत् । ओं भूः संन्यस्तं मया ओं भुवः ओं सुवः ओं भूर्भुवस्सुवः संन्यस्तं मया इति चतुर्धा, त्रिधा वा मन्द्रमध्यमतारध्वनिभिः स्वयमुच्चरेत् । परिव्राजके व्यस्तसमस्ताभिश्चतसृभिः सममेकवारप्रैषमन्त्रावर्तनेन मन्त्रस्य चतुरावृत्तिर्भवति । संन्यासोपनिषदि तु — ओं भूस्स्वाहेत्यप्सु वस्त्रकटिसूत्रादि विसृज्य संन्यस्तं मयेति त्रिवार-मभिमन्त्रयेदिति विधिः श्रूयते । तस्मादुभयमपि कालाद्यनुरोधेन विधिरेव भवेत् ॥

किं च जलाग्न्यादिभिरत्यन्तविपन्नस्य प्रैषस्मृतिमात्रेणापि संन्यास-स्साङ्ग एवेति श्रूयते । यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत् । एष पन्था ब्रह्मणो ह्यनुवित्तस्तेनैति संन्यासी ब्रह्मविदिति । अङ्गिराश्च — आतुराणां तु संन्यासे न विधिर्नैव च क्रिया । प्रैषमन्त्रं समुच्चार्य संन्यासं तत्र पूरयेदिति ॥

**पृष्टसंख्या-९ श्लोकसंख्या-३५-३७**

अथ क्रमसंन्यासे विशेषमाह — व्याहृतीः प्रणवावयवेष्वकारादिषु अं भूः, उं भुवः, मं सुवः, इति विलाप्य प्रैषमन्त्रमादित्याभिमुख ऊर्ध्व-बाहुरुच्चरन् पुत्रैषणा वित्तैषणा दारैषणा मया त्यक्ता स्वाहेति अभयं सर्व-भूतेभ्यो मत्तः स्वाहेति वाचामेव । तारेण उपवीतमुन्मुच्य बहिर्न निवसे त्यमन्तः प्रविश्य मध्ये ह्यजस्रं परमं पवित्रं अथो बलं ज्ञानवैराग्यमेधास्सत्त्वस्य शुद्धिं सततं मे प्रयच्छेति छित्वा जले निक्षिप्य शिखां प्रणवेन छित्वा कटिसूत्रादि च, जातरूपधरश्चरेत् । श्रूयते हि विद्वान् प्रैषोच्चारणं कृत्वा प्रणवार्थैकध्यानपरायणः सन्नभयं सर्वभूतेभ्यो मत्तः स्वाहेति ऊर्ध्वबाहु-र्ब्रह्माहमस्मीत्युदीचीं दिशं गच्छेत् जातरूपधरश्चरेदिति ॥

**पृष्ठसंख्या-९ श्लोकसंख्या-३८**

एवमुक्तप्रकारेषु येन केनापि विधिना संन्यस्तं द्विजं दृष्ट्वा लोकप्रकाशकोऽपि भास्करः, एष मन्मण्डलं भित्त्वा कदापि ब्रह्मादिलोकं गमिष्यतीति बिभेति । अत एव सांप्रतं सर्वे पितरः तृप्ता भवन्ति, तत्कुलमेव पावनं, तत्पितरौ हि लोकोत्तराविति प्रशंसन्ति श्रुतयः । षष्टिं कुलान्यतीतानि षष्टिमागामिकानि च । कुलान्युद्धरते प्राज्ञः संन्यस्तमिति यो वदेत् । ये च संतानजा दोषा ये दोषा देहसंभवाः । प्रैषाग्निर्निर्दहेत् सर्वं निष्टप्तमिव काञ्चनम् ॥ इति ॥

**पृ. सं.-९ श्लो. सं.-३९**

अथवेति । उक्तविधज्ञानवैराग्याभावे सत्यचार्यात् स्वानुरूपदण्डाद्युपकरणानि गृहीत्वा वेदान्तश्रवणं कुर्यात् । श्रुतिश्च-कौपीनाच्छादनदण्डादि स्वशरीरोपकाराय लोकोपकाराय वा परिगृह्णीयात् । स च न मुख्योऽस्ति पुनः को मुख्य इति चेत् न दण्डं न कौपीनं इत्यतीतवृत्तावेव श्रुत्यभिमतः । असम्यक्ज्ञानिनां विविदिषास्तित्वात्तानि गुरुमुखात् स्वीकृत्य शृणुयात् । कस्यचिद्वेदान्तश्रवणे लब्धेऽपि विक्षेपकार्यानिवृत्तेर्विद्यासुखप्रतिबन्धेऽप्यापातानुभवश्चेत् विहितोपकरणग्रहणवानुसन्धानं वेदान्तप्रवचनं वा कुर्वन् तन्मयो भवेत् । अयमेव हि शिष्यायोपदेष्टा भवति । नातीतवृत्तिर्न हीनवृत्तिश्च । तस्मात् स एव गुरुर्भवति ॥

**पृष्ठसंख्या-९ श्लोकसंख्या-४०**

ये तु परापरविद्यावन्तः; चर्याक्रियायोगज्ञानमार्गान् भुवि विशदीकर्तुमाचार्यभावेनावतीर्णाः अत एव शिवमैहिकामुष्मिकसकलमङ्गलं सज्जनानां कुर्वन्तः तेषामाचार्यवराणां रथगजतुरगपीठच्छत्रचामरमञ्जूषादूतभटभृत्यवादित्रादि लोकहितत्वेन भवितव्यम् । परथाऽस्य लोकस्य अयमीदृग्विध इति महापुरुषचरणप्रपत्तनं कथं भवेत्? ननु कौपीनयुगलं कंथा दण्ड एकः

परिग्रहः । यतेः परमहंसस्य नाधिकं तु विधीयते । इति श्रुतेरधिकपरिग्रहस्य प्रत्यवायश्रवणात्, कथं यानादिसंपत् ? कथं चाचार्यत्वम् ? इति चेत् सत्यम्; यथा विविदिषासंन्यासस्य स्वस्यैकस्य मुक्तिहेतोः विद्वत्संन्यासलक्षण-संकोचता; एवं प्रजाबहुलस्यानुग्रहार्थमवतीर्णानां श्रीशङ्करभगवत्पादीयानां गुरूणां यानादिसंपत् न्याय्यैव । 'भूपतिर्मृगयावृत्त्या देवेन्द्रो वाद्रिशिक्षया । विधिर्विषमसृष्ट्या वा हरिश्चासुरनिग्रहात् ॥ रुद्रः परो वा न भुवि निन्द्यते नैव हीयते । आकाशवन्मान विदूरगोऽहमादित्यवद्भास्यविलक्षणोऽहम् । अंभोधिवत् पारविवर्जितोऽहमहार्यवद्धैर्यविनिश्चलोऽह'मिति निश्चयवतां 'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इति न्यायाद्यानादिपरिग्रहोऽनुग्रह एव । परं तु स्रगन्धमाल्याङ्गनाकलत्रादि त्याज्यमेवेत्यर्थः ॥

**पृ. सं.-१० श्लो. सं -४१**

अत्र श्रुतिः — पादादिमस्तकप्रमाणमव्रणमकाकपृष्ठं सलक्षणं वैणवं दण्डमेकमाचमनपूर्वकं 'सखा मे गोपायौजस्सखायोसि । इन्द्रस्य वज्रोसि वार्त्रघ्नः शर्म मे भव यत् पापं तं निवारये'ति दण्डं परिग्रहेदिति ॥

**पृ. सं-१० श्लो. सं-४२-४४**

संप्रदायतो दण्डलक्षणमुच्यते — अंगुष्ठमात्र स्वांगुष्ठस्थौल्यमानं चतुर्भिः षड्भिः अष्टभिर्वा पर्वभिरलंकृतं पुरुषमानोन्नतं भ्रूमानं नासाग्रमानं वा प्रतिपर्वमवान्तरदेशसाम्यं भवेत्तत्र प्रथमपर्वदेशादधःकाण्डं चतुरंगुलं चेदुत्तमं त्र्यंगुलं मध्यमं, द्व्यङ्गुलमधमं वदन्ति । किञ्च यावान्मूलकाण्डभागस्त-द्द्विगुणोऽग्रभागो भवेदिति च । इत्थंभूतस्समाननाळो वेणुः स्वयमेव भूमेः उत्पन्नो भवेन्नहि वेण्वन्तरपर्वसमुत्पन्नः । तत्र पर्वसंख्यया संप्रदायाभिज्ञानार्थं नाम कुर्वन्ति । अपरे तु दण्डधारणमेव श्रौतं कार्यं संप्रदायाभिज्ञानार्थं मुद्राश्च भवेयुः । किमनेन सांकेतिकेन नाम्नेति मन्यन्ते ॥

**पृ. सं-१० श्लो. सं-४५-४६**

गौर्यादीति । तत्तन्मठप्रसक्तगौरीपुरवनारण्यतीर्थ श्रीमनुभारतीत्यादि-पदभेदैः दण्डमुद्राश्च भिद्यन्ते । तस्मादाचार्यमुखेन शास्त्रैकदेशमनुसृत्य मुद्रितं दण्डं परिगृह्णीयात् । दण्डं त्रिधा विभज्य तृतीयभागतो मूले नाग-मुद्रा धेनुमुद्रा च । सर्पवत् वक्रसूत्रं विन्यस्य पञ्चग्रन्थि धेनुमुद्रा । अञ्जलि-कराग्रवत् सूत्रत्रयं विन्यस्य त्रिग्रन्थिः । तदुपरि धवलवस्त्रखण्डमावेष्टय पञ्चसूत्रग्रन्थिः । तदुपरि परशुमुद्रा प्रसिद्धा । तदधस्तात् धौतवस्त्रवेष्टित-शंखिन्या ऊर्ध्वं पद्ममुद्रा पंक्तिशो वेष्टनमात्रं भवति । इत्थं पञ्चमुद्रा भवन्ति । परशुमुद्रा षोडशधा द्वादशधा वा गुणितया वस्त्रपाल्या सूत्रेण बध्नीयात् । नागादिमुद्रात्रयस्य विधानं तु 'कार्पाससूत्रयुग्मेन सव्यासव्यकृतेन तु । ग्रन्थि वारत्रयोपेतं कृत्वा मुद्रा भवन्ति हि ॥' तथा च 'पञ्चमुद्राकसद्दण्डं बिभर्ति गुरुराट् शिव ।' इत्येकादशरुद्रसंहितायाम् ॥

**पृ. सं-१० श्लो. सं-४७-५१**

दण्डस्य चात्मनः संस्पर्शरूपसंबन्धः सर्वदैव भवेत् । तथापि भोजनजलमलमोचनादिशारीरावश्यकक्रियाकालेषु पीठादिषु पूर्वाग्रमुत्तराग्रं वा स्थापयेत् । गमने गव्यूत्यन्तरे न दोषः । न नदीं तरेत् । किञ्चालम्बन-यष्टिवत् भूमौ न निक्षिपेत् । शोषणार्थं वस्त्रादौ न निक्षिपेत् । जन्तून् न प्रहरेत् ॥

**पृ. सं-१०-११ श्लो. सं. ५२-५४**

शूद्र इति । दण्डः शूद्रस्पृष्टो लंघितो वा मलविसर्गादिकृतात्मना स्पृष्टोऽपि स्वशरीरशुद्ध्यनन्तरं दण्डवटवस्त्रयुतस्नानात् शुद्धो भवतीत्यर्थः ॥

**पृ. सं-११ श्लो. सं-५५**

दारु, मृत्, अलाबु, वेणुरिति द्रव्यविशेषाः प्रसिद्धाः । एत-

द्विकारा एव यतेर्जलपात्राणि भवेयुः। यद्यपि 'न धातुस्पर्शनं कुर्यादि'ति श्रुतेः लोहमयानि सर्वपात्राणि निषिद्ध्यन्ते, तथापि कर्मन्दिनः कमण्डलु-भ्रंशे पुनराजनपर्यन्तं शौचाचारभङ्गः, गृहिणां जीवनभङ्गभयं लौकिकं च भवतीत्येकमुदपात्रं धातुमयमस्त्विति केचन मन्यन्ते ॥

**पृष्ठ सं-११ श्लो सं-५६-६०**

**॥ गायत्र्यर्थविवरणम् ॥**

पञ्चार्णस्सप्रणवपञ्चाक्षरः। आत्ममनुर्हंसमन्त्रः। त्रिकालेष्वपि गायत्रीं सार्थमनुसन्धाय जपेत्। तत्प्रकारं सूत आह — 'यो नोस्माकं धियश्चित्ता-न्यन्तर्यामिस्वभावतः। प्रचोदयात् प्रेरयेच्च तस्य देवस्य सुव्रताः॥ दीप्तस्य सर्वजन्तूनां प्रत्यक्षस्य स्वभावतः। सवितुः स्वात्मभूतं यद्वरेण्यं सर्वजन्तुभिः॥ भजनीयं द्विजैः भर्गः तेजश्चैतन्यलक्षणम्। तच्छब्दवाच्यं सर्वज्ञं जगत्सर्गादि-कारणम्। नीलग्रीवं विरूपाक्षं साम्बमूर्त्युपलक्षितम्। आदित्यदेवतायाश्च प्रेरकं परमेश्वरम्॥ आदित्येनापरिज्ञातं वयं धीमह्युपास्महे। इत्यर्थज्ञस्सदा योगी गायत्रीमात्रजापकः॥ स्वगृहे वाथ बन्धूनां भिक्षामादाय नित्यशः। काषायवाससी भस्म रुद्राक्षांश्च प्रधारयेत्॥ स्नानं त्रिषवणं लिङ्गाराधनं जपशीलता॥' इति वचनानि सन्ति॥

**पृ. सं-१२ श्लो. सं-६९**

ज्योतिर्लिङ्गमिति। योगबलेन मानसपूजाविषयं। तस्य मनोवशाभावे तद्वशीकरणार्थं बाणलिङ्गादि पूजयेत्। श्रूयते हि हंसपरमहंसयोः मानसार्चन-मिति। तथा च भगवान् पराशरश्चाह — 'विग्रहो देवदेवस्य विश्वमेत-च्चराचरम्। इति ज्ञानं परा पूजा शिवस्य महती हि सा॥ योगिनामेव सा पूजा मङ्गला सार्वकालिकी। अयोगी तत्प्रसिद्ध्यर्थं कुर्याल्लिङ्गे शिवार्चनम्॥' इति। तस्मात् चतुर्णामपि भिक्षूणां यथाधिकारं शिवार्चनं कार्यमेव। साक्षा-द्वेदान्तवाक्यानां श्रवणं मननं तथा। निदिध्यासनमाचार्यपरिचर्याप्रियेण तु। परहंसस्य धर्मोऽयं विशेषेण समीरितः॥'

## पृ. सं-१३ श्लो. सं. ७२-७३

एवं चतुर्णामपि भिक्षूणां ज्ञानतत्साधनाभ्यासाविरोध्याचारो लोकवेदसिद्धोऽप्यनुष्ठेयः । तथा च महोपनिषदि — यस्य सौम्यसमाचारः सन्तुष्ट इति कथ्यते । रमते धीर्यथाप्राप्ते साध्वीवान्त पुराजिरे ॥ यथाशास्त्रं यथादेशं यथासौख्यं यथाक्षणम् । यथासंभवसत्संगमिमं मोक्षपदं विदुः ॥ इति ।

## पृ. सं-१३ श्लो. सं. ७४-७५

यथाविध्युपसदनेन सद्गुरुरुपदेक्ष्यत्येव हि । तथा च श्रुतिः — 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं । तस्मै स विद्वान् उपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय ।' तथा च दूर्वासाः परितुष्टो गुरूवरो भस्मालेपनपूर्वकम् । मनोज्ञमण्टपे स्थाप्य शिष्यं ध्यानसुनिश्चलम् ॥ इत्यादि । सूत आह—चन्दनागरुकर्पूरप्रमुखैः पूज्य देशिकम् । त्रिसहस्रं सहस्रं वा द्विसहस्रमथापि वा ॥ उत्तमं काञ्चनं दद्याद्यथाशक्ति धनं तु वा । बहुशो दण्डवद्भूमौ प्रणम्य श्रद्धया सह ॥ अधीहि भगवन् ब्रह्मेत्येवं विज्ञापयेत् सुधीः । सोऽपि कारुणिकः श्रीमान् गुरुस्सर्वार्थवित्तमः । सुसमे शुभदेशे तु निर्जने निरुपद्रवे ॥ पूर्णकुम्भैश्च दीपैश्च धूपैर्दिक्षु समन्विते । वितानतोरणैर्युक्ते गोमयेनोपलेपिते ॥ आलिख्य मण्डलं साक्षात् गुरूक्तेनैव वर्त्मना । इत्यादि । अतो गुरुः देशकालशिष्यचित्तपाकञ्चालोच्य प्रथमं वेदसारं प्रणवं सार्थमुपदिशेत् । स चैकोऽपि बहुधा श्रूयते — सर्वाधारः परं ज्योतिरेष सर्वेश्वरः प्रभुः । सर्वाक्षरमयः कालः सर्वदेवमयश्शिवः ॥ सर्वश्रुत्यर्थ ओंमृग्यस्सकलोपनिषन्मयः । तदप्योङ्कार एवात्र ब्रह्मशब्देन वर्ण्यते ॥ तदलक्षणमग्राह्यमव्यवहार्यमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स ब्रह्मप्रणवो विज्ञेय इति । परावाग्रूपो योगिभिः कथमपि ध्येयः स्वानुभवैकवेद्यः । परापश्यन्त्योरेकत्वमेव । मध्यमारूपस्त्वव्यवहार्योऽपि व्यवहार्ययोर्वर्णसंक्लृप्ति-

विशिष्टः कथञ्चित् उपासकैश्चिन्तनीयः । अन्यो वैखरीरूपावतारोद्योगी सोऽहंमन्त्रार्थभूतः केवलनादात्मको मुद्राविशेषाच्च व्यज्यते । अथ चतुर्थस्तु सर्वव्यवहारयोग्यस्संभवति । एतेषु यथाधिकारमुपदिशेत् । तस्यार्थं श्रुतिरेव विवृणोति ॥

**पृ सं.-१३ श्लो. सं.-७६**

अस्योपबृंहणं वायुसंहितायां— यं वेदादौ स्वरं प्राहुः वाच्यवाचकभेदतः । वेदैकवेद्यं याथार्थ्याद्वेदान्ते च प्रतिष्ठितम् । स एव प्रकृतौ लीनो भोक्ता यः प्राकृतो मतः ॥ तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः । तदधीनप्रवृत्तित्वात् प्रकृतेः पुरुषस्य चेति । वेदादिरिति । ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकाविति । वेदान्ते इति । प्रतिपाद्यप्रतिपादकयोरभेदोपचारात् लक्षणया प्रतिपाद्यं परं ब्रह्म वेदान्ते च प्रतिष्ठितम् । तस्य प्रकृतावविद्यायां प्रतिबिम्बभावेन लग्नस्य प्रकृतस्य पुरुषस्य यः परः नियन्तृत्वेनेष्टः । 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इति श्रुतेः । य एवंभूतः स परमेश्वर इत्यर्थः । प्रणवं ह्यीश्वरं विद्यादिति श्रुत्या प्रणवेशयोर्नास्त्यन्तभेदोऽस्ति । यज्ञवैभवे—उमार्धविग्रहो देवो रुद्रः सत्यादिलक्षणः । संसारतारकस्यास्य प्रणवस्यार्थ उच्यत इति । प्रणवादपरं जप्त्वा कदा मुक्तो भविष्यति । इति बहुशः सन्तीत्यर्थः ॥

**पृ. सं-१३ श्लो. सं-७७**

पूर्वमेव शैवषडक्षरी मनोस्तारकत्वाल्लब्धमन्त्रस्य न पुनः तमुपदिशेत् । नो चेद्दुष्पदेयमित्याह — षडिति । षडक्षरमिति । समस्तासु च विद्यासु श्रुतिरेका विशिष्यते । रुद्रैकादशिनी तस्याः तस्याः पञ्चाक्षरी परा । तस्याश्चोत्तममेवाहुः शिव इत्यक्षरद्वयम् ॥ इति । किञ्चास्य निरतिशयतारकत्वं श्रूयते । नातस्तारकः परमो मन्तस्तारकोऽयं शैवो मनुः शैवो मनुस्तारकः 'अयमेवोपदिश्यते मनुरविमुक्ते स एष ब्रह्मोपदेश इति' । इत्थंप्रभावे मन्त्र-

मुपदिश्यान्तर्लिङ्गमभिनयेन सूचयन् बाह्यं बाणलिङ्गं च दद्यात् । कालीखण्डे-प्रणवाख्यं परं ब्रह्म ऋषिश्छन्दोधिदैवतम् । त्रिमात्रं दक्षिणे कर्णे सार्थं तस्य वदेत् गुरुः ।। चतुर्वेदमहावाक्यमर्थेन सह धीमते । पञ्चीकरणवाक्यानि सानुष्ठानानि दापयेत् ॥ पुनर्दद्याद्योगपट्टं शिवनाम यथाविधि । संप्रदायानुरूपेण लिङ्गं माहेश्वरं दिशेदिति ।। यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वा ऋच्छतीत्यादि ॥

पृ सं-१२ श्लो. सं-७८

अथ श्रीशिवशुकमुनिसंवादरूपं रहस्योपनिषत्सिद्धं महावाक्योपदेशजपप्रकारमाह मूलश्रुत्या । हंस ऋषिः । अव्यक्तगायत्रीच्छन्दः । परमहंसो देवता । हं बीजम् । सः शक्तिः । सोऽहं कीलकम् । सत्यं ज्ञानमनन्तं ब्रह्म । नित्यानन्दो ब्रह्म । नित्यानन्दमयं ब्रह्म । यो वै भूमा यो वै भूमाधिपतिः । एकमेवाद्वितीयं ब्रह्म । इति कराङ्गेषु विन्यसेत् । ध्यानम्—नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् । एकं नित्यं [1] विमलमचलं सर्वधीसाक्षिभूतं भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ।। प्रज्ञानं ब्रह्म । अहं ब्रह्मास्मि । तत्त्वमसि । अयमात्मा ब्रह्म ।

तत्पदमन्त्रस्य पूर्ववत् ऋष्यादि । न्यासस्तु तत्पुरुषेशानाघोरवामदेवसद्योजाततत्समष्टिभिः कराङ्गयोर्न्यसेत् । ज्ञानं ज्ञेयं ज्ञानगम्यादतीतं शुद्धं बुद्धं मुक्तमप्यव्ययञ्च । सत्यं ज्ञानं सच्चिदानन्दरूपं ध्यायेदेवं तन्महो भ्राजमानम् ॥

त्वंपदस्य विष्णुः गायत्री परमात्मा । ऐं बीजं क्लीं शक्तिः सौं कीलकम् । वासुदेवाय अङ्गुष्ठाभ्यां नमः । संकर्षणाय तर्जनीभ्यां नमः । प्रद्युम्नाय मध्यमाभ्यां नमः । अनिरुद्धाय अनामिकाभ्यां नमः । वासुदेवाय कनिष्ठिकाभ्यां नमः । वासुदेव संकर्षण प्रद्युम्नानिरुद्धेभ्यः करतल-

---

1 सततम् ।

करपृष्ठाभ्यां नमः । जीवत्वं सर्वभूतानां अखण्डानन्दविग्रहम् । चित्ताहंकार-यन्तारं जीवाख्यं त्वंपदं भजे ॥

असिपदस्य नारदः गायत्री-अर्धनारीश्वरः । अव्यक्तादि बीजं नृसिंहः शक्तिः । परमात्मा कीलकम् । पृथिवीद्व्यणुकाय अङ्गुष्ठाभ्यां नमः । अब्द्व्यणुकाय तर्जनीभ्यां नमः । तेजोद्व्यणुकाय मध्यमाभ्यां नमः । वायुद्व्यणुकाय अनामिकाभ्यां नमः । आकाशद्व्यणुकाय कनिष्ठिकाभ्यां नमः । पृथिव्यप्तेजोवाय्वाकाशद्व्यणुकेभ्यो नमः करतलकरपृष्ठाभ्यां नमः । जीवो ब्रह्मेति वाक्यार्थे यावदस्ति मनःस्थि तः । एकत्वं तल्लये कुर्वन् ध्यायेदसिपदं तथा ॥ अथोक्तमन्त्रार्थविवरणश्लोकाः ॥

पृ. सं.-१६ श्लो सं.-१०२

इत्थं गुरूपदेशेन सति तत्वसाक्षात्कारे तदनुज्ञया विहिताचारसंपन्नः पर्यटेत् लोकोपकाराय। यदि नोदेति सम्यक्ज्ञानम्, तर्हि पौनःपुनेन श्रृणुयादेव। तथा च महोपनिषदाह-तावद्विचारयेत् धीमान् यावद्विश्रान्तिमात्मनि । तुर्यविश्रान्तियुक्तस्य निवृत्तस्य भवार्णवात ।। जीवतोऽजीवतश्चैव गृहस्थस्याथवा यतेः। नाकृतेन कृतेनार्थो न श्रुतिस्मृतिविभ्रमैरिति ॥

पृ. सं.-१६ श्लो. सं.-१०३

अन्ये त्वसम्यक्ज्ञानिनः श्रीगुर्वनुज्ञयाऽन्यत्र तत्रैव वा ज्ञानं केनेषितं पतति प्रेषितमित्यादिना मन आदिसर्वव्यवहारहेतुस्वयंप्रकाशमात्मानं मन आदिद्वारेण कवाटादिच्छिद्रस्फुरद्दीपप्रभाशकलेनान्तस्थदीपवत् सदा प्रत्यग्दृष्ट्यात्यन्तसूक्ष्मया चोद्यम्योद्यम्य कथञ्चिदुन्मनीभावापत्तिर्ज्ञानाभ्यासः । शास्त्रार्थविचारस्येदमेव फलमित्युपनिषदाह— मयैवैताः स्फुरन्तीह विततेन्द्रियवृत्तयः। तेजसान्तःप्रकाशेन यथाग्निरुचिपंक्तयः ॥ अनन्तानन्दसंभोगप्रदैवोन्मनशालिनी । शुद्धेयं चिन्मयी दृष्टिर्जयत्यखिलदृष्टिषु ॥ इच्छाद्वेषसमुत्थेन

द्वन्द्वमोहेन जन्तवः । धराविवरमग्नानां कीटानां समतां गताः ॥ येन सम्यक् परिज्ञाय हेयोपादेयमुज्झता । चित्तस्यान्तेऽर्पितश्चित्तं जीवितं तस्य शोभते ॥ भृष्टबीजोपमा भूयो जन्माङ्कुरविवर्जिता । हृद्येव जीवन्मुक्तानां शुद्धा भवति वासना ॥ पावनी परमोदारा शुद्धसत्वानुपातिनी । आत्मध्यानमयी नित्या सुषुप्तिस्थेव तिष्ठति ॥ कदान्तस्तोषमेष्यामि स्वप्रकाशपदे स्थितः । कदोपशान्तमननो धरणीधरकन्दरे ॥ समेष्यामि शिलासाम्यं निर्विकल्पसमाधिना । निरंशध्यानमूकस्य सुखिनो मम मस्तके ॥ कदा तार्णं करिष्यन्ति कुलायं वनपुत्रिकाः । संकल्पपादपं तृष्णालतां छित्वा मनोवनम् ॥ विततां भुवमासाद्य विहरामि यथासुखम् । इत्येवं चिन्तयन् भिक्षुः स्वरूपस्थितिमञ्जसा । निर्विकल्पो भवत्येवाचिरात् भ्रमरकीटवत् ॥

एवं संन्यासोपनिषदुक्तप्रकारेण विचारयेत् ॥

अथ मण्डलोपनिषदुक्ततारकयोगः । मण्डलश्रुतिः-शीतोष्णादिजयो यमः । सुखासीनवृत्तिरासनं पूरककुम्भकरेचकैः प्राणसंयमः । इन्द्रियाणां विषयेभ्यो निरोधनं प्रत्याहरणम् । सर्वत्र चैतन्यैकत्वज्ञानं ध्यानम् । तत्रैव चेतःस्थापनं धारणा ध्यानविस्मृतिः समाधिः । एवंवित् स मुक्तिभाक् । देहस्य पञ्च दोषास्सन्ति, कामक्रोधनिद्राभयनिश्वासा इत्यादिना प्रपञ्चयन्ते । अथवा शाण्डिल्योपनिषदुक्तहठयोगः ॥

**पृ. सं.-१८ श्लो.सं.-११३**

आत्मा तावत् सर्वप्राणिष्वहमहमिति नित्यानुभवसिद्धः कूटस्थनित्यः स्वस्मादपृथक्स्वभावः । तत्साक्षात्कारं विना न मुक्तिरिति श्रूयते । 'ज्ञात्वा देवं मुच्यते सर्वपाशैरिति' । 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति, तमेवं ज्ञात्वा मृत्युपाशान् छिनत्ति, तमेवं विद्वानमृत इह भवति, तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः, तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यती'

इत्यादिश्रुतिभ्यश्चावश्यमात्मदर्शनं कार्यम् । तथापि निरुपाधिकस्य ब्रह्मणः साक्षात्कारदौर्लभ्यात् सोपाधिकमेव मुमुक्षुभिरुपास्यम् ॥

ननु 'शास्त्रैः प्रपञ्च्यते यच्च नेत्रेणैव निरीक्ष्यते । बुध्या निश्चीयते किञ्चित् चित्तेनानीयते क्वचित् ॥ मनसा चिन्त्यते यद्यत् सर्वं मिथ्या न संशयः' । इति श्रुतेः, यद्दृश्यं तदनित्यमित्यनुमानाच्च कथं ध्येयत्वदृश्यत्वमात्मन उपचर्यते । किञ्च मिथ्याध्यानात्तादृक् फलमेव भवतीति चेन्न । सर्वमिथ्यात्वसिद्धिर्येन भवति स एवात्मा केनचिच्छ्रौतेनोपाधिना विशिष्य ध्येयो भवति न निरुपाधिक एव । नापि तत्प्रसादालाभो न चाज्ञाननिवृत्तिः । अत एवाहुरत्र भाष्यकाराः 'स्यात् परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थमिति । लोकेऽपि कश्चित् स्वमुखं द्रष्टुं दर्पणोपाधिं विना न सन्निहितदृष्ट्या साक्षात्कर्तुं शक्नोति । तस्मादात्मा सत्वोपाधिविशिष्ट एवोपास्यो द्रष्टव्यश्च ॥

यदुक्तं तादृशमेव फलमिति, तदयुक्तम् । स्वप्नव्याघ्रदर्शनाद्यथा जाग्रत्खट्वाच्युतिस्तथा व्यावहारिकसत्यादित्यचन्द्रानिलाग्निशिलाद्युपासनेनापि परंपरया परमार्थसत्यस्वरूपप्राप्तिरिति श्रुतिस्मृतिन्यायप्रसिद्धम् । तं यथा-यथोपासते तत्तथैव भवति । यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ इति । किमुत श्रुतिशिरोविहितस्याकस्मादाविर्भवत्शक्रचापादर्शप्रतिबिम्बसमानस्य निष्कळसकळात्मकस्य ब्रह्मण उपासनतस्सत्यार्थप्राप्तौ ?

यद् दृश्यं तदनित्यं यत्सावयवं तदनित्यमिति द्वयस्य सावयवत्वादनित्यत्वमिति चेत् शृणु । महानारायणोपनिषदि — निरुपाधिकसाकारः त्रिविधः ब्रह्मविद्यासाकार आनन्दसाकार उभयसाकारश्चेति । तत्र निरुपाधिकसाकारस्य नित्यशुद्धबुद्धमुक्तात्मब्रह्मचैतन्यसाकारत्वान्नित्यत्वमित्यादिशासनात् । तथा च शाण्डिल्यमुनिप्रश्नः —

भगवन् कथमरूपं ब्रह्म जगत्कारणं भवतीति ? स होवाचाथर्वा—सत्यं शाण्डिल्य ! परं ब्रह्म निष्क्रियमक्षरम् इति । अथाप्यरूपस्य ब्रह्मणः त्रीणि रूपाणि भवन्ति—निष्कलं निष्कलसकलं सकलं चेति । यत् सत्यज्ञानानन्तनिष्कलं-निरञ्जनसर्वगतमस्ति तदिदं निष्कलं रूपम् । अथास्य या सहजास्ति मूल-प्रकृतिर्माया लोहितशुक्लकृष्णरूपा, तया सहजया देवः कृष्णपिङ्गलो महेश्वर ईष्टे तदिदमस्य निष्कलसकलं रूपम् । अथास्य देवस्यात्मशक्तिः इन्दीवरदल-प्रख्या चतुर्बाहुः अघोरापापकाशिनी या तदिदमस्य सकलं रूपमिति वदन्तीति ॥

एवमन्यत्रापि श्वेताश्वतरशाखायां किंकारणं ब्रह्मेत्यादि । अत एव निष्कलसकलात्मकार्धनारीश्वर एव जगत्कारणमित्याहुः । उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तं । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ इति कैवल्यश्रुतिः ।

तस्मात् तदुपासकः परं ब्रह्मैव भवति ध्यानदर्शनाभ्यां । नात्र वाक्पाटवस्य किंचित् प्रयोजनमस्ति । न कर्मणा न प्रजया धनेन त्यागेनैके-ऽमृतत्वमानशुः । नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । मनसैवेद-माप्तव्यं नेह नानास्ति किंचन । हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वामिति ।

तथा पुराणवचनं च—वेदवाक्यैर्न लभ्योऽहं न शास्त्रैर्नापि चेतसा । ध्यानेन वृणुते यो मां सर्वदाहं वृणोमि तम् ॥ इति । परात्परतरं तत्त्वं ध्येयं मूर्त्यात्मनैव तु । न स्वरूपेण साक्षित्वादात्मत्वाद्विषयित्वतः ॥ भेदाभावाच्च भेदस्य भ्रमत्वादेव वस्तुनः । उमार्धविग्रहा शुक्ला चन्द्रार्धकृतशेखरा ॥ स्वस्वरूपानुसंधानप्रमोदादेव केवलात् । महाताण्डवसंयुक्ता या मूर्तिः श्रुति-दर्शिता ॥ श्रीपराशरब्रह्म-मूर्तिध्यानं विना विद्या परा नैवोपजायते । निष्कले

तु परे तत्त्वे निरालम्बे निरञ्जने ॥ किं करोति जनः क्षुद्रः ततस्तां नित्यमाश्रयेत् । ज्ञानविलम्बनभ्रान्त्या मनुष्या मन्दबुद्धयः ॥ मूर्त्युपेक्षां प्रकुर्वन्ति ज्ञानं तेषां न जायते। इति। तस्मात् श्रुत्युक्तसगुणब्रह्मसाक्षात्कारादि सकलश्रेयःसाधनमिति स्थितमित्यर्थः ॥

इति श्री शङ्कर यतीन्द्र निदेशवशंवदेन श्री काशीनाथ दामोदर प्रभृति महा विपश्चिदपश्चिमेन श्रीनीलकण्ठयतिवरेण विरचिते यतिधर्मप्रबोधे प्रथमांशस्संपन्नः ॥

---

## ॥ द्वितीयांशः ॥

---

### मूलगुरुः

पृष्ठ. सं-१८ श्लो. सं-१

मूलगुरुः श्रीदक्षिणामूर्तिरुद्र एव प्रसिद्धो लोकवेदयोः। कथं पितामहस्त्वादिनारायणं प्रणम्य पप्रच्छ भगवन्निति । 'ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्तेति', 'भृगुर्वै वारुणिः। वरुणं पितरमुपससारेति'। श्वेतकेतुर्हारुणेय आसेति' विद्यासन्ततिर्विविधापि ब्रह्मादिसर्वलोकस्य विद्यासन्तानमूलं आदिनारायण एवेति श्रूयते। ब्रह्मरुद्रादीनां तज्जन्यत्वश्रुतेः सर्वाधिपत्यसर्वैश्वर्यवत्वसर्वविद्याधिपत्वगमकवचनैर्नारायणं पद्मभुवमित्यभियुक्तसूक्तेः श्रीमदादिनारायण एवादिगुरुरिति चेदस्तु नाम। ब्रह्मादेरखिलस्य स एव। तेनापि सहाखिलस्य गुरुत्वं शिवस्यैवेत्येतावन्मात्रमुच्यते । कुत एतत्? आगमप्रमाणैरिति ब्रूमः ॥

आगमाश्च-'यो ब्रह्माणं विदधाति पूर्वम्।' हरिस्ततो भक्षयिष्य इति स्तुत्वा नमन् शिवम्। पुरा दृष्टैश्वर्यभक्तिः भस्माभक्षयदच्युतः ॥ वासुदेवः गुडधुक्काफलवर्णोऽभवत् क्षणात्। इति। ईशानः सर्वविद्यानामीश्वरस्सर्व-

भूतानां ब्रह्माधिपतिरिति । ईशानस्सर्वविद्यानां स एवादिगुरुर्बुधाः । तस्य शिष्यो महाविष्णुः सम्यक्ज्ञानमहोदधिः ॥ तस्मादाप्तपरिज्ञानो ब्रह्मा सर्व-जगत्पतिः । क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । तत्र सार्वज्ञ्यबीजं स पूर्वेषामपि गुरुः कालेनानवच्छेदादिति पातंजलसूत्रम् । प्रतिसर्गं प्रसूतानां ब्रह्मणां शास्त्रविस्तरम् । उपदेष्टा शिवो ह्येष कालावच्छेदवर्तिनाम् ॥ कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः ॥ इति । अजात इत्येवं कश्चित् भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यं ।

शिवपुराणम् — अजातमिममेवैकं ज्ञात्वा जन्मनि भीरवः । प्रपद्यन्तेऽस्य देवस्य मोक्षार्थं दक्षिणामुखम् ॥ इति । न तस्य कश्चित पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् । स कारणं करणाधिपाधिपो न चास्य कश्चित् जनिता न चाधिपः ॥ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः । जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ इति । सनत्कुमारसंहितायां श्रीकृष्णवचनम् — मतीनां च दिवः पृथ्व्याः वह्नेः सूर्यस्य वज्रिणः । साक्षादपि तु विष्णोश्च सोमो जनयितेश्वरः ॥ इति श्रुतिपुराणैः सर्व-जनकत्वाकुतोजन्यत्वसर्वविद्याधिपत्व कारणकारणत्वसर्वोपदेष्टृत्वादिसर्वैश्वर्यवत्वं श्रीरुद्रस्यैवेति ब्रह्मविद आहुः । नारायणं पद्मभुवमित्यभियुक्तवचनं तावत् ज्ञेयस्य गुरोः शिवस्य प्राप्त्यर्थं तदग्रिमान्तेवासिभगवत्प्रपदनं राज्ञः प्रसादाय सचिवानुसरणवत गम्यते । अत एव ओं नमो ब्रह्मादिभ्य इति च प्रयुज्यते । अपि च तादृशोक्तिः श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्द्रनन्द्यादयः प्राचीना गुरवोपि यस्य करुणालेशात् गता गौरवम् । तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालंकृतं चिन्मुद्राङ्कितभद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥ इति । तस्मान्मूलगुरुः परमेश्वर एव प्राधान्येनोपास्य इत्यर्थः ॥

पु. सं.-१८ श्लो. सं. २-५

सर्वप्राणिहृदयस्थितममात्रं मात्रातीतं केवलनादात्मकं ध्यात्वा । यद्वा

तद्वाच्यमीश्वरं नादान्ते स्फुरन्तं साम्बमूर्तिं दक्षिणामूर्तिं वा प्रातर्ध्यायेदित्याह — प्रेक्षेति । श्रीदक्षिणामूर्तिरुद्र एव मुमुक्षुभिरुपास्य इति श्वेताश्वतरजाबालशाखिनो मन्यन्ते । तथैव दक्षिणामूर्त्युपनिषदि मार्कण्डेयेतिहासे च प्रकाशते ॥

**पृ सं-१९ श्लो. सं-६**

अजपाविद्यायां जपः कथमित्यत्राह योगतत्त्वोपनिषत्तदुपबृंहणं च । अथवा प्राणसञ्चारः सकारः परिकीर्तितः । हकारोपानसंचारो देहे देहवतां सदा । एवं यस्तु विजानाति मन्त्रमाचार्यपूर्वकम् ॥ सोऽजपन्नपि हंसाख्यां जपत्येव न संशयः । इतीममर्थं जानीयात् । ततस्सोहंमन्त्रस्य सहात्मकम् यत् शाबल्यं तदुभयरूपं लोपयित्वा तयोस्सन्धिं च कृत्वा यत्केवलस्वरूपं तस्मिन् लीनो भवेत् । अथवा तत्तदाधारेषु गणेशादिमूर्तीस्तेजःपुञ्जं वा ध्यात्वा यथोक्तसंख्यया प्राणानां समर्पणं कुर्यात् ॥

**पृ. सं-१९ श्लो. सं-१२**

अवान्तरे दिवारात्र्यनिर्णयसमये मूत्रोत्सर्गादिशंका चेत् यथा दिवा । अह.प्राचुर्ये सति उदङ्मुखः रात्रिप्राधान्ये दक्षिणामुख इत्यर्थः ॥

**पृ. सं-१९ श्लो. सं. १२-१३**

विहितलिङ्गकरपदावयवेषु पञ्चसु प्रत्यवयवं तिस्र एव मृदः प्रयोज्याः । प्रतिमृल्लेपं पञ्चधा जलसेकः कार्य इति गृहस्थविधिः । वक्ष्यमाणन्यायेनैतच्चतुर्गुणितत्वेन प्रत्यवयवं द्वादशसंख्या मृदः प्रयोज्याः । लिङ्गशौचे मूत्रोत्सर्गप्रसक्तौ प्रतिमृदं त्रिवारं जलसेकः कार्यः । आहत्य लिङ्गशौचे यतेः षष्टिसंख्या मृदः अशीत्युत्तरशतं जलसेकश्चेत्यर्थः ॥

**पृ. सं-१९ श्लो. सं १३-१४**

मलोत्सर्गे यतीनामपाने विंशतिः । करान्निष्वष्टाविंशतिः । आहत्य मृदस्तु द्वात्रिंशदुत्तरशतं तत्पञ्चगुणो जलसेकश्च भवतीत्यर्थः ॥

पृ. सं - २० श्लो. सं-१८

ब्राह्मेण हस्तेन त्रिरावृत्तेन तारेण चुलकमात्रा आपस्त्रिः पिबेत् । अथ मध्यमाङ्गुलीभिस्तर्जनीमध्यमानामिकाभिः शिरश्चक्षुषी नासिके श्रोत्रे हृदयमिति श्रुतिविहिताष्टाङ्गानि समुपस्पृशेत् ॥

पृ सं-२० श्लो. सं.-२२, २३

शिवरात्रिः कृष्णपक्षचतुर्दशी, महाशिवरात्रिश्च कृष्णाष्टमी, अमा-सोमवारः शुक्लैकादशी, चैतेषु दिनेषु व्रतत्वात् दन्तधावनं वर्जयेत् । स्नानात्परं धावनं न कुर्यात् ॥

पृ. सं २१- श्लो. सं.-२७

कुटीचकस्य त्रिषवणं बहूदकस्य द्विवारं हंसस्य सकृद्वारस्नानं परहंसस्य मानसमिति श्रुतेऽपि सर्वेषां सकृत् स्नानस्य सुकरत्वादस्तु नाम सर्वेषां प्रातरेवेति स्मार्तः । मध्याह्नादावाग्नेयस्नानेनैव स्नाता भवेयुरित्यर्थः । तथा च — भस्मस्नानं जलस्नानादसंख्येयगुणान्वितम् । तस्माद्वारिणमुत्सृज्य स्नानमाग्नेयमाचरेत् ॥ इति स्मृतिः । स्पृष्ट्वा तथाविधानन्यान् भस्मस्नानं समाचरेदिति श्रुतिः । अतः सकृद्वारुणस्य चाचारसत्वात् बाह्याभ्यन्तरनैर्मल्यहेतु-त्वेनावश्यं कर्तव्यत्वे तद्विधिरुदीर्यते ॥

पृ. सं.-२२ श्लो. सं -३७

एवमिति । वारुणेऽपि स्नाने मनसान्त स्थिततीर्थक्षेत्रमूर्तीनामनु-भावनां विना केवलमज्जनस्य काकमहिषीद्यविशेषाद्यतीनामवश्यं मानसस्नान-मपि कार्यमित्यर्थः ॥

पृ. सं-२२ श्लो. सं ३८-४०

तिस्र इति । शिरोबाहुवक्षःपृष्ठेषु पञ्चाङ्गेषु तिस्रो मृत्तिकाः । तथा कटूरुजङ्घापादेषु सप्तसु प्रत्यङ्गं पञ्च पञ्च मृत्तिकाः प्रयुञ्जानः संक्षाल्य

पुनः पुनः स्नायात् । षण्मुखीमुद्रया चेन्द्रियाण्याच्छाद्याज्ञाधारे परमेश्वरं स्मरन् स्नात्वा आत्मैवेदं सर्वं तर्पयामि । ब्रह्मैवेदं सर्वं तर्पयामि । सर्वं खल्विदं ब्रह्म तर्पयामीति सन्तर्प्य, यत इन्द्रस्य वज्रोऽसीति दण्डं गृहीत्वा, दण्डमूलाग्रमध्येषु पृथक् द्वादशप्रणवैः प्रतिपर्वं त्रिवारं प्रत्यवान्तरदेशं द्विवारं च सन्तर्पयेत् ॥

पृ. सं-२२ श्लो. सं-४१

एवमुक्तविधाचारेषु वक्ष्यमाणेषु च यस्य यस्मिन् कर्मणि यावतानुष्ठानेन मनःशुद्धिः भवति तस्य तावत्पर्यन्तं न्यूनमधिकं वा देशकालावस्थानुरोधेन यथासंभवमनुष्ठेयम् । अत्र क्षौराद्यशुद्धिकालप्रसक्तस्नानविधौ केवलं दण्डमज्जनं न नित्यविधानं इति केचिन्मन्यन्ते ॥

पृ. सं-२२ श्लो. सं-४२

अथ सन्ध्यानुष्ठानादिसर्वकर्मसमृद्ध्यर्थं ज्ञानाङ्गत्ववेदान्तविहितत्वपशुपाशमोचनशिवतत्वसाक्षात्कारसिद्ध्यर्थं समन्त्रकभस्मोद्धूलनत्रिपुण्ड्मादौ विदध्यात् । उक्तं हि जाबालैः—'यतीनां ज्ञानदं प्रोक्तं वनस्थानां विरक्तिदम् । देवालयस्थितं भस्म सर्वेषां समुदाहृतम्' ॥ इत्यादिवर्णाश्रममन्त्रतन्त्रभेदानुक्त्वा तद्धारणस्य कालविशेषानाहुः — 'सन्ध्याद्वये निशीथेऽपि तथा पूर्वावसानयोः । सुप्त्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिकम् ॥ स्त्रियं नपुसकं गृ' बिडालं बकमूषिकम् । स्पृष्ट्वा तथाविधानन्यान् भस्मस्नानं समाचरेत्' ॥ इति उद्धूलनं विधाय तन्मन्त्रम् — 'ईशानेति शिरोदेशं मुखं तत्पुरुषेण तु । उरोदेशमघोरेण गुह्यं वामेन धूळयेत् ॥ सद्योजातेन वै पादौ सर्वाङ्गं प्रणवेन तु' ॥ इति । अथ गुरुस्थानं ललाटं चेत्यादि अष्ट द्वादश षोडश द्वात्रिंशत् पञ्च स्थानानि चोक्त्वा तेनाधीतं श्रुतं सर्वं तेन सर्वमनुष्ठितम् । येन विप्रेण शिरसि त्रिपुण्ड्रं भस्मना धृतम्' ॥ इत्यादिप्रशंसनान्ते — 'ये भस्मधारणं त्यक्त्वा कर्म कुर्वन्ति मानवाः ।

तेषां नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः । येषां कोपो भवेत् भ्रष्टन् ललाटे भस्मदर्शनात् । तेषामुत्पत्तिसांकर्यमनुमेयं विपश्चिता ॥ धिक् भस्मरहितं फाल धिक् ग्राममशिवालयम् । धिगनीशार्चनं जन्म धिग्विद्यामशिवाश्रयाम् ' ॥ इत्यादि भस्मापराचिनिन्दावचनानि दृश्यन्ते । एवं कैवल्यकालाग्निरुद्रश्वेताश्वतराथर्वशीर्षभस्मजाबालाथर्वण तैत्तिरीयाद्युपनिषत्स्वपि भस्मधारणप्रशंसा भृशमास्ते । किंच श्रीवासुदेवस्य शिवज्ञानदीक्षाप्रकरणे तत्सूक्तिः — ' न शक्यं भस्मनो ज्ञाने प्रभावं ते कुतो विभो ' । इति । हरिविरिञ्च्यनन्तरं च शिववचनमितिहासरूपेण श्रूयते । अपि च लोकानुग्रहकृतावतार श्रीमदाचार्यचरणसन्तानमहागुरुभिः सर्वकर्मसु भूतेरेवादृतत्वात्, भस्मनोद्धूलनं त्रिपुण्ड्रं च तदीयैर्वैदिकजनैरवश्यं धार्यमेवेति स्थितम् ॥

**पृ. सं.-२२ श्लो. सं. ४३-४४**

स इति । तारत्रययुक्त सोऽहं मन्त्रेण जप्तं भस्म श्रुत्युक्तस्थानेषु धृत्वैव भिक्षुरुपासनादि कुर्यात् । पूर्वोक्तमन्त्रेण करक्षालितं च जलं पिबेत् । अन्ये त्वापः पुनन्त्विति । अवशिष्टलेपं सर्वाङ्गेषु मार्जयेदित्यर्थः । एवं कामादिदोषघ्नं काम एव हि क्रोधलोभमदमात्सर्यडम्भासूयादीनां शत्रूणां मूलम्; अत एव ' सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ' ॥ इति । तस्मात् कामप्रभृतिसकलदोषध्वंसकं पशोर्जीवराशेर्मायापाशलक्षणस्याज्ञानस्य मोचनं व्रतं शाम्भवमाहेश्वरशैवपाशुपतापरपर्यायं भसितत्रिपुण्ड्रधारणमवश्यं कुर्यात् । तदनुष्ठानाभावे महान् प्रत्यवायः संभवत्येव । एवमन्वयव्यतिरेकरूपेतिहासमाहुः जाबालाः — गौतमविवाहकाले तामहल्यां दृष्ट्वा सर्वे देवाः कामातुरा अभवन् । तदा नष्टज्ञाना दुर्वाससं गत्वा पप्रच्छुः । निष्कृतिमिति शेषः । ततस्तद्दोषं शमयिष्यामीत्युक्त्वा मन्त्रेण मन्त्रितं भस्म दुर्वासा दत्तवान् ब्रह्महत्यादि सर्वदोषशान्तिदमिति । भस्मधारणानन्तरं तेषां वचनं च— ' आश्चर्यमेतज्जानीमो भस्मसामर्थ्यमीदृशम् । निर्धूतरजसस्सर्वे तत्क्षणाच्च वयं मुने ॥ इति । कामादिध्वंसनं ज्ञानप्रदत्वेन ॥

अत्याश्रमिभ्यः परमं पवित्रं प्रोवाचेति ज्ञानाधिकारत्वेन, अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्येति ध्यानाङ्गत्वेन, तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति ब्रह्मविद्यानन्यसाधनत्वेन, व्रतमेतत् पाशुपतं पशुपाशविमोक्षायेति परमात्मस्वरूपाच्छादकानात्माभिमान-पाशमोचनत्वेन भस्मधारणात् किं फलमश्नुत इति प्रश्नस्य तत्र परमहंसानां संवर्तकारुणिकश्वेतकेतु दुर्वासऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतयो भूति-धारणादेव मुक्ता इति मुक्त्यन्तरङ्गसाधनत्वेन भूत्यै न प्रमदितव्यमिति तीक्ष्णशासनत्वेन नित्योऽयं धर्मो ब्राह्मणानां ब्रह्मचारिगृहस्थवानप्रस्थयतीनामेत-दकरणे प्रत्यवैति यतिः प्रमादात् भस्मधारणं त्यक्त्वैकदा तत उपोष्य द्वादश-सहस्रप्रणवं जप्त्वा शुद्धो भवति। अन्यथा यदीन्द्रो यतीन् सालावृकेभ्यः पातयतीति सभयमवश्यकरणीयत्वेन विभूतिधारणं कार्यमेव ॥

ननु व्रतात्याश्रमशिरोव्रत पाशुपतव्रत भूत्यादिशब्दानां चान्द्रायणव्रतातिवर्णाश्रमाथर्वणाध्ययनविधिपशुपतितन्त्रकैश्वर्याद्यर्थकत्वे प्रतीयमाने कथमिव साकल्येन भस्मविधिपरत्वमिति चेत्। शृणु वेदार्थनिर्णयविधौ हि पुराण-मन्वमिति न्यायात् सन्ति ह्यत्रोपबृंहणानि। श्रीबोधायनस्य कल्पसूत्रे — भूत्यै न प्रमदितव्यमिति विज्ञाप्यते। अथाऽप्युदाहरन्ति। मध्यमानामिकाङ्गुष्ठैः त्रिपुण्ड्रं भस्मना कृतम्। तत् त्रिपुण्ड्रं भवेच्छ्रेष्ठं महापातकनाशनम् ॥ इति। बोधायनस्मृतौ — स्नानमीशेन मन्त्रेण कुर्यान्मूर्धादिपादतः। इत्यादि। अन्यत्र परमहंसं प्रस्तुत्य — अग्निरित्यादिभिर्मन्त्रैः कुर्यादुद्धूलनं मुदा। सर्वाङ्गोद्धूलनं यत्तत् व्रतं प्रोक्तं मनीषिभिः ॥ एतद्वेदशिरोनिष्ठाः प्राहुः पाशुपतं मुने। केचिच्छिरोव्रतं प्राहुः केचिदत्याश्रमं बुधाः ॥ केचित्तु व्रतमित्यूचुः केचिच्छाम्भवमैश्वरम्। अस्य व्रतस्य माहात्म्यमागमान्तेषु संस्थितम् ॥ सर्वपापहरं पुण्यं सम्यक्ज्ञानप्रकाशकम्। यः पशुः स्वपशुत्वं च व्रतेनानेन न त्यजेत् ॥ तं हत्वा न स पापीयानिति वेदान्तनिर्णयः ॥ इति।

ब्रह्मगीतायाम्—उद्धूलनं त्रिपुण्ड्रं च वदन्त्यत्याश्रमं बुधाः । अत्याश्रमिभ्यः शान्तेभ्यो वक्तव्यं ब्रह्मवेदनम् ॥ इति । सौरसंहितायाम्— श्रद्धया विधिवन्नित्यं न चीर्णं यैः शिरोव्रतम् । ब्रह्मविद्यामिमां तेषां न वदेत कदाचन ॥ इदं शिरोव्रतं चीर्णं विधिवद्यैः द्विजातिभिः । तेषामेव परां विद्यां वदेदज्ञानबाधिकाम् ॥ शिरोव्रतमिदं नाम श्रुतमाथर्वणश्रुतौ । अत्याश्रमव्रतं ह्येतत् तत्पाशुपतसंज्ञितम् ॥ शाखाभेदेषु नामानि विविधान्यस्य भेदतः । शिरोव्रतविहीनस्तु सर्वधर्मसमन्वितः ॥ अपि ब्रह्मात्मविद्यायां नाधिकारी न संशयः । इति । परत्र च — सत्याद्धर्माच्च कुशलात् भस्मनोद्धूलनादपि । त्रिपुण्ड्रधारणाच्चापि स्वाध्यायाध्ययनादपि ॥ श्रौतेभ्यश्च मुमुक्षुश्चेत् सदा न प्रच्युतो भवेत् । इति ॥

एवं नानोपबृंहणवचनैः व्रतादिशब्दानां भस्मधारणविधिपरत्वमेव सिद्धम् । यद्यन्यत्रापि प्रकरणलिङ्गौचित्यान्नीयेत, तावता न क्वापि हानिरस्माकं । उक्तं हि कल्पतरुकारैः — सकृच्छ्रुतपदस्यार्थद्वयक्लृप्तिर्न दुष्यति । संक्षिप्य विस्तृताध्यासलक्षणद्वयलाभतः ॥ इति । अपि च, भरद्वाजस्मृतौ — प्राणानायम्य संकल्प्य भस्मस्नानं समाचरेत् । तिर्यक् त्रिपुण्ड्रं विधिना ललाटे हृदये गळे ॥ इति । नारदीयस्मृतौ — त्रिपुण्ड्रं परमं पुण्यं ब्रह्मविष्णुशिवात्मकम् ॥ इति । लोकाक्षिः — त्रिपुण्ड्रधृक् विप्रवरो यो रुद्राक्षधरः शुचिः । स पंक्तिपावनः श्राद्धे पूज्यो विप्रैस्सुरैरपि ॥ इति । स्मृतिरत्नावल्याम् — मध्यमानामिकाङ्गुष्ठैर्ललाटे यत् त्रिपुण्ड्रकम् । इति । धर्मसारसुधानिधौ — त्रिपुण्ड्रं सर्वदा कुर्यान्मन्त्रपूतेन भस्मना । इति । स्मृतिभास्करे — वनस्पतिगते सोमे भस्मोद्धूलितविग्रहः । इति । स्मृतिसारसमुच्चये — अशुचिर्वाप्यनाचारो मनसा पापमाचरन् । शुचिरेव भवेन्नित्यं त्रिपुण्ड्रस्य तु धारणात् ॥ इति । महाभारतेऽपि—आयुष्कामोऽथवा राजन् भूतिकामोऽथवा नरः । नित्यं वै धारयेत् भस्म मोक्षकामी च वै द्विजः ॥ इति ।

एवमसंख्यातानि पुराणवचनानि श्रौतान्युपस्मृतिनिबन्धनवचनानि च सन्ति । तर्हि मन्वादीनां त्रिपुण्ड्रविधिप्रवचनप्रवृत्त्यभावे को हेतुरिति चेत् । लोकवेदप्रसिद्धार्थस्य स्मर्तारो न हि प्रवर्तकाः । किन्तु, परोक्षस्य प्रत्यक्षस्यापि सन्दिग्धवेदार्थस्य च प्रवचनकर्तारः । तथा चाह श्रीपराशरः — प्रत्यक्षवेदसिद्धोऽर्थः संग्राह्यस्सर्वचेतनैः । अप्रत्यक्षश्रुतेरर्थं स्मरन्ति मुनिसत्तमाः । कचित्कदाचित्तन्त्रार्थं ब्रुवन्ति मुनिसत्तमाः । अधिकारिविशेषाणामुपकाराय केवलम् ॥ इति । एवं श्रुतिमतानुसारिवचनैः प्रपञ्चितोऽयमर्थः पुरुषसिंहैः सम्यक् परीक्ष्य समुपादेयः ॥

पृ. सं-२२ श्लो. सं ४५

भगवन् रुद्राक्षधारणविधिं सर्वे श्रोतुमिच्छामह इति प्रश्नस्य तदधिवासाद्युक्त्यनन्तरं स एष रुद्राक्षज्योतिरित्येतद्धारणफलं मया वक्तुं न शक्यत इति । तस्मात् श्रुतिशिरस्सिद्धं धार्यमेवेत्यर्थः ॥

पृ. सं-२३ श्लो. सं. ४६-५३

प्राक् जलानुष्ठानप्रकारमाहुः सांप्रदायिकाः, विवरिष्यते च । अस्यार्थः सांप्रदायेनोच्यते — अन्तर्हृदि नियन्तारं बहिश्च गुरुरूपिणम् । उभयत्रापि शर्वाख्यं तं वन्दे पार्वतीपतिम् ॥ लं इन्द्राय नमः । रं अग्नये नमः । हं यमाय, षं निर्ऋतये, वं वरुणाय, यं वायवे, सं सोमाय, शमीशानाय, अं ब्रह्मणे, ह्रीं विष्णवे इति देववन्दनम् ॥ श्रुतिस्मृतिपुराणानामालयं करुणालयम् । नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥ शङ्करं शङ्कराचार्यं केशवं बादरायणम् । सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ इति गुरुं वन्दित्वा ओं मं मण्डूकाय नमः । कं कालाग्निरुद्राय, पं पृथिव्यै, कं कूर्माय, अं अनन्ताय, आं आधारशक्तये, गुं गुरुभ्यः, पं परमगुरुभ्यः, पं परमेष्ठिगुरुभ्यः, पं परापरगुरुभ्यः गं गणपतये, दुं दुर्गायै, क्षं क्षेत्रपालाय, सं सरस्वत्यै, पं परमात्मने, मं महाविष्णवे नमः,

जलं स्पृष्ट्वा अष्टोत्तरशतं जपित्वा, जले पद्मं प्रणवयन्त्रं वा विलिखेत्। लिङ्गं तु प्रणवं यन्त्रं यतस्तस्माद्विशिष्यते। अकारे लिखितेऽधस्तादुकारे तस्य चोपरि॥ तस्योपरि मकारे च लिखिते मुनिपुङ्गवाः। बिन्दुं विलिख्य तन्मूर्ध्नि तदन्तस्सूत्रमालिखेत्॥ ऊर्ध्वरेखाकृतिं नादं प्रणवेन च वेष्टयेत्। लिङ्गाकृति भवेदेतद्यन्त्रं प्रणवमात्रिकाः॥ इति। अन्तर्यामी भगवान् ऋषिः। देवीगायत्रीच्छन्दः। परमात्मा देवता। भूरग्न्यात्मने तुषारवर्णायाङ्गुष्ठाभ्यां नमः। भुवः प्रजापत्यात्मने स्फटिकवर्णाय तर्जनीभ्यां स्वाहा। स्वः सूर्यात्मने श्यामवर्णाय मध्यमाभ्यां वषट्। महो ब्रह्मात्मने नीलवर्णायानामिकाभ्यां हुं। जनो ज्ञानात्मने कृष्णवर्णाय कनिष्ठिकाभ्यां वौषट्। तपस्सत्यात्मने श्वेतवर्णाय करतलकरपृष्ठाभ्यां अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बन्धः। अप्मण्डले विष्णुं ध्यायेत्। विष्णुं भास्वत्किरीटाङ्गदवलयगलाकल्पहारोदराङ्घ्रि श्रोणीभूषं सुवक्षो विविधमणिमहाकुण्डलामण्डिताङ्गम्। हस्तोद्यच्छङ्खचक्राम्बुजगदममलं पीतकौशेयमाशाविद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि॥ तत्रावाहयेत्॥

धेनुमुद्रां प्रदर्श्य लं पृथिव्यात्मपरमात्मने गन्धतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय गन्धं कल्पयामि। कनिष्ठिकाभ्यां नमः। हं आकाशात्मपरमात्मने शब्दतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय पुष्पम्। यं वाय्वात्म परमात्मने स्पर्शतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय धूपम्। रं अग्न्यात्मपरमात्मने रूपतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय दीपम्। वं अमृतात्मपरमात्मने रसतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय अमृतम्। सं सर्वतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय सर्वोपचारान् समर्पयामि। अष्टोत्तरशतवारं जलेन सन्तर्प्य ऋषीन् छन्दांसि देवताः हृदयदेवं शिरोदेवं, शिखादेवं, कवचदेवं, नेत्रदेवं, अस्त्रदेवं, आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वं, सर्वं खल्विदं ब्रह्म तर्पयामीति सन्तर्प्य, लं पृथिवीत्यादिना पुनः पूजां कृत्वा, उत्तिष्ठ देवदेवेश शूलभृद्वृषवाहन। प्रसीद परमानन्द प्रविश्य हृदयं मम॥ इति उद्वास्य,

भूरग्न्यात्मन इत्यादिना विन्यस्य द्वादशधाभिमन्त्रितं जलं शिरस्यभ्युक्ष्य तथा च प्राश्य प्राणानायम्य, यत इन्द्रस्य, सुराश्तिष्ठन्तीति च दण्डं गृहीत्वा, दण्डमूलाग्रमध्येषु द्वादशवारं प्रतिपर्वं त्रिवारं प्रत्यवान्तरं द्विवारं च सन्तर्प्य मूलेन त्रिः प्रदक्षिणमालोड्य पादावभ्युक्षेत्। अग्रेण त्रिरपसव्यमालोड्य शिरोभ्युक्ष्य देवगुरुवन्दनं च कार्यम् ॥

पृ. सं-२३ श्लो. सं ५३-५६

अन्तर्हृदीत्यादिना देवगुरून् वन्दित्वा मं मण्डूकादि आधारशक्त्यन्त-पीठं विन्यस्य मेरुपृष्ठर्षिः ; सुतलं छन्दः, कूर्मो देवता, पृथ्वि त्वया... चासनं कुर्विति, अपसर्पन्तु... शिवाज्ञया, शरीराकारभूतानां भूतानां यद्विशोधनं अव्यक्त ब्रह्मसंपर्कात् भूतशुद्धिरियं मता ॥ भूरग्न्यादि, न्यासांते वाय्वग्नि-वरुणबीजैः प्रावृतिं कृत्वा दिग्बन्धः। स्फुरत्तारकसंकाशं विद्युत्पुञ्जसमप्रभम्। हृदिस्थं प्रणवं ध्यायेदोमिति ज्योतिरूपकम् ॥ इत्युभयकराग्रं ब्रह्मरन्ध्रे विन्यस्य द्वादशप्लुतप्रणवं जपित्वा लं पृथिव्यात्माद्युपचारः। समष्टिव्यष्टि-ऋष्यादि — अन्तर्यामी भगवानृषिः, देवीगायत्रीच्छन्दः, परमात्मा देवता। अकालव्यगोत्रोत्पन्न श्वेतवर्णं उदात्तस्वरो ज्ञानाग्निमुखं, अं बीजम्, उं शक्तिः, मं कीलकम्, मोक्षार्थे जपे विनियोगः ॥

अकारस्याग्निर्ऋषिः, गायत्रीछन्दः, ब्रह्मा देवता। क्लीं बीजम्, क्रियाशक्तिः, पीतवर्णो जाग्रदवस्था भूः स्थानम्, उदात्तस्वर ऋग्वेदो गार्हपत्योग्निः रजोगुणः प्रातस्सवनं विश्वात्मा पृथिवी तत्त्वम्। सृष्ट्यर्थक्रिया-व्याप्त्युत्कर्षार्थे जपे विनियोगः ॥

उकारस्य वायुः ऋषिः, त्रिष्टुप्छन्दः, विष्णुर्देवता, श्रीं बीजम्, ज्ञानशक्तिः, विद्युद्वर्णः स्वप्नावस्था भुवः स्थानम् अनुदात्तस्वरः यजुर्वेदो दक्षिणाग्निः सत्त्वगुणो माध्यन्दिनसवनं तैजस आत्मा अन्तरिक्षं तत्त्वम्। स्थित्यर्थक्रियाव्याप्त्युत्कर्षार्थे जपे विनियोगः ॥

मकारस्य सूर्य ऋषिः, जगती छन्दः ईश्वरो देवता, ह्रीं बीजम्, इच्छा शक्तिः, श्वेतवर्णः सुषुप्त्यवस्था स्वः स्थानं स्वरितस्वरः सामवेद आहवनीयोऽग्निः तमोगुणः सायंसवनं प्राज्ञ आत्मा द्यौस्तत्त्वं संहारार्थलय-क्रियार्थे जपे विनियोगः ॥

अर्धमात्राया वरुण ऋषिः, विराट्छन्दः, पुरुषो देवता, क्रों बीजम्, क्रियाज्ञानेच्छा शक्तिः, सर्ववर्णास्तुरीयावस्था, भूर्भुवस्सुवस्स्थानानि, उदात्तानुदात्तस्वरितस्वरा आथर्वणवेदो नादो वा संवर्तकाग्निः, सर्वे आत्मानः पृथिव्यन्तरिक्षं द्यौस्तत्त्वानि सृष्टिस्थितिलयक्रियाव्याप्त्युत्कर्षार्थे जपे विनियोगः ॥

ध्वनेर्ब्रह्मा ऋषिः, अव्यक्तगायत्रीच्छन्दः। परमानन्दो देवता, हंसो बीजम् चिच्छक्तिः, नादस्वरूपं स्वस्स्थानं ब्रह्मात्मा, मोक्षार्थे जपे विनियोगः। प्रणवमष्टोत्तरसहस्रमधिकं वा मात्राभिः पदान् संयोज्य जपित्वा, पुनः पञ्चोपचारपूजान्यासऋष्यादि च विधाय ब्रह्मार्पणं कुर्यात्। तीर्थदेव-गुरूणां च ज्येष्ठानां वन्दनं चरेत्। एवं मध्याह्नसायाह्नेष्वपि कार्यं अत्र तमोभेदज्ञानाय तदुच्यते ॥

## पञ्चीकरणम्

अथ अनुसन्धानार्थं पञ्चीकरणसमाधिः उच्यते। अथातः परमहंस-परिव्राजकानां समाधिविधिं व्याख्यास्यामः। सच्छब्दवाच्यं शक्तिशबलं ब्रह्म। तस्मात् ब्रह्मणोऽव्यक्तमव्यक्तान्महत् महतोहंकारोहंकारात् पञ्च तन्मात्राणि पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि पञ्चमहाभूतेभ्योखिलं जगत्। पञ्चानां भूतानामेकैकं द्विधा विभज्य तयोरेकञ्चतुर्धा विभज्य स्वार्धभागं विहायेतर-भागेष्वेकैकभागस्य योजनं पञ्चधा पञ्चीकरणं भवति। अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपंच्यते ॥

पञ्चीकृतपञ्चभूतानि तत्कार्यं च विराडित्युच्यते। एतत् स्थूलशरीर-

मात्मनः। इन्द्रियैरर्थोपलब्धिर्जागरितं तदुभयाभिमान्यात्मा विश्व एतत् त्रयमकारः। अपञ्चीकृतपञ्चभूतानि तत्कार्यं च सर्वं सप्तदशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते। एतत् सूक्ष्मशरीरमात्मनः। करणेषूपसंहृतेषु जाग्रत् संस्कारजः स्वप्नः। तदुभयाभिमान्यात्मा तैजस एतत् त्रयमुकारः। शरीर-द्वयकारणात्माज्ञानं साभासमव्याकृतमित्युच्यते। एतत् कारणशरीरमात्मनः। तच्च न सन्नासन्नापि सदसत्। न भिन्नं नाभिन्नं नापि भिन्नाभिन्नम्। न निरवयवं न सावयवं नोभयम्। किन्तु केवलब्रह्मात्मैकत्वज्ञानापनोद्यम्। सर्वप्रकारज्ञानोपसंहारो बुद्धेः कारणात्मनावस्थानं सुषुप्तिः। तदुभयाभि-मान्यात्मा प्राज्ञः एतत् त्रयं मकारः। अकार उकारे उकारो मकारे मकार ओंकारे ओंकारोऽहम्येवाहमात्मा साक्षी केवलः कूटस्थचिन्मात्रस्वरूपः। न चाज्ञानं तत्कार्यं च। किन्तु नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयप्रत्यग्भूतं ब्रह्मैवाहमस्मीति अभेदेनावस्थानं समाधिः। स यश्चायं पुरुषे यश्चासावादित्ये स एकः, प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि अयमात्मा ब्रह्म इत्यादि श्रुतिभ्यः। चिन्तयेत् प्रणवान्तस्थमात्मज्योतिःस्थितं शिवम्। चैतन्य-मात्रममृतं सोऽहमस्मीति नित्यशः। कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः॥ कार्यकारणतां हित्वा पूर्णबोधोवशिष्यत इति॥

पृ. सं-२४ श्लो. सं. ५७-६०

अत्र संप्रदायक्रमेण श्रीशिवादिगुरुपरंपरागतान् गोत्रर्षीन् स्वगुरुं गुरोर्गुरुञ्चानेकधा नत्वाराध्य पुनस्तदनुज्ञातः स्थित्वा शन्नो मित्रश्शं वरुणः इति यश्छन्दसामिति, अहं वृक्षस्येतीमे मन्त्राः साधारणाः। पूर्णमद इत्याद्याः शाखभेदेन प्रयोक्तव्याः। वर्णिगृहिणां श्रवणे त्वावहन्तीति चर्वाज्य-होमो विशेषः। श्रुतिशीर्षकम्। श्रीरामचन्द्रोपदिष्टप्रकारेण माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये। तत्राप्यसिद्धं चेत् ज्ञानं दशोपनिषदं पठ। तत्रापि दृढता नो चेत् विज्ञानस्याञ्जनासुत। द्वात्रिंशाद्योपनिषदः समभ्यस्य निवर्तयेति॥

अथातो ब्रह्मजिज्ञासेति सूत्रं वैयासिकं । साक्षात् सूत्रार्थप्रकाशकं भाष्यम् । सूत्रादिस्वरूपमाह मुनिः पराशरः — शास्त्रनिर्णायकन्यायकलापं मुनिसत्तम । सूत्ररूपेण कुर्वन्ति शिवस्यैवाज्ञयैव तु ॥ अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ सूत्रार्थं भाष्यरूपेण यथावद्दर्शयन्ति च । सूत्रार्थो वर्ण्यते यत्र वाक्यैस्सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥ इति । कुर्वन्ति केचित् व्याख्यानं भाष्यस्यैव तपोबलात् । परिच्छेदः पदार्थोक्तिः विग्रहो वाक्य-योजना ॥ आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ॥ इति । बहुधा विचाराशयः सन्ति तथापि सूत्रार्थं भाष्यमुखेनैव विचारणीयं तदेव पूर्णफल-मित्याहुः । तस्मात् सूत्रार्थावगतिमतिगम्भीराम्रभिगन्तुं विद्वज्जनमनोहरं श्रीशङ्कर-भगवत्पादीयम् ( उताखिलचेतन समुपासनानुगुण समुदितनिजप्रसादसमर्पित पुरुषार्थसार्थनिष्कल सकलब्रह्म प्रतिपादक मुपनिषच्छास्त्ररहस्य विशदीकरण बद्धकङ्कणश्रीकण्ठशिवाचार्यविरचितं वा ) महाभाष्यं गुरुमुखेन परिशीलयन् गुरुं मूलगुरुं नत्वा शृणुयात् ॥

पृ. सं-२४ श्लो. सं-६१

गुरुवैचित्र्यमाह —

स्वोत्तममिति । स्वेषां चतुर्णां वर्णानामाश्रमिणां बाल्युक्त मवधूतं गुरुं भजेत् । तदभावे स्वोत्तमं-स्वस्ववर्णाश्रमवयोवस्थानामुपरिस्थितं, शूद्रः वैश्यादीन्, वैश्योऽपि क्षत्रियद्विजौ, क्षत्रियः ब्राह्मणमिति । स्वसमानं ब्राह्मणो ब्राह्मणमित्यादिना वा कनीयांसं द्विजः क्षत्रियं सोऽपि वैश्यं, यतिर्वनस्थं सोऽपि गृहिणं अशीतिवयास्त्रिंशत्प्रायमित्यपि गुरुं भजेदित्यर्थः । सर्वेषां ज्ञानबलेनैव गुरुत्वं नान्यथा । स्त्रीशूद्राणां वैदिकबोधासंभवान्नैव गुरुत्वं । तथा च सूतसंमतिमाह —

पृष्ठ सं-२४ श्लो सं ६२-६४

तस्माद्वर्णाश्रमवयोवस्थाभिमानतो गुरौ लध्वी बुद्धिवृत्तिर्मूलक्षयकरी परमशिवधीरेव श्रेयस्करीति श्रीशिववचनं हरिं प्रति — आचार्योऽनीश्वरज्ञान-

मुपेक्षा च तथैव च । आचार्यनिन्दाश्रवणं तद्भावायाश्च दर्शनम् ।। आचार्ये बालबुद्धिश्च नरबुद्धिस्तथैव च । अरिष्टबुद्धिः श्रीनाथ ज्ञानानुत्पत्तिकारणम् ।। इति । यस्य देवे परा भक्तिः यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।। इति ।

पृ सं-२५ श्लो सं-६५

श्रुत्यादौ गुरुव्यतिरेको दृश्यत इत्याह — विदेहेति ।।

एवं महोपनिषदि जनकं प्रति शुकवचः । तथा च केकयक्षत्रियं प्रति प्राचीनशालादीनां वैश्वानरविद्याविषयोपगमश्च छान्दोग्ये । मनुश्चाह —

पृ. सं.-२५ श्लो सं. ६९-७०

एवमादिभिर्हेतुभिः हीनमपि गुरुं नावमन्येतेत्यर्थः ।।

पृ सं. २६ श्लो. सं. ७४

शिवलिङ्गं त्रिसन्ध्यमहरहरभ्यर्चयेत् कुशेष्वासीनो ध्यात्वा साम्बं मामेव वृषारूढं हिरण्यवर्णम् शिवमनाद्यंतं रुद्रसूक्तैरभिषिच्य सितेन भस्मना श्रीफलदलैस्त्रिशाखैः आर्द्रैः अनार्द्रैर्वा न तत्र सम्मर्श इत्यादि । कालीखण्डे — 'गुरुर्दद्यात् बाणलिङ्गं स्फाटिकं वा तु शाम्भवम् । वदेच्छिष्यं समाहूय पुरस्तात् देशिकोत्तमः ।। वरं प्राणपरित्यागः छेदनं शिरसोऽपि वा ।। न त्वनभ्यर्च्य भुञ्जीयात् भगवन्तं त्रिलोचनम् ।। इति त्रिवारमुच्चार्य दत्तं लिङ्गं सशिष्यकः । तथा, प्रतिज्ञयोपाददीत देशिकस्य च हस्ततः ।। तस्मिन्नेव महादेवं पूजयेत् प्रणवेन तु । भैक्षं निवेद्य चाश्नीयात्' इत्यादि परमेश्वराराधनं शिवज्ञानसाधनमित्यभिप्रेत्याह । ईश्वरप्रणिधानाद्वेति श्रीपतञ्जलिस्सूत्रयामास ।

यद्यपि परमहंसानां मानसपूजेति श्रुतौ सत्यामपि तदनधिकृतानां बाणादिलिङ्गं पूज्यमेवेत्याह श्रीपराशरः विग्रहो देवदेवस्य विश्वमेतच्चराचरम् ।

इति ज्ञानं परापूजा शिवस्य महती हि सा ॥ योगिनामेव सा पूजा महती हि सुमङ्गला । अयोगी तत्प्रसिद्ध्यर्थं कुर्याल्लिङ्गे शिवार्चनम् ॥ इति । पराशरमाधवीये च–भिक्षाशनं जपं स्नानं ध्यानं शौचं सुरार्चनम् । कर्तव्यानि षडेतानि सर्वदा नृप दण्डवत् ॥ इति । कात्यायनश्च-त्रिकालमेककालं वा पूजयेत् पुरुषोत्तमम् । इति । व्यासः — अन्यानीतैश्च कुसुमैः अर्चयेत् जगदीश्वरम् । भावपुष्पैर्यजेद्योगी बाह्ये वा श्रद्धया शिवम् ॥ विष्णोः पादोदकं जुष्टं नैवेद्यस्य च भक्षणम् । निर्माल्यधारणं चैव महापातकनाशनम् ॥ यजेदामरणं लिङ्गं विरक्तः पारमेश्वरम् । अग्नौ क्रियावतामप्सु व्योम्नि सूर्ये मनीषिणाम् । काष्ठादिष्वेव मूर्खाणां हृदि लिङ्गे तु योगिनाम् ॥ इति तत्र तत्र बहुशः सन्ति ॥

पृ. सं-२६- श्लो. सं.-७७

भिक्षास्नानादिविषये प्रश्ने कृतेऽपि-अच्युतोऽहमनन्तोऽहमानन्दोऽहमहं हरिः । ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयन् ॥ सोऽहमर्कः परं ज्योतिर्-र्कज्योतिरहं शिवः । आत्मज्योतिरहं शुद्धस्सर्वज्योतिरसावहो ॥ इति मनसा भावयन् तूष्णीमेव स्थातव्यम् । यद्वा प्रणवशिवनाम्नां श्रुतौ तारकत्वप्रसिद्धेस्तानि वा, 'दद्यान्नारायणेत्येवं प्रतिवाक्यं सदा यतिः' इति श्रवणान्नारायणेति वा प्रतिवचनं यथायोग्यं वदेत् ॥

पृ. सं.-२६ श्लो. सं-७८ ८२

गृहे वाथ जलाभ्याशे स्वात्मलिङ्गे निवेद्य च । द्वादशावृत्त-तारेणाभ्युक्ष्याथ परिवेषयेत् ॥ आपोशनं तथा प्राणाहुतीः कुर्यात् सतारकाः । हविर्भैषज्यवत्सर्वं प्राश्नीयात् प्राणधारणात् ॥ उत्तरापोशनं प्राग्वत् शेषं दक्षिणतो नयेत् । भैक्षेण वर्तयेन्नित्यं नैकान्नाशी भवेत् क्वचित् । निरीक्षन्ते त्वनुद्विग्नास्तद्गृहं यत्नतो व्रजेत् ॥ पञ्चसप्तगृहाणां तु भिक्षामिच्छेत् क्रियावताम् । गोदोहमात्रमाकाङ्क्षेन्निष्क्रान्तो न पुनर्व्रजेत् ॥ नक्ताद्वरश्चोपवास

उपवासादयाचितः। अयाचितात्परं भैक्षं तस्मात् भैक्षेण वर्तयेत् ॥ नैव सव्यापसव्येन भिक्षाकाले विशेत् गृहान्। श्रोत्रियान्न न भिक्षेत श्रद्धाभक्ति-बहिष्कृतम्। व्रात्यस्यापि गृहे भिक्षां श्रद्धाभक्तियुतां चरेत् ॥

एवं मूलश्रुतिवचनानि —

मनुः — न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया। नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः। नाकीर्णं भिक्षुकैर्वान्यैरगारमुपसंव्रजेत् ॥

व्यासः — सप्तागारं चरेत् भैक्षमलाभे तु पुनश्चरेत्। गोदोहमात्रं तिष्ठेत्तु कालं भिक्षुरधोमुखः ॥

श्रीबोधायनः — ब्राह्मणानां शालिनियायावराणामपवृत्ते वैश्वदेवे भिक्षां लिप्सेत। गोदोहनमात्रमाकांक्षेत्। अद्भिः संस्पृश्यौषधवत् प्राश्नीयात् अयाचितमसंक्लृप्तं उपपन्नं यदृच्छया। आहारमात्रं भुञ्जीत केवलं प्राण-यात्रिकम्। अथाप्युदाहरन्ति — अष्टौ ग्रासा मुनेः भोज्याः षोडशारण्य-वासिनः। द्वात्रिंशतं गृहस्थानाममितं ब्रह्मचारिणाम्। भैक्षं वा सर्ववर्णेभ्य एकान्नं वा द्विजातिषु। अपि वा सर्ववर्णेभ्यो न चैकान्नं द्विजातिषु ॥ इति।

अन्यत्र च — यदि द्विभोजनं कुर्यात् दुर्बलो ज्ञानलिप्सया। श्रवणस्यावश्यकत्वाच्छ्रवणार्थो ह्ययं विधिः ॥ इति।

उशनाः — माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम्। तात्कालिकं चोपपन्नं भैक्षं पञ्चविधं स्मृतम् ॥ इति।

मैत्रायणीयश्रुतौ—भिक्षार्थं ग्राममाविशेदासायं प्रदक्षिणेनाविचिकित्सन् सार्ववर्णिकं भैक्षाचरणमभिशस्तपतितवर्जमिति ॥

आरुणीयश्रुतौ — यतयो भिक्षार्थं ग्रामं प्रविशन्ति पाणिपात्र-

मुदरपात्रं वा ओं ह्रिं ओं ह्रिं ओं ह्रिं एतदुपनिषदं विन्यसेत् एवं वेद औषधवदशनमाचरेत् इति ॥

श्रीपराशरः – यतीनामातुराणां तु वृद्धानां दीर्घरोगिणाम् । एकान्नेनैव दोषस्स्यादेकस्यैव दिने दिने ॥ सुजीर्णोऽतिकृशो रोगी सुश्रान्तो विकलेन्द्रियः । पुत्रमित्रगुरुभ्रातृपत्नीभ्यो भैक्षमाहरेदिति ॥

विष्णुः — सव्येनादाय पात्रं तु दण्डं वै दक्षिणेन च । नमस्कृत्य तथादित्यं समाक्रामन्नुपानहाविति ॥

माधवीयोक्त श्रीबोधायनवचनम् — अथ भिक्षाचर्यादुपावृत्तश्च हस्तौ पादौ प्रक्षाल्य आचम्यादित्यस्याग्रे निवेदयन्नुदुत्यं चित्रमिति, ब्रह्मजज्ञानमित्युद्वयं तमसस्परीति च जपित्वा भुञ्जीतेति । इदं नद्यादिस्थलेषु केवलभिक्षान्नभुक्तिविषयम् ॥

मनुः — जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्रमिवांभसेति ॥

कण्वः — एकान्नं न तु भुञ्जीत शुद्धं वापि कथञ्चन । अशक्तोऽनुग्रहार्थं वा यतिरेकान्नभुक् भवेत् ॥

दत्तात्रेयः — कृते देशं त्यजेत् ग्रामं त्रेतायां द्वापरे कुलम् । कर्तारं तु कलौ दुष्टं त्यक्त्वा भैक्षं चरेद्यतिः ॥

क्रतुः — वर्ज्यान्नमाह अवीरा गर्भिणी गुर्वी गर्भभर्तृद्रुहाऽसती । कन्या धात्री पुनर्भूर्यास्ताभ्योऽन्नं नाददीत च ॥

अवीरेति — अवीरा पतिसुतहीना । गुर्वी स्वतिमात्रकाया । भर्तरि द्रोहं कुर्वती । धात्री कन्यामन्याभ्यस्समादाय विक्रयार्थं पालयित्री । पुनर्भूः पुनरन्यस्य पाणिग्रहं प्राप्ता एताभिरुद्धृतमपि भिक्षान्नं नाददीतेत्यर्थः ॥

अन्यत्र च — कन्ययोपहृतं नग्नावटुकाभ्यामवज्ञया। आर्तया क्रुद्धया चान्नं भोक्तुमारब्धया स्त्रिया॥ तथैव कामचारिण्या जारैर्वाप्यभिशस्तया। हीनाङ्गया व्याधितया खिन्नया कामसक्तया॥ सुखोपविष्टया मुक्तकेशिन्या स्वापशान्तया। दत्तं भैक्षं न गृह्णीयात् वृषलेन निमन्त्रितम्। तद्दृष्टं च तथा स्पृष्टं शीघ्रमेव विनिर्गमेदिति॥

अत्रिः — कुटुम्बसंकटं चैव खलैर्वोपहतं गृहम्। दुष्टग्रहावृतं यच्चत्तद्गृहं वर्जयेद्यतिः॥ उदक्या चोदितं चान्नं द्विजान्नं शूद्रचोदितम्। प्राणवक्रे चायसे क्लृप्तं भिक्षुर्यत्नेन वर्जयेत्॥

पृ. सं-२७ श्लो. सं-८२

संप्रदायविधिनिषेधवचनम्। अथ भिक्षाशनं विदुषामेवात्मलिङ्ग-निवेदनं भवति। अन्येषामीश्वरसमर्पणपूर्वमेवाशनं भवेत्। अन्नानुरूपत्वात् बुद्धेरीश्वरध्यानाद्युपयोगं चित्तं भवेदिति गम्यते। श्रुतिश्च आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिलाभे सर्वग्रन्थीनां विप्रमोक्ष इति। तथैव जाबालाः — रुद्रभुक्तं भुञ्जीत रुद्रपीतं पिबेत। रुद्राघ्रातं जिघ्रीत यद्यनभ्यर्च्य वैश्वेश्वरं लिङ्गमश्नीयात् यत्किंचित् फलमन्यद्वा मलाशनो भवति। यदि पयः पिबेत् पूयपो भवतीति। अन्यत्र च — केवलाघो भवति केवलादीति तस्मात् स्वेष्टदेवाय निवेद्य भुञ्जीत। इन्द्रियादागतं किञ्चित्सुखं तच्छिवार्पितम्। कृत्वा तच्छेषताबुध्या तत् भोग्यं तत्तदिन्द्रियैरिति। यदेवाति-रम्यं स्वभोगोपयुक्तं तदीशाय सर्वं निवेद्यशेषमिति च पुराणेतिहास-वचनानि॥

ननु, निर्माल्यं च निवेद्यं च भुक्त्वा चान्द्रायणं चरेत्। रुद्रेण भुक्तं निर्माल्यमित्यादिना निर्माल्यस्यापरिग्राह्यत्वे कथमिव शिवार्पणं कृत्वा भोज्यं भवतीति चेत् — तत्तान्त्रिकपूजकनिबन्धनं निर्माल्यत्वं तदपरिग्राह्यत्वं चेत्यादिना। वैदिकतान्त्रिकविभागश्च दर्शितो ब्रह्मानन्दमुनिभिः स्वकीय-

पुरुषार्थप्रबोधाख्यनिबन्धने । प्रसादान्नप्रसादाम्बुपादाम्बूनि पिनाकिनः । संसारविषवृक्षस्य कुठाराणि न संशयः ॥ क्वचित् कदाचित् निर्माल्यं नैवेद्यं च निषिध्यते । शिवप्रसाद कुत्रापि स्वप्नेऽपि न निषिध्यते ॥ अयं क्वचित् कदाचित्तु निवेदितमितीर्यते । निर्माल्यशब्दवाच्यं यत् रुद्रोच्छिष्टं क्वचित् क्वचित् ॥ तत्तु प्रसादनैवेद्यशब्दाभ्यामपि कथ्यते । प्रसादशब्दः पठितो निर्माल्यस्वसन्निधौ ॥ सत्वदेहस्य रुद्रस्य शिवाभेदविवक्षया । बुधैः प्रसादशब्देन रुद्रोच्छिष्टमुदीर्यते ॥ भोगबुद्धिं परित्यज्य दासभावेन भक्षितः । शिवप्रसादस्त्वचिरात् भोगमोक्षप्रदो नृणाम् ॥ स्कान्दे तु कालिकाखण्डे देव्यै देवेन शंभुना । शिवप्रसादमाहात्म्यं कारुण्येन प्रकाशितम् ॥ शैवे पुराणे निर्माल्यमाहात्म्यं कृपयोक्तवान् । इमं प्रसादं भुञ्जानो विरिञ्चिः किल जैमिने ॥ अष्टादशमहाविद्यास्थानवाराशिपारगः । विष्णुः परशुरामोपि शिवेन परिदीक्षितौ ॥ पादोदकप्रसादान्ननिर्माल्यानां निषेवकौ । वसिष्ठोपि गरिष्ठोभूत् प्रसादस्य प्रभावतः ॥ तस्मात्तत्पादतीर्थं च प्रसादान्नं च भक्षयेत् । हरिवंशेपि पुरुहूतस्यैवं नारदस्य च । संवादे शिवनिर्माल्यमाहात्म्यं संप्रदर्शितम् वसुरुद्रार्करूपेण मध्यपिण्डस्तु पुत्रदः ॥ वेदोक्तं रुद्रनिर्माल्यं किं पुनर्बहुभाषणैः । संग्रहेणादित्यपुराणे चातिस्पष्टमादरात् ॥ अन्यत्रापि च पादोदकादिमाहात्म्यमीरितम् । बोधायनोपि भगवान् सर्वप्राणिहिते रतः ॥ रुद्रपादाम्बुमाहात्म्यं प्रोक्तवान् करुणाबलात् । स्कान्दे सौरे पुराणे च तथान्यत्रापि कीर्तितम् ॥ इत्यादि । तस्मात् शिवमाराध्य तत्प्रसादस्वीकारेण चित्तशुद्धिर्भवेदेव ॥

**पृ. सं-२७ श्लो. सं. ८३-८९**

श्रीबोधायनेन प्राणाहुतयः प्रशस्यन्ते ॥ माधूकरी वृत्तिरेव सर्वश्रुत्यभिमतेत्याह —

इति सार्ववर्णिकं भैक्षाशनमुशन्ति श्रुतयः । तथा च सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनादिति वैयासिकं सूत्रम् ॥

पृ. सं.-२७ श्लो. सं. -९०

कराग्रिक्षालनाचमनाभ्यां कराग्रिमुखाज्ञान्यार्द्राणि भवेयुः । गुरुज्येष्ठादिसान्निध्ये तेषामापोशनानन्तरं तदनुज्ञया पक्तीणां वानुज्ञया स्वाभिमतदेवायान्नं निवेद्य पश्चात् द्वादशावृत्ततारांम्बुना प्रोक्ष्य यजमानेन दत्तं जलं परिषिच्य पुनरेवाभिमन्त्र्य प्राश्य तारेणैव प्राणाहुतीः कुर्यात् ॥

पृ सं-२८ श्लो. सं. ९१

उक्तपर्याप्तं अष्टौ ग्रासा मुनेरित्यादि श्रीबोधायनादिसर्वज्ञमुनिवरपरिमितमन्नं ग्रासाष्टकलक्षणमन्तराग्निकुण्डे महेश्वरवैश्वानरज्योतिषि मनस्समाधायाग्निहोत्रवदन्नपानाहुतीश्चरेत् । तथा च श्रुतिः — अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया । गृह्णन्ति ते जिह्वया ससमिति । अस्यार्थः — जने जनेषु सर्वप्राणिबुद्धिकुहरेषु अन्तः अन्तर्यामितया तिष्ठन्तं परं सर्वोत्कृष्टं तं प्रसिद्धं रुद्रं ये महाभागा मनीषया मननवत्या बुद्धिवृत्त्येच्छन्ति ध्यायन्ति । यद्धि मनसा ध्यायति तद्वाचा वदतीति श्रुतेर्नामभिः वा भजन्ति त एव ससं सस्यविकारमन्नं व्यञ्जनादि जिह्वया गृह्णन्ति । ये तु कुमतयो नेच्छन्ति पूर्वोक्तं देवं ते पक्वान्नमपि पुरीषमेव गृह्णन्तीति काकाक्षिन्यात । तथा च पुराणवचनम् — अन्तरिच्छति यो रुद्रं सदा वन्द्यं मनीषया । गृह्णाति जिह्वया सोऽयं रसपूर्णामृतोदकम् ॥ अन्तर्नेच्छति ये रुद्रं भवानीसहितं शिवम् । पुरीषमेव गृह्णन्ति जिह्वया ते न संशयः ॥ इति । कवळे कवळे नित्यं महादेवमनुस्मरन् । यस्तस्य पातकं तावत् क्षणेन लयमेष्यति ॥ इति ।

अथ मुनीनां भोजने त्याज्यवस्तूनि श्रुतिराह तेष्वभिमाननिरासाय वा ॥

पृ. सं. २८ श्लो. सं-९२

एवं भिक्षानियममुक्त्वा वासिष्ठलैङ्गे समुदायधर्मानाह — भिक्षाशित्वं शिवध्यानं स्नानं सन्ध्यासु भस्मना । आत्मज्ञानार्थमाचार्याद्वेदान्तश्रवणं सदा । धर्मोऽयं भिक्षुकस्योक्तो मया वेदान्तवित्तम ॥ इति । तथा च

श्रुतयोऽप्याहुः — भिक्षोर्नैहिकामुष्मिकापेक्षास्ति । यद्यपेक्षा तदनु स्वरूपभ्रंशो भवति । स्वरूपानुसन्धानव्यतिरिक्तान्यशास्त्रैरुष्ट्रकुङ्कुमभारवत् । न योगशास्त्रप्रवृत्तिः न सांख्यशास्त्राभ्यासो न मन्त्रतन्त्रव्यापार इतरशास्त्रप्रवृत्तिरस्ति चेच्छवालङ्कारवच्चर्मकारवदिति । दद्यान्नावसरं किंचित् कामादीनां मनागपि । आ सुप्तेरा मृतेः कालं नयेद्वेदान्तचिन्तया ॥ क्षणमात्रं ब्रह्मदृष्टिं विना देहादिभावनः । भिक्षाहारी न तिष्ठेत तथा च श्रुतिशासनम् ॥ ज्ञानदण्डो धृतो येन त्वेकदण्डी स उच्यते । काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः । स याति नरकान् घोरान् महारौरवरौरवान् ॥ प्रतिष्ठा सूकरी विष्ठासमा गीता महर्षिभिः । तस्मादेनां परित्यज्य कीटवत् पर्यटेत् यतिः ॥ नैष्कर्म्येण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः । न समाधानजप्याभ्यां यस्य निर्वासनं मनः ॥ इति अतीतलक्षणम् ॥

**पृ. सं-२८ श्लो. सं ९७**

अथ विद्यासंप्रदायप्रवर्तनार्थं सञ्चरतां मुनीनां वृत्तिमाह—

**पृ. सं. २९ श्लो. सं. १०५**

वागिति अन्या वाचो विमुञ्चथामृतस्यैष सेतुरिति । कत्थनं कुत्थनं स्वस्तिरिति । नानुध्यायाद् बहून् शब्दान् वाचो विग्लापनं हि तदिति । ब्रह्मैकविषयां वाचं वदेत् सन्ततमात्मनेति च श्रुतिस्मृतिभ्यां मुनेः स्वधर्मत्वान्मौनस्य तत्प्रच्युत्या वा अनृतासंभाष्यडम्भरूक्षपरुषादिवचनप्रसक्तौ वाग्दण्डस्यावश्यं कर्तव्यत्वं स्यात् । स दण्डोऽपि मौनरूपः । तथा सानुरागमन्यशरीराभिमर्शनादिदेहविषयापराधे तूपवास एव नान्यत् प्रायश्चित्तम् । अन्तःकरणनिगूहितप्राक्संस्कार संस्फुरद्दुर्वासनाविलसितविचित्रशब्दादिविषयस्मृतिकुतुक मनोदण्डे प्राणायामः कार्यः ॥

ननु प्राणायामेनैव देहेन्द्रियमनस्संघाते सम्यक् दण्डयितुं योग्ये किमन्यकल्पनागौरवेणेति चेत् सत्यम् । 'आराग्रेन्मधु विन्देत गिरेरारोहणे

कुतः' इति न्यायेनान्यान्यखिलानि गौणान्येव। न वयं चान्यदन्यस्येति पार्थक्येन परिहारं ब्रूमः। यथा-गुल्मस्यायःप्रदानं नयनरुजि घृते हेम निक्षिप्य देयमित्यादिवत्। कथंतर्हि? गृहस्वाम्यनुग्रहार्थं रविदिनप्रसूतिका दोग्ध्री विप्राय दीयतामित्यत्र वत्सतरीं पयश्चेतिवत् श्रुत्यभिप्रायः। प्राणायामाङ्गत्वान्मौनोपवासयोः मनो विना वाक्काययोः कथमागः? कथं वा निष्कृतिः? सुप्तसमाधिस्थश्वादिष्वपराधादर्शनात्। तस्मान्मुनेः प्राणायाम एव प्रायश्चित्ततया विहितो नान्य इत्यर्थः। यत एवं कर्तृत्वाभिमानिनो विधिनिषेधप्रायश्चित्तानि चोदनान्यामोक्षं प्रविभान्ति तदधीनस्तत् करोत्येव। विद्याभ्यासिनस्तु केवलं विद्यामेवाश्रयन्ति न कर्मेत्याह —

**पृ. सं-३२ श्लो. सं. १३८**

ब्रह्मेति ब्रह्मणः विद्या ज्ञानं तदर्थं पूर्वेपि महान्तः गुरुशुश्रूषणं श्रद्धयैव कृतवन्त इति श्रूयते। एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्य-मुवासेति। कात्यायनाश्वलायनादयो मुनयः ब्रह्मादिगुरून् चिरपरिचर्यया-ऽतिमृदुललिताभिः स्तुतिभिः वित्तैश्च संपूज्य किलापृच्छन्। याज्ञवल्क्यमुनिं प्रति प्रतिप्रश्नं हस्ति ऋषभं सहस्रं ददामीति जनकोक्तिः। प्राचीनशाल-प्रभृतय उद्दालकान्ताष्षड्वैश्वानरविद्यायां परिनिष्ठाः प्रतिपद्यमानाः केकयं राजानमभ्याजग्मुरिति। विदेहाधिपतेस्सौधद्वारि सप्तरात्रं शुकमुनिः परीक्षार्थं तेनावज्ञया समुज्झितः। तस्मात् उपसर्पणं बहुभाग्यवशादेव लभ्यते। धीरोपि न चात्मानं वेत्तीत्याह। उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधतेति॥

किञ्च य आतृणत्त्यवितथेन कर्णौ सुखं कुर्वन्नमृतं संप्रयच्छन्। तं वै विद्यात् पितरं मातरं च तस्मै न द्रुह्येत् कृतमस्य जानन्निति। त्वं हि नः पिता योस्माकमविद्यायाः परं पारं तारयसीति। यावद्दोपाधिपर्यन्तं तावत् शुश्रूषयेत् गुरुम्। गुरुवत् गुरुभार्यायां तत्पुत्रेषु च वर्तनमिति। दिव्य-ज्ञानोपदेष्टारं देशिकं परमेश्वरम्। पूजयेत् परया भक्त्या तस्य ज्ञानफलं

लभेत् ॥ इति । यो ददाति महाविद्यां हंसाख्यां पारमेश्वरीम् । तस्य दास्यं सदा कुर्यात् श्रद्धया परया सह ॥ शुभं वाऽशुभमन्यद्वा यदुक्तं गुरुणा भुवि । तत्कुर्यादविचारेण शिष्यसन्तोषसंयुतः ॥ देहजात्यादिसंबन्धान्वर्णाश्रमसमन्वितान् । वेदान् शास्त्राणि सर्वाणि पदपांसुमिव त्यजेत् ॥ न गुरुं सन्त्यजेन्नित्यं जानन्नस्य कृतं नरः । गुरुभक्तिं सदा कुर्यात् श्रेयसे भूयसे नरः इति । यं यं लोकं मनसा संविभाति विशुद्धसत्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेत भूतिकामः ॥ इति बहुश्रुतिभिः अवश्यं देशजातिकुलवित्तविद्यावयस्संपदाद्यभिमानत्यागपूर्वकं शुश्रूषा कार्येत्याह — तारेति ॥

अथ मनोविक्षेपशान्त्युपायानाह—

पृष्ठ सं-३२ श्लो सं १४२ १४४

काव्येति । काव्यादेः पाठः स्वतः पठनम् । प्रवचनं शिष्येभ्योऽर्थनिरूपणम् । अपि च श्रीसद्मसुखसंपदां कीर्तनं अयमेवं विशिष्ट इयमित्थंरूपा विभुरित्यादि तत्तत्संपत्प्रशंसनं पुराणगतमपि पुण्यश्लोककथाश्रवणफलश्रुतेः सत्वेपि श्रोतुश्चित्तविक्षोभकरत्वात् त्याज्यमेव । तथा च नर्तगीते । भवत्वेवं नरसंपत्कीर्तनस्यैव नश्वरत्वान्नेश्वरस्यापीति चेन्न । रासक्रीडामरूकप्रवेशनादीश्वरांशचरितमपि मोहकारणत्वान्न श्राव्यं मनसो निरांकुशत्वात् । तर्हि 'यश्चतुर्वेदविद्विप्रः पुराणं वेत्ति नार्थतः । तं दृष्ट्वा भयमाप्नोति वेदो मां प्रतरिष्यति ॥' इति पुराणवचनस्य क गतिरिति चेत् ये व्यवहारवन्तो लौकिकास्संसारिणः तेषामात्मतत्वार्थस्य दुरधिगमत्वात् स्वव्यापारवदीशस्यापीति प्ररोचयन् चिरकालतोऽप्यवतरणाय शनैर्विशुद्धात्मतत्वप्रतिपत्तिसौकर्याय प्रवृत्तमित्यभिप्रायः । तस्मान्नष्ठ मुमुक्षुस्तदाश्रयेदित्यर्थः । पुनः किमभ्यसनीयं विक्षेपशान्त्य इत्यत्राह — विक्षेपशान्त्य इति ॥

पृ. सं.-३३ श्लो सं. १५५

विक्षेपो नाम देहादिप्रपञ्चस्य सत्यत्वज्ञानदार्ढ्यम् । अत एव हि सर्वक्लेशजनिः । प्रथमं तच्छान्तये । अतोऽन्यदार्तमिति श्रुत्या स्वाप-प्रबोधयोरसर्वप्रपञ्चलयोदयाभ्यां जगतः स्वायत्तानुभवेन च स्वेतरसमस्तस्य जगतो मिथ्यात्वं वक्ष्यमाणश्रुतिभिर्निश्चेतुं शक्यत इत्याह मत्त इति ॥

पृ. सं-३३ श्लो सं १५६-१५९

विपश्चितामपि शास्त्रजन्यज्ञानवतां कर्तृत्वादिव्यवहृतेः कारणं देहादावहं-ममताधीरेव नान्यत् । साप्यतस्मिन् तद्ग्रहत्वतः महाभ्रान्तिरेव । तन्निवर्तनो-पायस्तु कोहंस्वभावः तस्य मम को बन्धः । मुक्तिः कतमा किमात्मिका कथातेति विचारसान्तत्यादेवाञ्जसा ब्रह्मतेजसा ब्रह्माकारमनोवृत्तिप्रकाशनेन हि विनश्यति । एतन्मननप्रकारमात्मबोधोपनिषदाहात्मानमित्यादिना ॥

पृ. सं-३४ श्लो. सं १५४

ब्राह्मण्यादीनामनात्मधर्माणामात्मीयत्वेन यः स्वीकरोति स दुःखभाक् भवति । अतस्तत्तद्देहधर्मत्वेन विचार्य निर्विकारासंगकूटस्थनित्यशुद्धबुद्धब्रह्म-स्वरूपतामात्मनो विज्ञाय चिरमहमित्येवं सन्ततमनुसन्दध्यात् । सहि स्वप्रकाश-स्वरूपं स्वयं साक्षात्करोति नान्य इत्याह उलूकेति ॥

पृ. सं ३३ श्लो सं-१६०

एवमात्मबोधोपनिषद्वाक्यार्थमननं कार्यमित्यर्थः । इत्थमात्मबोधानव-बोधयोर्जीवकलानैश्चल्यचाञ्चल्यकारणत्वेन तत्स्थिरीकरणार्थं तदवस्थाभेदमाह — वक्ष्य इति ॥

पृ. सं-३५ श्लो. सं-१६५

एवं तदवस्थामुक्त्वा पुनर्यः कश्चित् सूचीरन्ध्रतन्तुनिवेशनवज्जीव-परमात्मैकीकरणार्थमौषधशलाकिकादिसाधनं प्रत्यक्षवस्तुविषयं संपादयिष्यति । तत्क्रियावैफल्ये शास्त्रं निन्दिष्यतीति तत्साक्षात्कारो दुर्भद इत्याह वालाग्रेति ॥

पृ. सं-३५ श्लो. सं-१७०

जीवस्य नीवाराग्रसहस्रांशत्वेन शास्त्रतो विज्ञेयत्वेपि स च तादृशोपि च वक्ष्यमाणप्रकारेण प्रयत्नेन परमात्मस्वरूपाभिमुखस्सन् शिवगुरुमनःप्रसादैः कदापि साक्षात्कृत्यानन्त्याय जननमरणादिध्वंसकमोक्षाय भवति । स एव चराचरं जगत् चैतन्यात्मनावतिष्ठते स तु स्त्रीपुन्नपुंसकादिभेदभिन्नमखिलं स्वात्ममात्रं पश्यतीत्यर्थः ॥

नन्वेवं चेत् जीव एव शिवो भवति । तर्हि जीवरूपमप्यजानता साधकेन कथं परेणैक्यं क्रियतामिति चेत । अहो मनःप्रसादः । प्राचीं दिशं प्रस्थापितः कथञ्चित् प्रतीचीं प्रातिष्ठिपः किम्नु । शृणु, नैवं ब्रूते शास्त्रम् संसारी साधकः, जीवः सूक्ष्मः, अरूपः परमात्मेति त्रेधा विभज्य । पुनः कथं ? भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति श्रुत्या ब्रह्मात्मैकत्वमेव प्रतिपाद्यते । तथैव तदनन्यत्वमारंभणशब्दादिभ्य इत्यत्र सूत्रकारभाष्यव्याख्यातृभिश्चायमर्थो निर्णीत इति । भवतु परमार्थत एकत्वम् ॥

भेदप्रतीतिनिरासपूर्वकमात्मज्ञानाय क उपाय इत्यत्र मुक्तिकोपनिषदाह — हस्तेनेति ॥

पृ. सं-३५ श्लो. सं.-१७२

एवं जीवस्य परमार्थस्वरूपभूतं परमात्मानं युक्त्यादिभिर्विविच्य विजानीयादित्यन्या च श्रुतिरूचे इत्याह ॥

पृ सं.-३६ श्लो सं-१८२

एवं च प्रथममुहूर्ते प्रातःस्नानानुष्ठानम् । द्वितीये प्रणवोपास्तिः । तृतीये शास्त्राभ्यासः । चतुर्थे माध्याह्निकम् । पञ्चमे भिक्षादिनियमः । षष्ठे एकान्तस्थितिः । सप्तमे सत्सङ्गः । अष्टमे सायंसन्ध्यादि । रात्रौ सन्ततमात्मध्यानमेव कार्यमिति वैदिकाभिप्रायः शिष्टाचारश्च । एवमधिगतब्रह्मदर्शनस्य

निरतिशयानन्दावाप्त्या न तस्य किञ्चित् पारलौकिकमैहिकं वेत्याह पैङ्गलमुनिप्रश्नस्य याज्ञवल्क्यः — एको भिक्षादिसंपन्न एकविंशतिकं कुलम् । मुमुक्षुस्तारयत्येव सर्वपापविनाशकृत ॥ ब्रह्मवेदनमात्रेण कुलमष्टोत्तरं शतम् । प्रारब्धान्ते व्यवहरत्यहिर्निर्मोकवत सुधीः ॥ चन्द्रवच्चरते योगी स मुक्तश्चानिकेतनः । तीर्थे श्वपचगेहे वा तनुं विहाय याति कैवल्यम् । प्राणानवकीर्य याति कैवल्यं । तं पश्चाद्दिग्बलिं कुर्यात् अथवा खननं चरेत् । पुंसः प्रव्रजिनः प्रोक्तं नेतराय कदाचन । नाशौचं नाग्निकार्यं च न पिण्डं नोदकक्रिया । न कुर्यात् पार्वणादीनि ब्रह्मीभूताय भिक्षवे । दग्धस्य दहनं नास्ति पक्वस्य पचनं यथा । ज्ञानाग्निदग्धदेहस्य नैव श्राद्धं न च क्रिया ॥

यावद्दोपाधिपर्यन्तं तावच्छुश्रूषयेत गुरुम् । गुरुवत् गुरुभार्यायां तत्पुत्रेषु च वर्तनम् ॥ सहिष्णुस्सोहमस्मीति प्राप्ते च परमात्मनि । हृदि स्थिते सदा काले लब्धशान्तिपदं गते ॥ अमृतेनैव तृप्तस्य पयसा किं प्रयोजनम् । आत्मविज्ञानिनस्तद्वद्वेदैः किं वान्यशास्त्रतः ॥ ज्ञानामृतेन तृप्तस्य न कर्तव्यं कथञ्चन । लोकसंग्रहणं वापि करोतु न करोतु वा ॥ कर्तव्यं किञ्चिदपि चेद्यथार्थं न स तत्ववित् । हृदयं निर्मलं कृत्वा चिन्तयित्वाप्यनामयम् ॥ अहमेव परं सर्वमिति पश्येत् परं सुखम् । यथा जलं जले क्षिप्तं क्षीरं क्षीरे घृते घृतम् ॥ अविशेषो भवेत् तद्वत् जीवात्मपरमात्मनोः । ज्ञानाग्निना दीपितेऽस्मिन्धीरखण्डाकृतिर्भवेत् ॥ तदा विद्वान् कर्मबन्धं निर्दहेत् ज्ञानवह्निना । ततः पवित्रं परमेश्वराख्यमद्वैतरूपं विमलांबराभम् । यथोदके तोयमनुप्रविष्टं तथात्मरूपो निरुपाधिसंस्थितः ॥ आकाशवत् सूक्ष्मशरीर आत्मा न दृश्यते वायुवदन्तरात्मा । स बाह्यमाभ्यन्तरनिश्चलात्मा ज्ञानोल्कया पश्यति चात्मरूपम् ॥

तपेद्वर्षसहस्राणि एकपादस्थितो नरः । एतस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम् ॥ इदं ज्ञानमिदं ज्ञेयमेतत्सर्वं ज्ञातुमिच्छति । अपि

वर्षसहस्रायुः शास्त्रान्तं नाधिगच्छति ॥ विज्ञेयोऽक्षरचिन्मात्रो जीवितं चापि चञ्चलम् । विहाय शास्त्रजालानि यत्सुखं तदुपास्यताम् ॥ अनन्तकर्मशौचं च जपो यज्ञस्तथैव च । तीर्थयात्राभिगमनं यावत्तत्वं न विन्दति ॥ अहं ब्रह्मेति नियतं मोक्षहेतुर्महात्मनाम् । द्वे पदे बन्धमोक्षाय न ममेति ममेति च ॥ मनसोऽप्युन्मनीभावे द्वैतं नैवोपलभ्यते । यदा यात्युन्मनीभावस्तदा तत्परमं पदम् ॥ इति मार्गेण तत्ववित् भवेत् । अथवा महोपनिषदीरितमुपायमाह — तथेति ॥

**पृ. सं.–३७ श्लो सं.–१९०**

हि यस्मात् महोपनिषदि ऋभुनिदाघवैदिकसंवादरूपमुपदेशं श्रीशिव एव शुकमुनिनिमित्तं सर्वलोकोपकारायानुजगाद । तत्प्रकारं चित्तशुद्ध्यर्थमनुसन्दध्यात् । तत्कथंरूपमित्यत्राह प्रज्ञयेति ॥

**पृ. सं.–३७ श्लो. सं.–१९१**

एवमादिश्रौतमार्गेण सदा ब्रह्म विचारयेदित्यर्थः ॥

**पृ. सं.–४० श्लो. सं.–२१५**

किं बहुना? चातुर्मास्याधिमासाभ्यामन्यत्र पूर्णिमायामेव वापयेदित्यर्थः । तद्विधानमाह—क्षौरेति ॥

**पृ. सं.–४० श्लो. सं.–२१६**

गुर्वाद्यनुज्ञापूर्वकं स्नानमृद्गोमयपञ्चगव्यवस्त्रादि तीरे संस्थाप्य विशुद्धदेशे संक्षालितकराङ्घ्रिमुखपरम्पराक्षौरसाधनः सुस्नातो वा नापितः कण्ठादुपरि क्षौरं कुर्यात् । यतिस्तु वाग्यतः भूमौ पत्रं निक्षिप्य तत्र वपनकाले पतितानि केशलोमनखानि भूमौ निखनेत् । ततः स्नानात् पूर्वमेव हस्तपादादि संशोधयेच्च ॥

पृ सं.-४० श्लो. सं-२१९

नाभिमात्रजले स्थित्वा शिरोहृद्बाहुद्वयपृष्ठेषु प्रत्यङ्गं पञ्चमृत्तिकापिण्डैः आलिप्यालिप्य द्वादशधा निमज्जेत् । तथा कट्यूरुपादेषु पञ्चावयवेषु च विलिम्पन् स्नायात् । तत उत्तीर्य भस्म धृत्वा षोडश प्राणायामाश्च कार्याः ॥

पृ. सं.-४० श्लो. सं.-२२२

अथ नित्यस्नानविधिः पुरैवोदीरितः । न पुनरिहोच्यते । तथापि अभिज्ञानार्थं किञ्चिदुच्यते । वस्त्राञ्चलेन कमण्डलुं निबद्ध्य दण्डं वामाग्रं हस्तसन्धौ निधाय द्विकरषडङ्गुलिभिः श्रोत्रनेत्रनासापुटान्याच्छाद्य तीर्थं नारायणं तदन्तर्यामितया परमेश्वरं सञ्चिन्त्य मूर्ध्नि स्नायादित्यर्थः । अत्र केचित् प्रत्यहं दण्डधृक् स्नायादिति मन्यन्ते । परे तु वपनाद्यशुद्धिकालेष्वेव दण्डनिमज्जनमिति ॥

पृ. सं.-४१ श्लो. सं.-२२४

प्रणवेति । समतीतकल्पकोटिभिरपि सकलजनैरप्राप्तत्वात् पुनः परशिवदेशिकमनःप्रसादैः कचित् कदा वापि प्राप्यत्वात् प्रकर्षेण नवो भवतीति प्रणवः परमात्मा यद्वा प्रकर्षेण नवत्वस्य हेतुत्वात्तत्प्राप्तौ तत्प्रतीकत्वात्तदालम्बनत्वाच्च प्रणवः शब्दब्रह्म ओङ्कारात्मकः । एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीति, एतदालम्बनं श्रेष्ठमेतदालम्बनं परमिति ॥

पृ सं.-४१ श्लो. सं.-२२५

वाचिकजपविषये मन्त्राणामवश्यमृष्यादीन्विजानन्नेव जप्यात् । तन्मन्त्रोपदेष्टापि तथाविध उपदिशेत् । परथोभयोरधःपतनं ब्रूते श्रुतिः—यो वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वार्च्छति गर्तं वा पद्यत इत्युपक्रम्य तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति । तस्मात्तदृष्यादीन् संग्रहेणात्र वक्ष्यति श्रीसूतमुनिवचनेन ॥

पृ. सं.-४१ श्लो. सं -२२६

इत्युक्तप्रकारेण यथाशक्ति जपेत्। अथवा अगर्भात् गर्भवान् ज्ञेयः प्राणायामश्शताधिक इति वचनात् सगर्भमेवाचरेत् ॥

इति श्री काशीपुरनिवासिना श्रीमच्छङ्कर यतीन्द्र गुरुवरनिदेशभरितेन श्रीभागवतव्याख्याकरणनिपुणेन श्रीकाशीनाथदामोदरमहापण्डितेन श्रीनीलकण्ठयतिना विरचिते यतिधर्मप्रबोधे द्वितीयांशः संपन्नः ॥

## ॥ तृतीयांशः ॥

पृ. सं.-४१ श्लो. सं.-१

श्रीगुरुमिति। ये प्राचीनाः श्रीपतिप्रभृतयः सुराः, ये च सनकादयो नराः, अन्ये च श्रीदक्षिणामूर्तिं गुरुं शिवज्ञानार्थमुपसंपन्नाः। त एव हि संप्रदायविदो गुरवोऽप्यभवन्। श्रीगुरोरपाङ्गपातेन हि गुरुत्वमेतेषाम्। तथाहीश्वरगीता भगवद्गीता शिवगीतासु च श्रूयते। 'यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम्' ॥ इति। तथा चाभियुक्ताः 'श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्द्रनन्द्यादयः प्राचीना गुरवोऽपि यस्य करुणालेशाद्गता गौरवम्' इति ॥

अपि च मार्कण्डेयादिमुनिभिः पृष्टेन कदाचिदर्जुनेन च नियतशिवाराधनप्रवृत्तेन श्रीवासुदेवेन सूच्यते। 'अहमात्मा हि लोकानां सर्वेषां पाण्डुनन्दन। तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहम् ॥ यद्यहं नार्चयेयं वै ईशानं भुवनेश्वरम्। आत्मानं नार्चयेत् कश्चिदिति मे निश्चिता मतिः' इति। पूज्यपूजकभावो नाम प्रभुत्वदासत्वलक्षणम्। शरीराद्यभिमानाभावात् सति

संपूर्णचिदैकत्वे सर्वसाम्ये स्वयमेवावतिष्ठते विपश्चित् कार्षापणवत्। देहाभिमानी तूलतुल्य वरगन् लाघवमेष्यति। पूजक एव पूज्यो भवतीत्यत्र किमियता व्यापारेण? ब्रह्मवित् ब्रह्मैव भवतीत्येवमादिश्रुतिभ्यः। ज्ञातैव हि ज्ञेयवस्तुमात्रेणावशिष्यत इत्यासीत्। तस्मात् नित्यसिद्धैश्वर्यविलासं शिवं तत्प्रसादलब्धैश्वर्यविलासैः मुकुन्दसनकादिकैस्सह ज्ञानार्थमाराधयेत्। तत्पूजनं विशिष्य कदा वा कथं केन प्रकारेण कार्यमित्यत्राह॥

पृ. सं–४२ श्लो. सं–७

विद्यासंप्रदायविदः। ईशानस्सर्वविद्यानां स एवादिगुरुर्बुधाः। तस्य शिष्यो महाविष्णुः सम्यक्ज्ञानमहोदधिः। तस्मादात्तपरिज्ञानो ब्रह्मा सर्वं जगत्पतिः॥ सनत्कुमारो भगवान् ब्रह्मणः श्रुतवेदनः। सनत्कुमारात् सर्वज्ञात् कृष्णद्वैपायनो मुनिः। इत्यादि परंपरया वाऽन्यथा स्वगुरुपर्यन्तं वाऽसकृत् मनसा विभाव्य वक्ष्यमाणक्रमेणाभ्यर्चयेत्॥

पृ. सं.–४२ श्लो. सं–११

आत्मा ऋषिः अव्यक्तगायत्रीच्छन्दः। परमहंसो देवता। हंसस्सूर्यात्मनेऽङ्गुष्ठाभ्यां नमः। हंसस्सोमात्मने तर्जनीभ्यां नमः। हंसो निरञ्जनात्मने मध्यमाभ्यां नमः। हंसो निराभासात्मने अनामिकाभ्यां नमः। हंसो ध्रुवात्मने कनिष्ठिकाभ्यां नमः। हंसः ज्ञानात्मने करतलकरपृष्ठाभ्यां नमः॥

पृ. सं.–४२ श्लो. सं.–१२

अस्य विविधमन्त्रोद्धारप्रकारेषु एकोऽयं क्रम उच्यते। आदौ वेदादिमुच्चार्य स्वराद्यं सविसर्गकम्। पञ्चार्णं तत उद्धृत्य सतारं सविसर्गकम्। अन्ते समुच्चरेत्तारं मनुरेष नवाक्षरः। अथ पूज्यगुरुविन्यासक्रम उच्यते॥

पृ॰ सं-४२- श्लो॰ सं-१३

तत्र तण्डुलास्तरणमध्यमे देशे चतुरंगुलोत्सेधं कृत्वा, अभिज्ञानार्थं नालिकेरनारङ्गजम्बीराद्यन्यतमफलानि विन्यसेत्। मध्ये वितस्तिद्वयमितपीठं चतुर्दिक्षु वितस्तिपरिमितं तद्बहिः सर्वतश्चतुरंगुलविस्तारोत्सेधचतुरश्रपीठाष्टकं विधाय महाचतुरश्रचतुष्कोणेषु आग्नेयादिषु गणपतिदुर्गामहालक्ष्मीभैरवान्यजेत्। तत्रादौ कर्मणामविघ्नेन परिसमाप्त्यर्थं गणेशं पूजयेत्। ततोऽन्तरालस्थमहागुर्वादिपञ्चपञ्चकपूजनान्ते अष्टविधेश्वरान् पूजयेत्। ततो नैर्ऋतादिकोणस्थान् दुर्गामहालक्ष्मीभैरवान् संपूजयेत्। एवञ्च पीठविधिरासीत्॥

अथ मध्यस्थमहागुरुव्यूहमध्ये दक्षिणामूर्तिरुद्रमीशान इति मन्त्रेणावाह्य नीराजनान्तं विधाय तत्पूर्वदक्षिणोत्तरपश्चात्पीठेषु तत्पुरुषाघोरवामदेवसद्योजातमन्त्रैस्तानेवाभ्यर्चयेत्। एवं चेन्महागुरुव्यूहपूजा संपन्ना। अथ महागुरुव्यूहस्य पुरस्तादाचार्यपञ्चके मध्ये शङ्करभगवत्पादं पद्मपादसुरेश्वरतोटकहस्तामलकाचार्यान् पूर्वदक्षिणोत्तरपश्चिमासु दिक्षु यजेत्। महागुरुव्यूहस्य दक्षिणतः गुरुव्यूहे मध्ये गुरुं परमगुरुपरमेष्ठिगुरुपरापरगुरून् ब्रह्मविद्यासंप्रदायकारान् पूर्वोक्तन्यायेन तत्तन्मन्त्रेण यजेत्। महागुरुव्यूहस्योत्तरे व्यासपञ्चकं तत्र मध्ये वेदव्यासं प्राच्यां ऋभुं दक्षिणस्यां दिशि निदाघं उत्तरे दुर्वाससं पश्चात् दत्तात्रेयं यजेत्। महागुरुव्यूहस्य पश्चात् मध्ये सनकं सनन्दनसनातनसनत्कुमारब्रह्मर्षीन् ईशानादिमन्त्रैस्तन्नामयुक्तैः आवाह्य श्रीरुद्रपुरुषसूक्तादिमहामन्त्रैः पूजयेत्॥

प्रकारान्तर उच्यते। प्रथमं पाश्चात्यसनकव्यूहे प्रथमं पश्चात् सद्योजातस्थाने ब्रह्मर्षीन्, उत्तरे सनातनं, दक्षिणे सनत्कुमारं; पूर्वभागे सनन्दनं; मध्ये सनकं यजेत्। एवमेव सर्वं व्यतिरेकेन वाभ्यर्चयेत्। अस्मिन् पक्षे पूर्वं सनकपञ्चकं, द्वितीयं व्यासपञ्चकम्; तृतीयं गुरुपञ्चकम्; चतुर्थं आचार्यपञ्चकं; पञ्चमं महागुरुपञ्चकम् इति आसीत्। अत्र काळीखण्ड-

वचनं प्रमाणं—चातुर्मास्येषु निवसेत् गुरुज्येष्ठादिसंनिधौ। पूजयेत् सनकादींश्च पञ्चवर्गान् गुरूंस्तथेति ॥

पृ. सं–४२ श्लो सं –१४

## संकल्पः

पूजारम्भे प्रणवानुसन्धानगुरुसेवाचातुर्मास्यमौनध्यानादिसकलनियमस्खलनदोषनिवारणद्वारा संभवच्चातुर्मास्यादिनियमनिर्वैकल्यतासिध्यर्थं सपरिवारपञ्चवर्गसहितमहागुरुपूजां करिष्यमाणः पुरा गणनाथपूजां करिष्ये इति संकल्प्य संपूजयेदित्यर्थः। एवं च पञ्चपञ्चसंख्यया महागुरुमुखान् पञ्चविंशतिकान् तद्बहिः अनन्तेशसूक्ष्मेशशिवोत्तम एकनेत्र एकरुद्रत्रिमूर्तिश्रीकण्ठशिखण्ड्यभिधान् अष्टविद्येश्वरानष्टदिक्षु, नैरृते दुर्गां; वायव्ये महालक्ष्मीं, ईशानदिशि भैरवं च यथासंभवं संपूजयेदित्यर्थः ॥

पृ. सं–४३ श्लो. सं–१५

अथ मौनव्याख्यादिपदैः नमस्कुर्यात्। ततो यतिप्रश्नः ॥

पृ. सं–४३ श्लो. सं–१६

आषाढमासपौर्णिमामारभ्य कार्तिकपौर्णिमापर्यन्तं चत्वारो मासाः प्रथमः कल्पः। यद्वा अर्धमासा मासा इति श्रुतेः मासद्वयं वा। किंचिदिति। निवाससौकर्याभावे यथोचितकालपर्यन्तं वासः कार्यः ॥

पृ. सं–४३ श्लो. सं–२१

कौपीनेति। दोरं कटिसूत्रदण्डसूत्रादि। वासांस्यन्तरीयबहिर्वस्त्रादि। भस्मभस्त्री विभूतिसंचिका। आविकं कम्बलभेदः। मृत्तिका शौचोपयोगिनी। घटः पात्रम्। दन्तकाष्ठानि। अन्यद्यदपि यतिधर्मसाधनानि तानि सन्निधाप्य प्रत्यहं भिक्षादिभिर्विचार्य परिचरेयुरित्यर्थः ॥

पृ. सं.-४४ श्लो सं २१

तारेणेति। यतीश्वरप्रणामे प्रणवेन विनमेत्। स हि सकलमन्त्रप्रकृतिकः। तस्मात्तेन आहोस्वित् प्रणवस्य साधारणवाच्यत्वाभावात् पक्षान्तर्या वा शिवादिनामभिर्वा यथाधिकारमुच्चरन्विनमेत्। यतः परहंसस्य शिवेन भूयोलिङ्गसाम्यमस्ति। अतः शिव एव हीत्यर्थः। ननु कथं संन्यासिनः शिवाभिन्नत्वं कथञ्च संन्यासस्य शिवलिङ्गत्वम्। साक्षान्नारायणो यतिरिति श्रवणाद्यतेर्नारायणाभिन्नत्वम्। अष्टाक्षरेण वन्दनम्, नारायणेति प्रत्याशीर्वचनम्, गोपीचन्दनेनोर्ध्वपुण्ड्रधारणम्, साळग्रामपूजनमित्येवमादीनि विष्णुलिङ्गानि हि संन्यासिषु दृश्यन्ते इति चेन्न अप्रयोजकत्वात्। तथा हि — नारायणशब्दः विष्णुपरो वा तद्भक्तपरो वा। नाद्यः विष्णोः पूर्वोक्तानुष्ठानासिद्धेः। न द्वितीयः अष्टाक्षरमन्त्रपूर्वकवन्दननारायणशब्दरूपप्रत्याशीर्वचनयोः विष्णुभक्तस्यापि गृहस्थस्यासिद्धेः। गोपीचन्दनेनोर्ध्वपुण्ड्रधारणं वैष्णवलिङ्गमित्युक्तं चेत्। वैष्णवोत्तमानां रामानुजीयानां तदनङ्गीकारात्। मात्स्यन्यायेनाहिभयन्यायेन च ऊर्ध्वपुण्ड्रस्य दुर्बलत्वे सिद्धे एकस्य विधिनिषेधयोर्विकल्प इति न्यायेन ऊर्ध्वपुण्ड्राभावे प्रत्यवायाभावात् तद्धारणनिमित्तप्रत्यवायापादकानां केषाञ्चिद्वचनानां तत्तन्माहात्म्यपरत्वेऽतत्परतया चक्राङ्कनवदवैदिकत्वं सिद्धम्। अथ विष्णुपूजनस्य वैष्णवलिङ्गत्वे का हानिरिति चेत् — न वैष्णवस्य विष्णुपूजनमेव लिङ्गमिति नियमः, व्यभिचारात्। वैदिकत्वेन विष्णुपूजनस्यावश्यकत्वे घट्टकुटीप्रभातन्यायेन विष्णुपूजनमेव वैष्णवलिङ्गं पर्यवसन्नमिति चेन्न, तस्य निरस्तत्वात्। किञ्च संन्यासस्य शिवचिह्नत्वं न वेति विचारावसरे विष्णुपूजनस्य वैदिकावैदिकत्वविचारस्यासाङ्गत्याच्च। एवञ्च गृहस्थानामेवासिद्धे चोर्ध्वपुण्ड्रानुष्ठाने कैमुतिकन्यायेन तुरीयाश्रमिणां परशिवरूपाणां गोपीमृत्पुण्ड्रधारणमनावश्यकमित्युक्तं भवति। तत्र तावत् प्रमाणवचनानि ॥

ऊर्ध्वपुण्ड्रं त्रिशूलं वा वर्तुलं चतुरश्रकम् । अर्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत् ॥ तिर्यक् त्रिपुण्ड्रं सन्त्यज्य श्रौतं पुण्ड्रान्तरं भ्रमात् । ललाटे धारयन् विप्रः पतत्येव न संशयः ॥ इति । ललाटे भस्मना तिर्यक् त्रिपुण्ड्रस्य च धारणम् । विना पुण्ड्रान्तरं मोहात् धारयन् पतति द्विजः ॥ अश्रौतत्वान्निषिद्धत्वात् त्याज्यं पुण्ड्रान्तरं द्विजैः । इत्यादीनि ब्रह्मानन्द-योगीन्द्ररचितपुरुषार्थप्रबोधे पराशरव्यासप्रणीतानि वचनानि द्रष्टव्यानि ॥

ननु साक्षान्नारायणो यतिरिति वचनेन नारायणस्वरूपत्वं यतेस्सिद्धम् । तस्य गोपीचन्दनादूर्ध्वपुण्ड्रधारणमिति प्रसिद्धेः तत्स्वरूपस्य यतेस्तदेव धार्यमिति चेन्न । महाभारतविष्णुपुराणादिषु तस्योर्ध्वपुण्ड्रधारणस्यानुक्तत्वात् महाभारत-शिवपुराणादिष्वस्य भसितत्रिपुण्ड्रधारणस्य विहितत्वात् । तथाहि हरिवंशे— भास्वत्त्रिपुण्ड्रो भसिताङ्गरागो मौनी जटी वल्कलवान् मुकुन्दः । निरन्तरं चेतसि चन्द्रचूडं विचिन्तयन् पञ्च जजाप वर्णान् ॥ इति । शिवेन विष्णुना वापि ब्रह्मणा सर्वदैवतैः । देवताभिर्धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना ॥ इति । एवं च विष्णोरूर्ध्वपुण्ड्रस्यानियमादपि न यतेर्नारायणस्वरूपत्वम् । प्रणवार्थ-परिज्ञानी वेदान्तश्रवणे रतः । स यतिः स शिवः प्रोक्तो मुक्तो ब्रह्म समश्नुते ॥ इति । साक्षात् परशिवो यतिरित्यादिश्रुतिभिः शिवाभिन्नत्वं यतेः प्रतिपादितम् । यदप्युक्तं साक्षान्नारायणो यतिरिति । तत्रापि नारं ज्ञानं अयनं यस्येत्यादिव्युत्पत्त्या नारायणशब्दस्य ज्ञानाश्रयपरत्वेन शिवस्य ज्ञानाश्रयत्वसंभवेन शिवाभिन्नत्वमिति सिद्धम् । एतेन संन्यासस्य शिव-लिङ्गत्वं न हि वैष्णवत्वम् ॥

ननु लिङ्गशब्दस्य व्यावर्तकलक्षणपरत्वेन संन्यासश्शिवलिङ्गमित्यत्र सः शिवस्य लक्षणं स्यात् । तर्हि सर्वश्रुतिस्मृतिपुराणादिषु श्रूयमाणलक्षणस्य शिवस्य तुरीयाश्रमधर्माणाञ्च भेददर्शनेन कथं संन्यासस्य शिवलक्षणत्वमिति चेन्न, तयोरभिन्नधर्माणां श्रूयमाणत्वात् । तथाहि — वेषमात्रेण संन्यासी

पूज्यः सर्वेश्वरो यथा। इति। गृहस्थानां तथा विष्णुर्यतीनां च महेश्वरः ॥ इति। 'ऊर्ध्वरेतस्सु च शब्दे हि' इति यतेरूर्ध्वरेतस्त्वं सूत्रभाष्यकारैः स्थापितम्। ऊर्ध्वरेतं विरूपाक्षमिति शिवपरत्वे श्रुतिः। किञ्च, तत्त्वोपदेष्टृ-भिक्षुकमदनजेतृ-कपालधर-भस्माङ्गराग-चर्माम्बर-दिगम्बरत्वादिसर्वोत्कृष्टधर्म-बाहुल्य साम्यसद्भावाद्यतिवरः परशिवतुल्य एवेत्यर्थः। अपि च सर्वसाम्ये तूप-मानोपमेयभावानुपपत्तेः तस्माद्वैदिकानां मुमुक्षूणां मुक्तानामीश्वरतद्विभूतीनां च भस्मोद्धूलनत्रिपुण्ड्रधारणमेव स्वभावः। ननु किमनुमानेन प्रमाणेन शब्देन वा प्रत्यक्षानुभवसिद्धेऽर्थे इति चेत्—सत्यं तदपि कालवशादेतदप्रमाणबुद्धिरपि संभवत्येव। तथाहि कलिधर्माः श्रूयन्ते पुराणेषु-यतयोऽपि भविष्यन्ति ह्यन्योन्यं बद्धमत्सराः। भिक्षामात्रेण जीवन्तो वेदान्तश्रवणोज्झिताः ॥ गोपीचन्दन-लिप्ताङ्गा धनधान्यादिसंग्रहाः। कलौ नाम परावृत्त्या भवन्त्येव तदा मुने ॥ विरळा भस्म पुण्ड्राङ्गास्तथा लिङ्गार्चकाः कलौ ॥ इति किं दैवोपहतस्य बहुप्रलापेन? अलं। सर्वथा परहंसस्य शिवेन लिङ्गसाम्यमस्त्येवेत्यर्थः ॥

पृ. सं.-४४ श्लो. सं. २४

गुरुपूजादिन एव यो यतेः सशिष्यवर्गस्य भिक्षां कारयति स महाभागी आयुरारोग्यपुत्रकलत्रधनधान्यपशुक्षेत्रादिसंपन्नो भवति। यो वादरेण द्वितीयदिने पूजयति स सत्सुतान्, तृतीयेऽर्थकामी चाभीष्टं लभत इत्यर्थः ॥

अथ प्रायश्चित्तमुच्यते—सर्वापेक्षा च यज्ञादिश्रुतेरित्यधिकरणे तत्तदाश्रम-धर्माणामवश्यानुष्ठेयत्वेन तत्प्रच्युतेः प्रायश्चित्तव्यपाश्रयणेन प्रकृतिधर्माप्यत्वे च निषिद्धस्याप्रसक्तौ सत्यां नित्याकरणनिमित्तपरिहारोऽवश्यमनुष्ठेयः। अन्यथा आरूढस्य यतेरसर्वातिशायिनः प्रायश्चित्ताकरणे बहिष्कार्यः। बहिस्तूभयथापि स्मृतेराचाराच्चेति वैयासिकं सूत्रम्। यतेरितरवत् पापसंसर्गाप्रसक्तेः जन्मान्त-रार्जितावस्य समस्तस्य संन्यासमात्रेण निर्मूलितत्वात् प्रायशोऽन्नभक्षणनिमित्त-मेवेति तद्दोषशान्तिर्वक्तव्येत्यभिप्रेत्याह — अन्नमिति ॥

**पृ. सं-४४ श्लो. सं २५**

इति गृहस्थानां शिवधर्मोक्तेन प्रायश्चित्तविधानादेतच्चतुर्गुणं संन्यासिना-मज्ञानकृताघस्य प्रायश्चित्तं भवति ॥

**पृ. सं.-४५ श्लो. सं.-३२**

ज्ञानेति। सकलाघानां प्रायश्चित्तं साम्बमूर्तिध्यानादेव। अन्नपूर्णोप-निषदि — आत्मानं सच्चिदानन्दमनन्तं ब्रह्म सुव्रत। अहमस्मीत्यभिध्यायेत् ध्येयातीतं विमुक्तये ॥ इति। पैङ्गलश्रुतौ—हृदयं निर्मलं कृत्वा चिन्तयित्वाऽप्य-नामयम्। अहमेव सदा सर्वमिति पश्येत् परं सुखम्। ततः पवित्रं परमेश्वराख्यमद्वैतरूपं विमलांबराभम्। यथोदके तोयमनुप्रविष्टं तथात्मरूपो निरुपाधिसंस्थितः ॥ तपेद्वर्षसहस्राणि एकपादस्थितो नरः। एतस्य ध्यान-योगस्य कलां नार्हन्ति षोडशीम् ॥ इति सर्वपापमोचनद्वारा मोक्षोपि लभ्यत इति। किंचास्मिन् साधक एव तीर्थान्यखिलानि सन्तीत्याह दर्शनोप-निषद्वचनेन पिङ्गलेत्यादिना ॥

**पृ सं-४५ श्लो. सं.-३३**

इत्यादिश्रुतिभिः स्वात्मनि शिवचिन्तनेनैव सर्वपापक्षयो मोक्षश्च भवति। अथवा, अथास्य या सहजास्ति विद्या मूलप्रकृतिर्माया लोहितशुक्ल-कृष्णा तया युतो देवः कृष्णपिङ्गलो महेश्वरं ईट्टे। तदिदमस्य सकलनिष्कल-रूपम्। एवं यस्सततं ध्यायेत् देवदेवं सनातनम्। स मुक्तस्सर्वपापेभ्यो निःश्रेयसमवाप्नुयात् ॥ इति श्रुत्या साम्बमूर्त्याख्यं सकलनिष्कलं ब्रह्मैव ध्यातुर्मुमुक्षोरुत्तारणार्थं स्वेच्छयादृतलीलाविग्रहं ध्येयं भूत्वा साक्षात्करोति, न निरुपाधिकमित्येतत् पुरैवोक्तम्। अत एवाह पराशरः —

**पृ. सं.-४७ श्लो. सं.-५४**

नामजपतो निष्कृतिमाह — अपि वा पतितश्चण्डालो यः शिवेति

वाचं वदेत् तेन सह भुञ्जीत, तेन सह संभाषेत, तेन सह संवसेतेति। पाद्मे — आश्चर्ये वा भये शोके क्षुते वा मम नाम यः। व्याजेनापि स्मरेद्यस्तु स याति परमां गतिम्॥ अन्यानि यानि कर्माणि करोतु न करोतु वा। शिवनाम जपेद्यस्तु मुच्यते सर्वपातकैः॥ अव्यक्तं परमं ब्रह्म शिव इत्यक्षरद्वयम्। नैतस्मादपरं किञ्चित्तारकं ब्रह्म सर्वथा॥ प्रमादेनापि यैर्नोक्तं शिव इत्यक्षरद्वयम्। शोचन्ति ते परं दीना दुर्भगास्तु दिने दिने॥ इति। जप्येनैव तु संसिध्येत् ब्राह्मणो नात्र संशयः। कुर्यादन्यन्नवा कुर्यात् मैत्रो ब्राह्मण उच्यते॥ इति स्मृतिः। अपि च — शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नस्सर्वमिज्जगदयक्ष्मं सुमना असत्॥ इति। स्तुहि श्रुतं गर्तसदं युवानमिति। कद्रु प्रचेतसे, मद्दे वचो देवा यशस्यते तद्विष्यस्य वर्धनमिति। कथ्यं कविं कल्पकमरूपं तुष्टुवांसोऽमृतत्वं भजन्ते इत्यादिश्रुतिभिः नामकीर्तनादेव सकलदुरितक्षयद्वाराऽमृतावाप्तिः श्रूयते। अथापि कलुषाणामीदृक् प्रायश्चित्ते प्रत्ययाभावात् क्रियारूपामपि निष्कृतिमाह —

**पृ. सं-४७ श्लो. सं ५५**

भिक्षेति। इति स्नानपञ्चकेषु मानसाग्नेययोरेव प्राधान्यात् ताभ्यामन्यतरेण स्नानेन, पञ्चाक्षरी प्रणवशिवनामभिर्वा निष्कृतिर्भवत्येवेत्यर्थः। श्रद्धाभक्तिविश्वासयुक्तमन्यदपि तथैव भवतीत्याह॥

**पृ. सं.-४८ श्लो. सं.-७०**

प्रायश्चित्तेष्वित्यादिना। सर्वकर्मसु चित्तशुद्धिरेव हि पूर्णफलदम्। अतः चित्तस्य प्रायः प्रसादतः गुरुभक्तिशिवभक्ती। तयोर्ध्यानं तन्नामजपः तद्व्रतं सोमवारशिवरात्र्यादिदिनेषु उपवासपूजनादिनियमः। समन्त्रकं सर्वकर्मसु भस्मधारणं वा। तदङ्गरुद्राक्षधारणं च प्रायश्चित्तं भवेदित्यर्थः॥ वासिष्ठलैङ्गे —

**पृ. सं-५१ श्लो. सं-१००**

लोके तावत् अयथाज्ञानमूलं हि सर्वदुःखं सांसारिकं नाम भवत्।

तथा च दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गं इति गौतममहर्षिप्रणीतं न्यायसूत्रम्। (१-१-२) तस्मात् संन्यासमात्रेण प्राग्भववशात सञ्चितावक्षयात् दुस्सङ्गानवकाशतथा विविक्तसेविनः, माधूकरान्न-सेवनपरिणतचित्तनैर्मल्यादन्तर्लिंग्याराधन प्रणवानुसन्धान महाभाग्यधोरण्या शश्वद्दिस्थूलदेहादिवासनस्य यतेः किं पुण्यं किं पापमिति न तपति किमहं साधु नाकरवम् किमहं पापमकरवमिति। तप्यतापकरूपेण विभातमखिलं जगत्। अहं विश्वं भुवनमभ्यभवामिति हि योगिनाम् स्थितिः। श्रूयते हि महोपनिषदि श्रीमहादेवोपदेशसूक्तिः॥

जाबालोपनिषदि किं नित्यं ब्राह्मणानां कर्म कर्तव्यं यदकरणे प्रत्यवैतीत्यादिप्रश्नानन्तरं गृहस्थविधिप्रतिषेधानुक्त्वा, यतिः प्रमादात् भस्म-धारणमेकदाऽकृत्वा ह्युपोष्य द्वादशसहस्रप्रणवान् जपित्वा शुद्धो भवति। अन्यथा यतीन् सालावृकेभ्यः इन्द्रः प्रायच्छदिति। विहिताकरणनिमित्तश्चेत् पारलौकिकं दुःखमस्ति। किमुत प्रतिषिद्धाचारे? तस्मात् कथञ्चित् स्वशक्त्या निमित्तगौरवानुरोधेन निष्कृतिं कुर्यात्॥

**पृ. सं.-५२ श्लो. सं.-१०६**

मुमूर्षुर्यतिः प्राणोत्क्रमणसमये संनिहितेनुमानान्निमित्तैर्वा तदानीं प्रागेव पुत्रादिषु स्थूलेषु संसारेषु परित्यक्तेष्वपि सन्निहितशास्त्रव्याख्यानशिष्यादि-सङ्गं मनस्थं ब्रह्मादिलोकविभूत्यतिशय विभ्रमश्चान्यत् सर्वं सन्त्यज्य हृदयादि-समभिव्यक्तियोग्यावकाशरूपाधारेषु यत्नेनापि शिवमेकमेव सदा ध्यायेत्। तेन ध्यानेन भ्रमरकीटवत् ध्येयः परशिव एव भवतीत्यर्थः। तथा श्रूयते — ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैः। न कारणं कारणानां ध्याता कारणन्तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शम्भुराकाशमध्ये ध्रुवं स्तब्ध्वाधिकं क्षणमेकं क्रतुशतस्यापि चतुस्सप्तत्या यत् फलन्तदवाप्नोति कृत्स्नमोङ्कारगतिश्च सर्वध्यानयोगज्ञानानां यत्फलमोङ्कारो वेद पर ईशो वा शिव

एको ध्येयश्शिवंकरस्सर्वमन्यत् परित्यज्येति तस्मात् सदाशिवध्यानं कार्यमेवेति स्थितम् ॥

श्री शिवमस्तु ॥

ननु भ्रमरकीटन्यायेन शिवं ध्यायन् शिव एव भवितुमाशास्ति तथापि तन्मृतिकालध्यानस्यैव तदाकारप्राप्तिरन्यत्त पापक्षयकरमिति प्रसिद्ध्या तत्-कालं कथं जानामि केनोपायेन विस्पष्टं जानीयामित्यत्राह—आदित्येत्यादिना पुराणाभिप्रायेण ॥

पृ सं.-५२ श्लो. सं.-१०७

दिवा नक्तं परिदृश्यमानरवीन्दुमण्डलयोर्मध्ये रन्ध्रं आकाशे धूमकेतु-सदृशां रक्तमालाम् । अथ स्वप्ने श्मशानं केशान् भस्म अस्थीनि सजलां नदीं शुष्कां भुजङ्गांश्च यः पश्यति तस्य मृत्युरसन्निहित एवासीदित्यर्थः ॥

पृ. सं -५२ श्लो. सं -१०९

जागरे स्वप्ने वा विण्मूत्रादि यो वमति, स दशमासवयस्को भवति इति ॥

पृ. सं.-५२ श्लो. सं.-११०

यस्तु भूतप्रेतपिशाचादीन् गन्धर्वनगराणि च । तरून् रक्तवर्णांश्च पश्यति नवमासपर्यन्तं जीवति न वा । अकस्मात् वातगुल्मादिहेतून्विना स्ववपुषि स्थूलत्वादिवैपरीत्यधर्मे संजाते अष्टमासादर्वागेव तस्य मृतिः भवेत्यर्थः ॥

पृ. सं -५२ श्लो. सं -१११

स्वप्ने पांसुगर्ते पंकिलगर्ते गह्वरे तरुकोटरे भूविवरादौ स्वस्मिन् पतिते सति प्रपदस्य प्राग्भागे पश्चाद्भागे खण्डिते सप्तमासजीवितः । यस्य पुनः शिरसि क्रव्यादकपोतगृध्रकाकादिरास्थितः स षण्मासजीवन इति ॥

**पृ. सं-५३ श्लो सं.-११६**

जिह्वेति-मुमूर्षोर्जिह्वायां जलाभावात् शुष्कभग्निकेव कृष्णवर्णा च भवेत्, तथा हृदयमपि प्रतिश्वासं भयकम्पादिजनयित्र्या मृत्युबाधाया विलासायतनत्वात् कृच्छ्रोपचारेणापि न हृष्यति परन्तु नितरां शुष्यति तस्य मृत्युस्सन्निहित इत्यर्थः। यस्य कृष्णाम्बराभिः कृष्णाभिः स्त्रीभिः दक्षिणां दिशमनुद्रुत इति स्वप्नः, यस्य शुक्लमपि वस्त्रं स्वप्ने कृष्णं भासते, सवस्त्रमप्यात्मानं विवस्त्रं पश्यति, नीलवस्त्रधरं वा, दिवा नक्षत्रराशिमाकाशे रात्रौ महेन्द्रधनुश्च, चन्द्रं कृष्णं भानुं रक्तवर्णं च यः पश्यति स मृत्युग्रस्त इत्यर्थः॥

**पृष्ठ. सं-५४ श्लो सं.-१२६**

ततो यतिवरे प्रारब्धपतनानन्तरं पूर्णताङ्गते तं प्रति परैः किं कार्यमिति संशयः। कुतः? गोत्राद्युत्थितस्य जलं जलेनेव परब्रह्मणैकीभूतस्य यतेः पार्थक्याभावात् ज्ञानाग्निदग्धदेहस्य नैव श्राद्धं न च क्रियेति श्रुतेश्च क्रियानिवृत्तिरेव प्रतीयते। अथवा पितृपुत्रयोस्संबन्धस्यानादिसिद्धस्यानपोदितत्वात्॥

**पृ. सं-५४ श्लो. सं.-१२७**

पार्वणस्यास्तित्वं च प्रतीयते। तर्हि खननादेरपि कर्मणः परोक्षाः श्रुतयोऽनुमीयन्ते। तेषां हैकैकस्मात् मुष्टिनाददं इति वेदगिरिभ्यो मुष्टिमात्रग्रहणश्रवणात् सर्वश्रुतिविज्ञाने कः समर्थोऽस्ति अतश्च मूलमस्तीति चेन्न। आरुणिकपरमहंसपरिव्राजक जाबालमैत्रेयतुरीयातीतसंन्यासभिक्षुकुण्डिकारहस्याध्यात्मपाशुपतपरब्रह्मशुकरहस्याद्युपनिषत्सु प्रत्यक्षाद्युसंन्यासेन देहत्यागं करोति स परमहंसो नामेत्युपनिषदिति समाप्तिश्रवणात्, केवलं पैंगलोपनिषदि तीर्थे श्वपचगेहे वा तनुं विहाय याति कैवल्यं प्राणानवकीर्य याति कैवल्यं तं पश्चात् दिग्बलिं कुर्यादथवा खननं चरेत्॥

पृ. सं.-५५ श्लो. सं-१३३

प्रत्यक्षश्रुतिविरोधात् वेदो धर्ममूलमिति श्रीगौतमसूक्त्या प्रत्यक्षवेद-विरुद्धान्यवचनानामप्रामाण्यं स्यात् ॥

वचनैः साक्षाच्छ्रुत्यर्थसंकोचाय न प्रभवन्ति स्मृतयः। ता अपि न परस्परं समवेदाः प्रादुर्भवन्ति। तथाहि — श्राद्धाधिकारसिद्ध्यर्थं पार्वणं तु सुतश्चरेदिति। मनुस्तु — वृथासंकरजातीनां प्रव्रज्यासु च तिष्ठताम्। आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रिया ॥ नाशौचं नाश्रुमोक्षं च न दाहाद्यन्त्यकर्म च। इति स्मृतीनां विप्रतिपत्तौ चावश्यकर्तव्येऽन्यतर-परिग्रहेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणमनपेक्ष्या ह्यन्याः। प्रमाणलक्षणे — विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानमिति ॥

पृ. सं.-५५ श्लो. सं.-१३७

एवमादिवचनैश्च खननतर्पणे श्रौते चानुष्ठाय पितामहादीनुद्दिश्य श्राद्धं कुर्यात। यद्वा श्रुतिस्मृत्योस्सामञ्जस्येन प्रवृत्तस्य कालिकाखण्डस्य वचनानु-सारेण दैवपार्वणविधानेन वा कार्यम्। इत एव श्राद्धाधिकृतिर्भवति इत्यर्थः ॥ Note

पृ. सं.-५५ श्लो. सं.-१३९

एवं पुत्रशिष्याद्यैः भक्त्या केवलं श्राद्धादौ कर्तव्ये सति क्रियमाणं सर्वं तत् संन्यासविधिना कालीखण्डादिशास्त्रोक्तविधिना कुर्यात्। तत्र कथमुक्त-मित्यत आह ॥

पृ. सं-५५ श्लो. सं.-१४०

दुर्वाससेति। तत्र कालीखण्डे—दधीचो गौतमोगस्त्यो दुर्वासाश्च यथा क्रमम्। इति चतुर्थाश्रमधर्मनिर्णायकत्वेन दुर्वाससो वचनश्रवणात् तदाश्रमधर्मप्रवर्तकत्वात्। देहान्तेपि च संस्कारं तेषां वक्ष्ये यतीश्वराः। माहेश्वरबलिं चैव शैवश्राद्धस्य विस्तरम् ॥ खननादिद्वादशाहविधिः

प्रोक्तशिवेन हि इति तदुक्तविधिना यद्वान्यशास्त्रेण यतिं संस्कुर्यात् । न हि कश्चित् विधिमनाश्रित्याजासन्ततिन्यायेन केवलपूर्विकानुसरणेन नाविच्छिन्नमासेतिहासवच्छिरःकम्पेन अन्धबाललम्बवदपरिक्षेताश्रयेणेन वा कार्यम् । तस्मादन्यत्रैवं लिङ्गसाकल्याभावात् कालीखण्डानुसारेण तत्संस्कारं वक्ष्य इत्यर्थः ॥

पृ. सं.-५६ श्लो. सं.-१४१

अविमुक्तेति—श्रीकाश्यादिपुण्यक्षेत्रेषु अन्यत्र यत्र कुत्रचित् चण्डालवीथिकादौ वा तीर्थे श्वपचगेहे वा यदि वा नष्टचेतनः इति । श्रुत्यारूढस्य मुमूर्षोर्नास्ति पुण्यस्थलाकांक्षा हि । तस्मात् कुत्रचिन्मृतं यतिं पुत्रादिसंबन्धश्चेत् यत्नपूर्वं स्नानानुवादि कार्यम् । अन्यश्शिष्यश्चेद्वपनं विना सर्वं साधारणं । यतिशरीरमलंकृत्य योगपट्टेन चाबध्य श्रीरुद्राथर्वशीर्षादिमन्त्रेण पाद्यासनादिभिराराधयेत् ॥

पृ. सं.-५६ श्लो. सं.-१४५

शिवेऽस्तवः ऐहिकामुष्मिकसकलमङ्गलेप्सवः नमोन्तशिवमन्त्रेण शिवाय नम इति वान्येन नारायणनाम्ना वा । न ह्युपनिषदुक्तप्रकारमन्त्रारम्भेत्यर्थः । यतिं नमस्कुर्युः यतस्संन्यासाश्रमः शिवेन लिङ्गसाम्यं द्योतयत्यतस्तस्य यतेः पूजनं शिवपूजनं भवति । तस्मात्तद्गुरुद्वहतां पश्यतां स्पृशतामपि पापनिवृत्तिरिति स्कान्दे—भिक्षुः प्राणविहीनश्च दृष्टश्चेत् प्राणिभिस्सकृत् । तेषामप्यवहानिः स्यात् आयुर्वृद्धिश्च जायते ॥ इति ।

पृ. सं.-५६ श्लो. सं.-१४६

यः कश्चित् कर्ता योगपट्टेन बद्धं यतिशरीरं प्रणवेन श्वभ्रे निधाय वामभागे दण्डं त्रिधा विच्छिद्य दक्षिणे च घटं निधाय, प्रजापते ... पतयो रयीणामिति तद्धृदयं स्पृष्ट्वाभिमन्त्र्य, ब्रह्मज्ञानं + असतश्च विव इति ऋतं

सत्यमिति च भ्रूमध्यम् मानोमहान्तमित्यादिचतुर्भिः अग्निर्मूर्धानमिति च मस्तकं स्पृष्ट्वा समुच्चरन् लवणादिभिराभ्रूदेशमापूर्य निश्चलं तच्छिरः कृत्वा, उचितेन दशमरन्ध्रभेदार्थकेन वैदिकेन वचनेन तादृशेन लौकिकेन शस्त्रेण नालिकेरेण यतिशिरो भिन्द्यात् । ननु स्वदेशिकस्यैव शरीरबाधनं भवेदनन्तस्य शिवस्य बाधनमिति शिवगुरुमूर्त्योरभेदबुद्ध्या पूज्यत्वे कथमिदं कार्यं इति चेत् तं पश्चाद्दिग्बलिं कुर्यात् अथवा खननं चरेदिति बलिक्रियाया एव श्रेष्ठत्वावगमात् तद्दर्शनास्वादनादिभिः सर्वप्राणिकुशलाय बलिरेव कार्यः । अथवेति तादृग्धैर्याभावे खननं वाचरेदित्युपकल्पः । तत्र शिरोभेदने प्रणव एवोपयुज्यते तथापि तत्पूर्वम् शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति वाक्यं मनसा स्मरन् भिन्द्यात् । एवं गतिजुषो न पुनरावृत्तिरिति सावित्र्युपनिषदाह ॥

पृ. सं.-५७ श्लो. सं.-१५२

तस्मात् शिरोभेदनं सुषुम्नामार्गेणोर्ध्वं गत्वा स्वयमेव कुर्यात् । स्वात्मैकवेद्ये ब्रह्मरन्ध्रभेदे परेषां तत्कृताकृतं विचिकित्सानिर्धारणाशक्यत्वात् । कर्त्रा प्रणवेन शिरोभेदः कार्य इति शास्त्राभिप्रायः ॥

पृ. सं.-५७ श्लो. सं.-१५५

रन्ध्र इति - भिन्नशिरस्थाने-यो देवानां प्रथमं ... स महेश्वर इति खननगर्ते समापूर्य शिर आरभ्याभिज्ञानदण्डमेकं प्रतिष्ठाप्य उत्तरदिग् गोमुखीसंयुतां वेदिं कुर्यात् । अत्र केचित् भूमिर्भूम्निमगान्माता मातरमप्यगात् भूयास्म पशुभिः पुत्रैर्यो नो द्वेष्टि स भिद्यतामिति प्रयोगं पठन्ति । तत्प्रसक्तक्रियाप्रातिकूल्यदर्शनान्नैवमित्थमेव पद्धतिरन्यैरादीयते । सर्वोत्कर्षीकृतत्वात् प्रणवस्यात्र श्रुतितरणभाव भिन्नानस्येह किञ्चित् प्रयोजनमस्ति ॥

पृ. सं.-५७ श्लो. सं.-१५७

सद्य इति। वेदीकरणानन्तरमेव अभिज्ञानदण्डाग्रे मृन्मयं शिलामयं वान्यतमं प्रतिष्ठाप्य वितानतोरणरङ्गवल्याद्यलङ्करणैरलंकृत्य संपूज्य पञ्चरुद्रमन्त्रैः स्तुत्वा प्रहतनालिकेरकर्णं किञ्चिदाप्रायान्येभ्यश्च दापयन् अवभृथबुद्ध्या केवलं नाशौचधिया स्नात्वा शोकमोहादि विहाय प्रसन्नहृदयो भवेत्। सुतः शिष्योन्यो वास्तु प्रत्यहं तर्पणमवश्यकरणीयमेव। अतः यतिः ब्रह्मचारी वास्तु तस्मिन् ग्राम एव माधूकरान्नाशी तर्पयेत् ॥

पृ. सं.-५८ श्लो. सं.-१६२

तस्मादेतत् तर्पणत्रितयं सर्वैरपि कर्तृभिरवश्यमनुष्ठेयम्। तदपि प्रातरेवादशाहं लिङ्गस्य पुरस्तात् कार्यम्। केचित् चतुर्दिक्षु कुर्वन्ति अमुनैव। अपरे अन्यदन्यदामनन्ति तत्प्रमाणं परमन्वेषणीयम् ऐच्छिकस्यानवस्थापत्तेरलमित्यर्थः ॥

पृ. सं.-५८ श्लो. सं.-१६५

एवं विधिना यतिसंस्कारे प्रसक्ते सति स देशः पावनः राष्ट्राभिवृद्धिः। राजा विजयी भवति। किमुत कर्तुर्वैशिष्ट्यकथने? तस्मादाढ्यो नरपतिर्वा खननवेद्यां मण्डपादि विधाय पूजां कारयेत्। तथा च दुर्वासाः— तस्माद्राष्ट्रस्य देशस्य कुर्यादेवं विवृद्धये। शिवालयं प्रबध्नीयात् लिङ्गं तत्र प्रतिष्ठितम् ॥ इति। अशक्तस्तु वेद्युपरि अश्वत्थबिल्वादिपुण्यवृक्षं प्रतिष्ठाप्य तत्फलं लभत इत्याह सूतः— अश्वत्थस्थापनं कुर्यात्सदेशेऽध्वर्युणा मुने। अश्वत्थे स्थापिते तत्र स्थापितो हि महेश्वरः ॥ इति।

पृ. सं.-५८ श्लो. सं.-१६६

एवमेव क्षत्रियादेरपि संन्यासिनः संस्कारः कार्यः। कर्तुरयं नास्ति अक्षय्यपुण्यफलमेव श्रुत्यादिप्रमाणसिद्धं। ततः पश्चात् एकादशे अहनि वा दशमेऽहनि तर्पणपूजावसाने वा गुरोर्महापूजा प्रभूतोपहारैः कार्या ॥

पृ. सं.-५८ श्लो. सं.-१६८

पुत्र एकादशाहमध्ये देशान्तरप्रसक्तां गुरोर्मृतिं श्रुत्वा वपनस्नानपूर्वकं गतदिनतर्पणं प्रसंख्याय कुर्यात्। नान्यत् ॥

पृ. सं.-५८ श्लो सं.-१६९

द्वादशाहप्रभृतिदिनेषु श्रुत्वा सुतः क्षौराद्यनुष्ठाय परेद्युरागामिमासे मृतितिथौ पार्वणं चरेदित्यर्थः ॥

पृ. सं.-५९ श्लो. सं.-१७१

ब्रह्मेति। ब्रह्मीभूतस्य यतेः समाराधनक्रियारूपदीक्षायां यः प्रवृत्ते तस्य कर्तुस्तदानीं जनन्यादिमरणसंबद्धाप्यशुचिस्तात्कालिकी तत्संस्कारकालमात्रवर्तिनी ॥

पृ. सं.-६० श्लो. सं.-१७८

अयमस्मिन् विशेषः — यन्मातृकर्मावसाने स्नानरूपा शुद्धिः। अथ मात्राशौचान्ते आद्यश्राद्धं कार्यम्। यतः पार्वणश्राद्धान्ते मातृसपिण्डनम्। ततो बलिकर्मादीति विविच्यते स्मर्तृभिः। तत्र सम्यगिममर्थं विचार्य कुर्यादित्यर्थः ॥

पृ. सं -६० श्लो. सं.-१८०

एवं वचनानामयमर्थः—पुत्रस्यैव मुख्यकर्तृत्वे सति कनिष्ठाद्यन्यकर्तृभिः खननादौ कृते च तत आगतः पुत्रो वपनस्नानानुज्ञापूर्वं अतीतदिनतर्पणं कृत्वा तद्दादिवस एव कर्तुं शक्नोति। वपने विशेषः स्मर्यते —

पृ. सं.-६० श्लो. सं -१८०

आशौचमध्येऽप्यापन्नस्य वैराग्योदये सति संन्यस्तुमधिकारोऽस्तीत्याह मनुः —

पृ. सं.-९० श्लो. सं.-१८२

मूलमन्त्रं ओं भूः सन्यस्तं मयेत्यादि प्रैषमन्त्र इत्यर्थः ॥

पृ. सं.-९१ श्लो सं.-१९१

अनेन बहुवचनबलेन तर्पणस्य मन्त्रत्रयमुदाहृतमासीत् ॥

पृ. सं.-९१ श्लो. सं.-१९२

देशान्तरगतः पुत्रः देशान्तरमृतं वा यतिं श्रुत्वा वपनादि दशदिन-कर्म कुर्वन् एकादशदिने दैवं पार्वणश्राद्धं पुत्रः पैतृकवत् श्रद्धयैव कुर्यात् । न हि बन्धुभोजनवदित्यर्थः । अथ केनापि हेतुना मृततिथ्यज्ञानेगतिमाह —

पृ. सं.-९१ श्लो. सं.-१९४

यद्यपि यतेर्दुर्मृतिर्नास्त्येव। कथमिति चेत् । नाभिनन्देत मरणं नाभि-नन्देत जीवितं । कालमेव प्रतीक्षेत निर्देशं भृतको यथेति । वल्मीकमूले वृक्षमूले तरुकोटरे वा शून्यागारे शयीत इति । तीर्थे श्वपचगेहे वेति च श्रुतिभिः परहंसस्याहिनिर्मोक इव देहत्यागे दुःखाभावात् तद्देहत्यागः कश्चिद्विधोऽपि न दृश्यते । तथापि कर्तुस्सत्वशुद्ध्यर्थमेव कालप्रतीक्षणमिति मन्यन्ते केचित् । यद्वथा श्रुतयो विरुद्ध्येरन् । तस्मात् पुत्रः दुर्मृतौ सत्यां दशाहकर्म समाप्य पश्चान्मार्गशीर्षशुक्लद्वादश्यां तिथौ पार्वणं ततः बलिं ततश्च वत्सरान्ते तद्दिने पार्वणपूजने कार्ये ॥

पृ. सं.-९२ श्लो. सं-२०६

उदकमित्यस्य पितृहस्तेन तिलोदकदानविषयं । तथा श्राद्धशब्दस्य पैतृकस्यैव निषेधः न च दैविकस्येत्यर्थः । स्मृतिसंग्रहे मातुराशौचान्तःपाति-यतिसंस्कृतिविषये —

पृ. सं.-९२ श्लो सं-२०८

श्राद्धस्येतावता पिष्टपेषणन्यायेन समुदाहृतवचनानां कोऽर्थस्समुत्प-

स्यते ? को वा गहनं कर्म करिष्यतीति चिन्ता मास्तु, वचनानां अधिकारि- वैचित्र्यमालोच्य प्रवर्तितत्वात् । स्वाधिकारमवलोक्य यथादेशं यथाचारं यथावस्थं चालोक्य श्रौताविरोधिधर्मानाचरेत् । श्रुतिश्च—

पृ. ९२ सं- श्लो. सं-२११

अस्याः श्रुतेरयमर्थः — अथैवं नित्यनैमित्तिककर्मप्रक्रियस्य श्रौतस्मार्त- कर्मसु वृत्ते चाचारे यदि ते संशयोऽस्ति तर्हि तस्मिन् देशे काले वा ब्राह्मणाः कर्मादौ प्रयुक्ता इति व्यवहितसंबन्धः । संमर्शिनः विचारक्षमाः युक्ता अभियुक्ताः । कर्मणि वृत्ते चायुक्ताः अलूक्षा अक्रूरमतयः धर्मकामा अदृष्टार्थिनः न हि विषयकामा इत्यर्थः । यथा कर्मणि वान्यत्र वर्तेरन् तथा वर्तेथा इत्यर्थः । एवंगुणानामाचारमाचरेदित्युपदेशः । तस्मात् दशाहान्तं क्षीरेण जलेन वा आत्मानं तर्पयामि अन्तरात्मानं तर्पयामि परमात्मानं तर्पयामीति सद्यो लिङ्गसन्निधौ तर्पयेत् । पूजावसाने प्रत्यहमेकं वा ब्रह्मविदं पायसेन भोजयेत् । अथवा ब्रह्मविदे दद्यात् । नावैदिकाय इत्याह—

पृ. सं-९२- श्लो. सं-२१२

पायसमिति — महागुरोः भूयश्चान्ते विश्वमायानिवृत्तिरिति मायाया- स्सकलभेदनिवृत्तिरूपविदेहकैवल्यदशां प्राप्तस्य परहंसस्य निवेदितं पायसं शिवज्ञानिन एव निर्माल्यमिव दिशेत्, नान्यस्मै । स्मर्यते — अशुद्धात्म- अशुचिर्लोभान्निर्माल्यं पावनं परम् । भक्षयन् नाशमाप्नोति शूद्रो ह्यध्ययनादिव ॥ इतिवत् केवलं ब्राह्मणमात्राय न देयमित्यर्थः । साक्षात् ब्रह्मविदे हि देयं तदभावे जलाग्न्यादिषु विसृजेत् । न कदापि शापपापबद्धयः । तथाहि पुराणम् —

पृ. सं-९२ श्लो. सं-२१३

एकादशदिने द्वादशदिवसे वा माहेश्वरबलिं कुर्यात् । ननु नारायण-

बलिर्हि तत्र तत्र क्रियते, श्रीबोधायनाचार्यैः कल्पसूत्रग्रथितश्च, न हि माहेश्वरबलिरिति चेन्नैष दोषः। यमः—एकादशेऽह्नि कर्तव्यो माहेश्वरबलिस्ततः। पाकान्तरेण तत्रैव पार्वणश्राद्धमाचरेत् ॥ इति। श्रीबोधायनः—अह्न्येकादशे प्राप्ते पार्वणं तु विधीयते। माहेश्वरबलिश्चास्य कर्तव्यो द्वादशेऽहनि ॥ इति। दुर्वासाश्च—देहान्तेऽपि च संस्कारं तेषां वक्ष्ये यतीश्वराः। माहेश्वरबलिं चैव शैवश्राद्धस्य विस्तरम् ॥ इति।

**पृ. सं.-६४ श्लो. सं.-२१६**

विकल्पेन स्मरणादुभयविधस्य बलेरप्यवकाशः। किं च सूत्रपठितनारायणबलेरन्यार्थकत्वेन यतिसंस्कारोपयोगितयाऽनारम्भणत्वेपि क्वचिदुदीरितत्वात् तद्ग्राह्यमिति चेत्। तर्हि माहेश्वरबलेरपि दुर्वासोमुनिना परमेश्वरेण महर्षिणा च विषयव्यवस्थया पठितत्वात्। माहेश्वरबलिस्वरूपमाह—

**पृ. सं-६४ श्लो. सं-२१७**

स्नात्वेति। कर्ता मध्याह्ने भस्मरुद्राक्षभूषितः तादृशान् भस्मरुद्राक्षधारिणः ब्राह्मणान् भवाद्यर्थे अष्टौ चतुरो वा भवशिववामदेवज्येष्ठमहादेवभर्गशङ्करशर्वात्मनामभिश्चतुर्थ्यन्तैरभ्यर्चयेत् ॥

**पृ. सं-६४ श्लो. सं-२१८**

स्वसूत्रोक्तविधिनाग्निमुखान्तं कृत्वा पूर्वोक्ताष्टनामभिः चरुणाज्येन च हुत्वा ब्राह्मणानुज्ञापूर्वं शतरुद्रीयमन्त्रेण पूर्णाहुतिं च हुत्वा शिवमस्त्विति पुण्याहं वाचयित्वा ब्राह्मणान् वस्त्रादिभिरलंकृत्य सव्यञ्जनमन्नं परिविष्य अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाश्रितः। ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुगिति मन्त्रेण ब्रह्मार्पणं कृत्वा भोजनकाले आथर्वणान् मन्त्रान् जपेत् ॥

**पृ. सं-६४ श्लो. सं.-२२२**

अथ ब्राह्मणेभ्याचमनादिसंस्कारवत्सु तान् दक्षिणाताम्बूलगन्धमाल्यादिभिः

संपूज्य माहेश्वरबलिं करिष्य इति संकल्पानन्तरं यथासुखं तान् विसृज्य तत्सन्निधौ वा होमभुक्तशेषान्नमेकीकृत्य मानस्तोके तनये + विश्वेमते इति जपित्वा, भवाय स्वाहा इत्थं पूर्वोक्तनामभि पृथक् पृथक् स्वाहान्तेन बलिं कुर्यात् ॥

पृ. सं-६४ श्लो. सं २२४

अथ बलिपूजान्ते हरौ यो वै रुद्रः स भगवानित्यादिमन्त्रैः स्तुत्वोद्वास्य गोभ्यो भिक्षुकेभ्यो वा दत्वा वैदिकैस्सह पङ्क्तौ भुञ्जीयात् ॥

श्राद्धवैविध्यमुच्यते —

पृ. सं.-६४ श्लो सं. २२५

द्वितीयशंकरः अपरशिवो मुनिः कालीखण्डे श्राद्धव्यवस्थां यथा-ऽचीकरत्तन्न्यायोद्दिविकं श्राद्धं प्रकृतं वक्ष्म इति ॥

पृ. सं.-६५ श्लो. सं.-२२६

तत्र विश्वेदेवाद्याराधनं वैश्वदेवम् । वस्वादिस्वरूपपितृप्रीणनं पैतृकम् । कस्यचिन्मरणतिथिमुद्दिश्य क्रियमाणं मानुषम् । आहत्य दैवं पित्र्यं मानुषं त्रिविधं जातम् । पश्चात् एकोद्दिष्टपार्वणनान्दीवैष्णवशैवाख्यानि पञ्चविधानि श्राद्धानि । तत्रैकोद्दिष्टमेकमेवोद्दिश्य क्रियमाणं केवलस्वात्मकमित्यर्थः । तत् कुत्र भवतीत्यत्राह —

पृ सं-६५ श्लो. सं.-२२९

अमासंक्रमादिपुण्यकालेषु वसुरुद्रादित्यात्मकं पितृप्रीणनं कर्तुर्धर्म-वृद्धिकरं भवति विद्याकलत्रादिदृष्टार्थकांक्षी । नान्दीश्राद्धं प्रसिद्धं । अदृष्टार्थे-ब्रह्मलोकविभवकामी वैष्णवम् । आत्मतत्वसाक्षात्कारकांक्षी तु शैवश्राद्धं कुर्यात् । यद्यपि धर्मोऽप्यदृष्टफलः स्वर्ग्यः तथापि श्राद्धैश्वर्यापेक्षयाल्पत्वात् पृथक्फलत्वं न तत्वतः । किञ्च कृतकरिष्यमाणकर्मानुरोधेनापि तत् कुर्या-दित्याह—

पृ. सं. ६५ श्लो. सं.-२३१

इति प्रमाणमुदाहृत्य स्वयं मुनिः पार्वणविधिमाह—

पृ. सं -६५ श्लो. सं-२३२

द्वादशदिने स्वयं भस्मरुद्राक्षभूषितश्शुचिः कर्ता मुख्याधिकारी पक्वचित्तश्चेत् साम्बाय शिवाय द्वौ, आत्मान्तरात्मपरमात्मभ्यस्त्रीन्, वर्गस्यैकैकविधिना द्वौ वा। आत्मान्तरात्मपरमात्मशब्देनैव पूजयेत्। इयमेव शास्त्रमर्यादा। मध्यमाधिकारी आत्ममहेशायेत्यादिना। अधमस्तु पित्रे महेशायात्मने। पितामहाय भर्गायान्तरात्मने। प्रपितामहाय शर्वाय परमात्मन इति वा वृणुयात्। अत्र तृतीयपक्षमाह कालखण्डे—पीठेषु उदङ्मुखान् स्थाप्य क्षणं दद्यात् पृथक् पृथक्। पित्रे महेश्वरायेति आत्मनेति प्रकीर्त्य च। पितामहाय भर्गाय अन्तरात्मन इत्यथ॥ इति॥

पृ. सं.-६५ श्लो. सं.-२३४

अत्र, श्राद्धाधिकारसिद्ध्यर्थं पार्वणं तु सुतश्चरेदिति वचनबलेन पुत्रश्चेत् दार्शाद्यधिकारसिध्यर्थं निःशङ्कमेव गोत्रनामादिसंयुतपितृवरणं स्यादिति केचन मन्यन्ते; तदसमञ्जसमिति परे। इहोक्तविधिना कृतेपि दर्शाद्यधिकृतिर्वचनबलेनैव भवति हि। पार्वणशब्दमात्रेण किमासीत्। पैतृकमिति सिध्यति वा न हि। किन्तु पार्वणशब्दस्य त्र्यात्मकत्वम्। इदं तु पार्वणं शैवमिति पुराणवचनं चास्ते। नन्वस्तु नाम श्राद्धाधिकृतिः पुत्रस्य पार्वणशब्दस्य त्र्यात्मकत्वे सति दैवपैतृकसाम्येन वर्तमानत्वात्। कथं तर्हि मातृश्राद्धे यन्मे मातरित्यादिमन्त्राः प्रसज्येरन्। प्रसज्जन्ते सुखेन। कस्मात्? पित्रोर्दाम्पत्यसंबन्धस्य पूर्वाश्रमधर्मनिष्ठत्वात्। इह तु गोत्रादि प्रव्रजितस्य तदनुच्चार्यमेव। दर्शादौ पितरं विहाय पितामहादीन् मातृपितामही प्रपितामहीश्च वर्जेत्। यथासंभवं कर्तव्यम्। तथा च स्मृतिवचनानि—

पृ. सं.-६६ श्लो सं २३५

एवमादिवचनैर्यथासंभवमूहनीयम् । न हि क्वचिदसंभव इत्येतावता यत्र संभवस्तत्राप्यधिकारोऽपोद्यते ? । न हि सर्वस्य ब्राह्मणादेः सर्वत्र यागेष्वधिकारः । तत्र यो न्यायः सोऽत्रापि भविष्यति । नहि केवलं न्यायत एव, शास्त्रतश्च सिध्यतीत्यर्थः ॥

पृ. सं.-६६ श्लो. सं-२३९

वस्त्रयज्ञोपवीतगन्धाद्यैः ब्राह्मणानलंकृत्य अस्मिन् दैवश्राद्धे भवादि-नामभिर्हविषा यजे इति संकल्प्य पूर्वतन्त्रेणाग्निं प्रतिष्ठाप्य भवशिववामदेवज्येष्ठ-महादेवभर्गशङ्करसर्वात्मनामभिः पृथक् स्वाहान्तैः स्विष्टकृतश्च हुत्वा तन्त्रशेषं समापयेत् ॥

पृ सं.-६६ श्लो. सं-२४०

भोजनान्ते पूर्वप्रान्दर्भानास्तीर्याक्षतोदकैः सिञ्चन्, ऐन्द्रवारुण-वायव्यास्सौम्या याम्याश्च नैरृताः । वायसाः प्रतिगृह्णन्तु भूमावन्नं मयार्पित-मिति ' वायसपिण्डं दत्वा प्रक्षालनानन्तरं अक्षतोदकैः सिञ्चन् आत्मने स्वाहा, अन्तरात्मने स्वाहा, परमात्मने स्वाहा इति च त्रीन् पिण्डान् दत्वा ब्राह्मणाननुवृज्य विसृजेत् ॥

पृ. सं-६६ श्लो. सं २४१

यतिकर्मणि एकादशाहमध्ये सूतकाशौचप्राप्तावपि सत्यां कर्तुरशुच्य-भावान्माहेश्वरबलिपर्यन्त क्रमाद्विधाय पुनराशौचान्ते पार्वणचतुष्टयमिति केचिन्मन्यन्ते । अन्ये तु सुतविषये आराधनान्तमिति ॥

पृ सं.-६७ श्लो. सं.-२४२

गुरवेर्थे इत्यत्र गुर्वाद्यर्थे इत्यभिप्रायः । गुरुपरमगुरुपरमेष्ठिगुरुपरापर-गुर्वर्थे चत्वारः । भवाद्यर्थे चाष्टौ भवेयुः । तानासनादिभिरभ्यर्च्य पादौ

प्रक्षाल्य तत्तीर्थं कलशे संगृह्य सद्यस्संपूजयेत् । उत भवेत भोजनान्ते । संग्रहपूजायां सर्वत्र श्रीबोधायनोक्तसद्योविधानमेवोचितमितीह तदुच्यते गुरुमावाहयामि । सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः— आसनं । भवे भवे नातिभवे भवस्व मां—पाद्यम् । भवोद्भवाय नमः—अर्घ्यम् । वामदेवाय नमः — आचमनम् । ज्येष्ठाय नमः—स्नानम् । श्रेष्ठाय नमः—वस्त्रम् । रुद्राय नमः—उपवीतम् । कालाय नमः—गन्धं । कलविकरणाय नमः—अक्षतान् । बलविकरणाय नमः—बिल्वम् । बलाय नमः—धूपम् । बलप्रमथनाय नमः —दीपम । सर्वभूतदमनाय नमः—फलं निवेदयामि । मनोन्मनाय नमः —आचमनं । अघोरेभ्यः—ताम्बूलम् । अथ घोरेभ्यः—नीराजनम् । घोर-घोरतरेभ्यः—छत्रम् । सर्वेभ्यः—चामरं । सर्वशर्वेभ्यः—प्रदक्षिणम् । नमस्ते अस्तु रुद्ररूपेभ्यः—नमस्कारं । तत्पुरुषाय + याव्—ध्यानम् । ईशानस्सर्व + सदाशिवोमिति— स्तुतिं समर्पयामीति ॥

पृ. सं.-६७ श्लो. सं.-२४५

विस्पष्टार्थत्वादत्र नार्थो लिखितव्यः । यथाकथञ्चित् शास्त्रानुसारेण श्रद्धाधिक्येन कृतमखिलं कर्म सफलं भवति । तथापि तदनुष्ठानं भाक्तम् । मुख्यं तु सच्चिदानन्दसंपूर्णे ब्रह्मात्मभावापन्नस्य परहंसस्य गुरोर्नानेन किमपि प्रयोजनम् । तथापि कर्तुरघशान्तिप्रदत्वात्तस्मिन् दिने ब्राह्मणमुखेन चरस्थिर-महालिङ्गद्वारेणादरादभ्यर्चनं भवतु नाम । अपि च वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा । शिवस्य पूजया तद्वत् पुष्यत्यस्य वपुर्जगदिति वचनेन सर्वदा परमेश्वराराधनात् सर्वदेवताराधनं भवति ॥

पृ. सं.-६७ श्लो सं.-२४९

अधिकारिवैचित्र्येण प्रवृत्तं शास्त्रमखिलमेकेनैवानुष्ठानायादर्तव्यमिति न कश्चिन्नियमोऽस्ति । तथा च श्रीपराशरः—विधिरूपस्य शास्त्रस्य प्रतिषेधात्मकस्य च । केवलं भूतवस्त्वेकविषयस्य तथैव च ॥ अत्रोऽधिकारी न प्राज्ञो नैवात्मा नैव विग्रहः । चातुर्वर्ण्यं समालम्ब्य कश्चिदाश्रममास्थितः । वयोविशेषमालम्ब्य

तथावस्थान्तरं परम्। विशेषालम्बनं शास्त्रं विशेषे सति सत्तम ॥ इति। तस्माद्यथाकथञ्चित् शास्त्रमवलम्ब्यैवानुष्ठेयमिति सिद्धम्। अत एव हि बलिश्राद्धादिकालविकल्पः स्मर्यते — एकादशेऽह्नि कर्तव्यं तेषां श्राद्धं तु पार्वणम्। इति वसिष्ठः। तत एकादशे चाह्नि कुर्यान्माहेश्वरं बलिम्। कुर्यात्तु पार्वणश्राद्धं द्वादशेऽहनि पुत्रक ॥ इति दूर्वासाः। एकादशेऽह्नि संप्राप्ते यद्वा तु द्वादशेऽहनि। पार्वणेन विधानेन श्राद्धं कुर्यात्तदौरसः ॥ माहेश्वरबलिं कृत्वा पार्वणश्राद्धमाचरेत् ॥ इति नागरखण्डवचनम्। इत्थं विकल्पबहुलैर्वचनैर्यथेच्छयैव केवलमनुष्ठीयते न तत्र कश्चित् दोषस्संभविष्यति। ईश्वरार्थधिया पापान्यपि कर्माणि सुव्रत। भवन्ति भूतान्यत्यन्तं सत्यमेव न संशयः ॥ इति। श्रद्धयानुष्ठितस्य पावनत्वेपि शास्त्रं विहाय देशजातिकुलाचारस्य निर्मूलत्वादाचारत्वमपि नास्ति। तस्माच्छास्त्रमवलंब्य कुर्वीतेत्यर्थः ॥

**पृ. सं.-६७ श्लो. सं -२५०**

एवं उक्तविधिना प्रतिमासं संवत्सरान्तं चाराधनं कुर्यात्। प्रत्यब्दं दैवपार्वणश्राद्धमेव विशेषः। मासिकेपि पूजने पार्वणं कार्यमिति केचिन्मन्यन्ते। प्रत्यब्दं, सुतस्यापि पूजनमेवालमित्यपरे। अत्रालोच्यमाने मासिकाराधनं प्रत्यब्दमुभयं कार्यमिति स्थितम् ॥

इति श्रीकाशीनिवासि कौण्डिन्यगोत्रजभिण्डासुधाकरसूरिकुमार
नीलकण्ठविपश्चिता परमहंसाश्रमिणा श्रीशंकरयतीन्द्रनिजगुरु-
निर्दिष्टेन विरचितोऽयं यतिधर्मप्रबोधाख्यग्रन्थः
समाप्तः ॥

॥ श्रीशिवमस्तु ॥

SRI GNANANANDA NIKETAN
LIBRARY,
THAPOVANAM P.O.
Pin-605756.